At the end of this canto Sri Krishna pronounces that a true Bhakta should also possess all the attributes of a स्थितप्रज्ञ as described in the second canto, and it is only such Bhaktas who are extremely dear to Him.

Canto XIII

The thirteenth canto is supposed to be the consolidation of the various themes and theses presented in the previous twelve cantos in a scattered manner. "पूर्वषट्कद्वयोक्तार्थसङ्ग्रहपरोऽयमध्यायः"....."तद्विकीर्णतयोक्तं सर्वं बुद्ध्यारोहार्थं संक्षिप्यास्मिन्नध्याये प्रश्नपूर्वकं प्रदर्श्यते ।"

This collection of अव्यक्ततत्व, महत्तत्व, अहंकारतत्व etc. is called क्षेत्र. The etymological meaning of क्षेत्र is "क्षीयते स्थीयते अत्र भगवता इति व्युत्पत्त्या क्षेत्रमित्यभिधीयते ।" (13-2)

It is in this body that the Supreme Lord stays as a commander. The etymology of शरीर, as given by Srī Raghavendra Tīrtha, is very meaningful. The word शरीर is interpreted to mean the collection of basic elements viz. अव्यक्ततत्व, महत्तत्व, अहंकारतत्व, पञ्चमहाभूतानि, बुद्धिः, दश इंद्रियाणि, मनः, पञ्च इंद्रियविषयाः ।

शरीरशब्दस्य अव्यक्तादिपरत्वं च स्वपरिणामदेहादिवियोगद्वारा जीवस्य हिंसादिहेतुत्वात् शर्, शृहिंसायामिति धातोः, भगवता प्रेर्यत्वात् ईरं च । ईरप्रेरण इति धातोः शर् च तदीरं चेति शरीरमिति व्युत्पत्तेः इति ज्ञेयम् । (13-7)

In the later Sloka (13-7), this body called as संघातः, is considered as a transformation of क्षेत्र ।

Hence, this body itself can not be taken as क्षेत्र । Further, this Jiwa who has only partial knowledge of क्षेत्र can not be regarded as क्षेत्रज्ञ । Paramātma is the क्षेत्रज्ञ ।

All the elements and their transformations like इच्छा etc. have their own respective commanding deities. All these अभिमानिदेवता's are the place of abode for परमात्मन् and hence are together called as क्षेत्रम् । Sri Raghavendra Tīrtha, gives a complete list of the अभिमानि देवता's of the basic elements and their transformations. For example, Ganapati is the commanding deity of आकाश, Varuna that of 'अप्', Shiva that of 'अहंकारतत्व', Uma that of बुद्धि etc.

Sri Krishna gives a Comprehensive account of twenty types of instruments for acquiring knowledge of Paramātman.

They are given in the five slokas beginning from "अमानित्वमदंभित्वं...." (13-8)

They are (1) अमानित्वं— Avoidance of Self-praise (2) अदम्भित्वं— Absence of Vanity (3) अहिंसा— Non-violence (4) क्षान्तिः— forbearance (5) आर्जवं—Straight for-wardness (6) आचार्योपासनं— Service of the Knowledgeable (7) शौचं— Inner and outer purity (8) स्थैर्यं— Steadfast-ness (9) आत्मविनिग्रहः— Control over the mind (10) इंद्रि-यार्थेषु वैराग्यं— Disinterest in the sensual objects (11) अनहंकारः— Absence of false prestige (12) जन्ममृत्युजराव्या-धिदुःखदोषानुदर्शनम्— Realising the blemishes of this Sam-sara. (13) असक्तिः— Lack of attachment to relatives (14) अनभिष्वंगः—Absence of excessive love (15) समचित्तत्वं— Balanced mind in happiness and grief (16) मयि अन-न्ययोगेन अव्यभिचारिणी भक्तिः—Uswerving and unpolluted devotion in the Lord (17) विविक्तदेशसेवित्वं—Resorting to Secluded place (18) जनसंसदि अरतिः—Lack of interest in the congregation of people (19) अध्यात्मज्ञाननित्यत्वं—Con-sistent interest in the metaphysical knowledge and (20) तत्त्वज्ञानार्थदर्शनम् Pursuing the study of the Śastras.

What a beautiful inventory of the prerequisites for Knowledge–seeking!

After giving this detailed account of the prerequisites, Sri Krishna presents the broad features of Paramātman who is the object of Knowledge. The essential message is that the Supreme Lord is all-pervasive, omni-potent, omni-scient and supreme. It establishes that Paramātman is the independent performer and is distinct from Jiwātma. It is He who provides to all beings the abilities to perform. Those

who understand the meanings of क्षेत्र, क्षेत्रज्ञ, and क्षेत्री would realise freedom from bondage and become eligible to stay within the Lord—मद्भावाय मयि स्थितये उपपद्यते योग्यो भवति।

Canto XIV

In the 14th canto, the transformation of the three Gunas and the ways and means of transgressing them are explained. Sri Rāghavendra Tīrtha writes—

अतो "यावत्संजायते" इत्यादिना पूर्वाध्यायोक्तक्षेत्रक्षेत्रज्ञसंयोगहेतुकप्राणिजननविवरणपूर्वकं त्रिगुणविकारस्थितिं तदत्ययोपायं च दर्शयत्यस्मिन्नध्याये।" (14-1)

The three Gunas— सत्वं, रजस् and तमः—the entities created by प्रकृति and the respective commanding deities viz. श्रीः for सत्वगुण, भूः for रजोगुण and दुर्गा for तमोगुण bind the Jiwa in a bondage. Goddess श्रीः would bind the gods with the lustrous सत्वगुण and bring to them happiness and knowledge.

The Goddess भूः— the deity commanding रजोगुण, induces the attributes of attachments, desires and craze. All this binds the men-folk into the bondage of कर्मयोग।

The Goddess दुर्गा— the deity commanding तमोगुण — would create perversion of knowledge and bind the demonish beings into the tendencies of wrong doing, laziness, sleep etc.

That Guna which becomes pre-dominent would determine the nature of the tendencies and the actions. When Satva Guna becomes predominent, then there is all-round lustre and flow of knowledge. When the Rajo Guna predominates, then there would be a tendency of becoming crazy and discontented.

The predominent Tamo Guna brings about darkness and perverted knowledge.

Sri Rāghavendra Tīrtha brings out clearly the thesis that the Sādhakas should endeavour to free themselves from the bondage of the three Gunas,— "एवं सुखदुःखादिरूपबंधस्य गुणत्रयनिबंधनत्वात्तदत्यये सत्येव बंधहानिर्नान्यथा इत्याह गुणानिति।" (14-20)

Arjuna, rightly asks the question as to how one should get out of the control of these three binding Gunas. Sri Krishna once again reiterates the importance of being स्थितप्रज्ञ। He also advocates the performance of निष्कामकर्म as a service of the Lord.

Sri Rāghavendra Tīrtha gives a very meaningful interpretation of the term ब्रह्मभूयाय।

ब्रह्मशब्दः अत्र चित्प्रकृतिपरः। चित्प्रकृतिवद्भूयं भवनं ब्रह्मभूयम्। सा यथा विष्णुप्रिया तथा गुणातीतोऽपि विष्णुप्रियो भवतीत्यर्थः। यद्वा ब्रह्मणि चित्प्रकृतौ भूयाय भावाय चित्प्रकृतिप्राप्तये कल्पते शक्तो भवति।.... गुणातीतो लक्ष्मीसमीपं प्राप्य तद-नुगृहीतो हरिं प्रश्चादाप्नोतीति। (14-26,27)

Thus, after becoming freed from the bondage of the Gunas, the Sādhaka would realise nearness to Goddess Laxmī and through this nearness, would achieve nearness to Lord Vishnu.

Canto XV

The fifteenth canto further elaborates on the structure and nature of the Universe- which is the transformation of the three Gunas, This Samsara is depicted as a Tree. The apparent meanings of the different words like ऊर्ध्वमूलं, अधःशाखं, seem to suggest that this tree is in a reverse shape. Sri Rāghavendra Tīrtha makes it clear that the terms ऊर्ध्वं, अधः etc.

indicate the rank-order of the different entities and not their physical locations.

"उर्ध्वशब्दः उन्नतवाची सन् विष्णुचिदचित्प्रकृतिपरोऽत्र ज्ञेयः । उर्ध्वाः विष्णुचिदचित्प्रकृतयः वृक्षस्य मूलानीवं मूलानि यस्य सविकाराव्यक्तादिप्रागुक्तपञ्चविंशतितत्वात्मकस्य जगदाख्यवृक्षस्य तमूर्ध्वमूलम् ।" (15-1)

Thus, this tree of Universe has Vishnu, चित्प्रकृति and अचित्प्रकृति as the roots. The meaning of अश्वत्थ is also very interesting.

श्वः एकरूपेण न तिष्ठतीति व्युत्पत्या, अश्ववच्चञ्चलत्वेन तिष्ठतीति वाऽश्वत्थनामकम् । जगदाख्यं चिदचिदात्मकं वृक्षम् । (15-1)

For this tree, the inferior entites like five Mahābhutas, and अव्यक्त, महत्, अहंकार तत्व's constitute the branches. The Vedic hymns and their commanding deities are like leaves which create the possibility of producing fruits of काम and मोक्ष. The sensual objects are all like tender leaves.

Even though Vishnu is pervading in this tree, He is not readily available. By adopting the approach of detatchment and knowledge, this tree of Samsāra should be cut and penetrated to search for its exhalted root viz Vishnu, who is distinct from this Universe. The shining capacity of the sun, the lustre of the moon, the glow of fire are all due to Vishnu. The Lord fosters all the plants by taking the form of Soma. It is He who becomes Vaishwanāra Fire in the stomach and digests all the types of food. It is He who pervades the hearts of all and becomes responsible for memory, knowledge and perversion.

There are two types of Chetanas— क्षर and अक्षर. The former refers to all the living entities and the latter to Goddess Laxmi.

सर्वाणि भूतानि ब्रह्मादिजीवराशिः । शरीरक्षरणहेतुना क्षर उच्यते । अक्षरदेहत्वात् श्रीरक्षर उच्यते । (15-16)

The Supreme Lord is above all these and is therefore called as पुरुषोत्तम.

This 15th canto gives this most secret knowledge and one who knows this would become अपरोक्षज्ञानी and also attains मुक्ति ।

Canto XVI

The 16th canto elaborates some of the points made in the 15th canto.

पूर्वाध्याये "निर्मानमोहा" (15-5) इत्यादिना संक्षेपेणोक्तस्य पुमर्थयोः ज्ञानमोक्षयोः साधनस्य, "यततोऽप्यकृतात्मान" (15-11) इत्यादिना चोक्तस्य पुमर्थविरोधिनश्च देवासुरलक्षणरूपत्वात् तत्प्रपञ्चनमस्मिन्नध्याये क्रियते ।(16-1)

The main theme of this canto is the narration of the featurnes of Divine wealth and Devilish Wealth. One who possesses Divine wealth, would be endowed with good attributes such as fearlessness, mental composure, control on sense organs, straightforwardness, truthfulness etc. On the contrary, those who possess Devilish wealth are having bad attributes such as vanity, ego, anger, cruelty etc.

Possession of Divine wealth leads to different types of salvation while that of Devilish wealth would lead to bondage.

Sri Rāghavendra Tīrtha excels as usual in giving very incisive meanings to the different terms and concepts. For example, आर्जवं means मनोवाक्कर्मस्वैकरूप्यम् । अक्रोधः

means परपीडाकरिचत्तविकाराभाव: । क्षमा means क्रोधाभावेन सह अपकर्तुः अनपकृति: । दम्भ: means आत्माल्पत्वं ज्ञात्वाऽपि महत्वप्रदर्शनम् । अभिमान: प्रमाणातिक्रम: ।

The canto describes, in detail, the devilish attitudes and tendencies of the people. Such people argue that the universe does not recognise Vishnu as Supreme entity. They conceive the world to be unreal. Due to such misleading wrong perceptions, such devilish persons engage themselves in many destructive activities which are prompted by their perverted knowledge. They become crazy, selfish and reckless. They are never satisfied with their acquisitions and they always aspire for more. Their thought process is as follows—"Today I have acquired this money; tomorrow I will earn that; this enemy was killed today and tomorrow, I will destroy the others; I am the most wealthy and prosperous person; who equals me? etc. etc."

Such people develop hatred for Paramatman, and they become condemned to hell and thrown into the cycle of devilish births even in the future.

Sri Krishna sums up the three main evils leading to the hell, as Desire (काम:), Anger (क्रोध:), and Craze (लोभ:), and urges His devotees to give up these evils. Finally, He prescribes that anybody who deviates from the path prescribed by the Shastras and who behaves as per his free will, would never realise the cherished goals, would not achieve happiness in this world and also would not attain salvation. It is therefore necessary that every one should consider the Shastras as the main gospel for Do's and Don'ts.

Canto XVII

The 17th canto provides a comprehensive categorisation of various attributes and events of life into the three categories viz सात्विक, राजस, and तामस. Sri Raghavendra Tīrtha gives the rationale of this canto in the following words:

चतुर्दशाध्याये "नान्यं गुणेभ्यः कर्तारं" (14-19) इत्यादिना सर्वोऽपि परिणामो गुणकृत इति सामान्यतः उक्तस्यात्र सत्वादिगुणकृतानां श्रद्धानामाहारस्य तपःप्रभृतिकर्मणां च सदसद्रूपाणां भेदोक्त्या प्रपञ्चनं क्रियते ।

In this, the following entities are classified into the three categories: श्रद्धा, तपः, आहारः, यज्ञः, दानं,

Further, तपस् has been characterised as शारीरं तपः, वाङ्मयं तपः and मानसं तपः । Body-Penance consists of attributes such as worshipping the Gods, Brahmins, Preceptors, and the Knowledgeable, purity, straight-forwardness, celibacy and non-Violence. Speech-Penance consists of non-irritating speech, truthfulness, pleasing and happiness-creating speech, and study of the Shastras. Mental Penance consists of composure, mildness, reflectiveness, concentrating on the Lord and purity in thoughts and emotions.

The canto emphasises the importance of Faith श्रद्धा and urges the devotees to perform all their tasks with great Faith.

Canto XVIII

In this final, 18th canto, Sri Krishna presents in a consolidated manner, all the means of practising ज्ञानयोग. The canto also gives the categorisation of त्यागः, ज्ञानं, कर्म, कर्ता, बुद्धिः, धृतिः, सुखं, etc. into सात्विक, राजस and तामस. It also sets out the main duties of the four Varnas viz

ब्राह्मण, क्षत्रिय, वैश्य and शूद्र and advocates that each person should perform his duties according to his Varna.

This 18th canto is like the final chapter "Summary and Concluding Observations" of a monumental treatise. It sets out many generalised theories of universal relevance, which would be useful as codes of conduct for human behaviour.

Ṣri Rāghavendra Tīrtha brings to the contents of this canto, special richness and elegance, with his usual incisive interpretations and comments. Apart from the categorisation of त्याग into सात्विक, राजस and तामस, Sri Rāghavendra Tīrtha gives three innovative categories as follow: त्यागो हि फलत्याग:, कर्मणि ममतात्याग:, भगवति कर्तृत्वानुसंधानपूर्वं स्वस्य कर्तृत्वाभिमानत्याग: इति त्रिविध: संप्रकीर्तित इत्येके ।

Sacrifice of the end-results, sacrifice of self-obsession and sacrifice of the feeling that he himself is the doer and nourishing the feeling that Paramatman is the doer, are these innovative types of Tyāga.

This canto sets out a Universal theory of activities based on the philosophy of Kapila's Sāmkhya Śastra. There are five factors of activities: Place and Context (अधिष्ठानं), Doer (कर्ता), Varieties of Instruments (करणं च पृथग्विधम्), Varieties of subsidiary actions (विविधा: पृथक् चेष्टा:) and finally Divinity (दैवं). These five factors of Activity are supposed to govern all the activities—either through body, or speech or mind and of different characteristics—rightful or otherwise. Sri Krishna is highly assertive in denouncing the tendency of human-beings to appropriate the doer-ship (कर्तृत्वं) on themselves, despite the fact that the final occurence of the events is much beyond their con-

trols. Such a conceited self-opinionated person is condemned as दुर्मतिः ।

Sri Krishna urges Arjuna to stick to his स्वधर्म because even well-done परधर्म is frightening. This kind of emphatic message is the most befitting finale to the entire Bhagavad Gita.

It appears that Six slokas beginning from "बुद्ध्या विशुद्धया युक्तो" (18-51) until "सर्वकर्माण्यपि सदा" (18-56) present in a succinct manner, summary of the different cantos of Sri Bhagavadgita.

Sri Krishna leaves the final decision for action to Arjuna himself by stating "विमृश्यैतदशेषेण यथेच्छसि तथा कुरु" (18-63)

The final sermon of Sri Krishna is as follows: "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।" (18-66). Sri Rāghavendra Tīrtha gives three interpretations to the terms "सर्वधर्मान् परित्यज्य ।

(1)अन्यसर्वधर्मान् परित्यज्य (2)सर्वधर्मफलानि परित्यज्य and (3) अवैष्णवसर्वधर्मान् परित्यज्य । (18-66)

Finally, Sri Krishna makes the searching enquiry as to whether Arjuna had listened to this long Geeta Sermon with concentration or not and whether his perverted perception has now disappeared or not.

Sri Rāghavendra Tīrtha introduces this enquiry as follows: एतावानुपदेशः अरण्यरुदितवज्जातो न भवति किलेति भावेन पृच्छति । (18-72)

Finally Arjuna pronounces that his perversion has vanished due to the grace of Lord Krishna, that he is now without any doubts and that he would certainly act according to His command. Sri

Rāghavendra Tīrtha writes: नष्टो मोहः प्रथमाध्यायोक्तो विपरीतज्ञानलक्षणो मोहो नष्टः । नारायणद्विट्तदनुबंधिनिग्रहः परमो धर्मोऽवश्यं कार्य एवेत्यादिस्मृतिर्मम जाताऽस्ति ।"

Finally Sanjay sums up the glorious sermon of Sri Bhagavadgita by pronouncing that Wealth, Victory, Prosperity, and Justice are bound to prevail wherever Lord Krishna, the Master of all Yogas is present and wherever Arjuna— ready with his bows and arrows, is present.

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ।। (10-78)

।। श्रीकृष्णार्पणमस्तु ।।

Contents

Preface	vii
Introduction : *Dr. V.R. Panchamukhi*	ix
प्रथमोऽध्यायः (Chapter-I)	1
द्वितीयोऽध्यायः (Chapter-II)	10
तृतीयोऽध्यायः (Chapter-III)	46
चतुर्थोऽध्यायः (Chapter-IV)	64
पञ्चमोऽध्यायः (Chapter-V)	78
षष्ठोऽध्यायः (Chapter-VI)	90
सप्तमोऽध्यायः (Chapter-VII)	103
अष्टमोऽध्यायः (Chapter-VIII)	115
नवमोऽध्यायः (Chapter-IX)	125
दशमोऽध्यायः (Chapter-X)	137
एकादशोऽध्यायः (Chapter-XI)	150
द्वादशोऽध्यायः (Chapter-XII)	164
त्रयदशोऽध्यायः (Chapter-XIII)	171
चतुर्दशोऽध्यायः (Chapter-XIV)	183
पञ्चदशोऽध्यायः (Chapter-XV)	191
षोडशोऽध्यायः (Chapter-XVI)	198
सप्तदशोऽध्यायः (Chapter-XVII)	204
अष्टादशोऽध्यायः (Chapter-XVIII)	211

।। श्रीः ।।

श्रीराघवेन्द्रयतिकृतः

गीतार्थसङ्ग्रहः

(गीताविवृतिः)

प्रथमोऽध्यायः

।। श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ।।

लक्ष्मीनारायणं नत्वा पूर्णबोधान्गुरूनपि।
कुर्मः श्रीकृष्णगीताया भाष्याद्युक्तार्थसंग्रहम् ।।

"स्त्रीशूद्रब्रह्मबन्धूनां त्रयी न श्रुतिगोचरा। इति भारतमाख्यानं कृपया मुनिना कृतम् ।।" इति भागवतोक्त्या वेदार्थज्ञानानधिकारिणां स्त्रीशूद्रादीनां धर्मज्ञानद्वारा मोक्षो भवेदिति भगवान्वेदव्यासः संभवसभाऽरण्यविराटोद्योगभीष्मद्रोणकर्णशल्यगदा-सौषुप्तिकशांत्यानुशासनिकाश्वमेधिकमौसलमहाप्रस्थानस्वर्गारोहणभविष्यत्पर्वभेदेनाष्टा-दशपर्वात्मकं भारतं कृत्वा तत्र भीष्मपर्वणि भारतपारिजातमधुभूतां सर्वभारतार्थसंग्रह-भूतां श्रीकृष्णार्जुनसंवादरूपां भगवद्गीतां निबबन्ध। तत्र पूर्वषट्के ज्ञानोपायोक्तिः। द्वितीयषट्के साधनोक्तिः। तृतीयषट्के प्रागुक्तस्य प्रपञ्चनं क्रियत इति विवेकः। तत्रा-द्याध्यायो द्वितीये कतिपयश्लोकाश्च कृष्णेनार्जुनबोधने प्रसक्तिसंपादनाय प्रवृत्ताः। तत्रायमर्थः। **धृतराष्ट्र उवाच**। किमित्याह ।। **धर्मेति** ।।

धृतराष्ट्र उवाच-

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ।। १ ।।

धर्मसाधनभूमौ कुरुक्षेत्रे युयुत्सवः युद्धमिच्छंत एव समवेता मिलिताः संतो

मामका मदीयाः दुर्योधनादयः पांडवाश्च हे संजय किमकुर्वतेति इति शब्दो योज्यः। पांडवानां भगवत्प्रियत्वं सर्वसाक्षिकमप्यजानन्धृतराष्ट्रः स्वपुत्राणां विजयविविदिषया संजयं पप्रच्छेत्यर्थः।।१।।

सञ्जय उवाच-

दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा।
आचार्यमुपसंगम्य राजा वचनमब्रवीत्।। २।।

धृतराष्ट्रप्रश्नस्य संजय उत्तरमुक्तवानित्याह वैशंपायनो जनमेजयं प्रति। **संजय उवाचेत्यादिनवभिः** श्लोकैः दुर्योधनकृतव्यापारमाह।। **दृष्ट्वेत्यादिना।।** दुर्योधनस्तु राजा तदा युद्धार्थं मिलितसमये व्यूढं व्यूहात्मना रचितं पांडवसैन्यं दृष्ट्वा तु दृष्ट्वैवेति वा तोरन्वयः। द्रोणाचार्यसमीपमागत्य वचनमुवाच।। २।।

पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूम्।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता।। ३।।

तद्वचनमेवानुवदति संजयः।। **पश्यैतामित्यादिना।** हे आचार्य, तव शिष्येण धीमता धृष्टद्युम्नेन व्यूढां पांडुपुत्राणां एतां महतीं चमूं सेनां पश्य।। ३।।

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि।
युयुधानो विराटश्च द्रुपदश्च महारथः।। ४।।

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः।। ५।।

अत्र सेनायां महेष्वासाः महाधानुष्काः युधि भीमार्जुनसमाः शूराः सन्ति। ते क इत्यत आह।। **युयुधान** इत्यादिना। महारथ इति प्रत्येकमन्वेति।। ४।। वीर्यवानिति विशेषणं नरपुंगवो नरश्रेष्ठ इत्यपि त्रयाणाम्।। ५।।

युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान्।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः।। ६।।

महारथत्वं नाम "एको दशसहस्राणां योधयेद्यः स धन्विनां। शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः।।" (उ. प. १६८/१४१) इत्युक्तरूपम्। विक्रांतः पराक्रमवान्। सौभद्रः अभिमन्युः। द्रौपदेयाः द्रौपदीपुत्राः।। ६।।

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम।
नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते।। ७।।

भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च।। ८।।

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः।। ९।।

अस्माकं त्विति पांडवव्यावर्तकस्तुशब्दः। अस्माकं संबंधिनो विशिष्टाः बलिष्ठाः मम सैन्यस्य नायकाः नेतारो ये तान्निबोध बुद्धिस्थान् जानीहि। ते तव सम्यग्ज्ञानार्थं तान्ब्रवीमि। द्विजोत्तमेत्याचार्यसंबोधनम्।। ७।। तानाह द्वाभ्यां।। **भवानित्यादिना।।** समितिंजयः युद्धे जयशीलः सौमदत्तिः सोमदत्तसुतो भूरिश्रवाः।। ८।। शूरा एवेति वा मदर्थं एवेति वाऽवधारणान्वयः। त्यक्तजीविताः प्राणत्यागे कृतनिश्चया इत्यर्थः। प्रह्रियन्ते एभिरिति प्रहरणानि अस्त्राणि। नानाविधानि शस्त्राणि येषां ते नानाशस्त्रप्रहरणाः। युद्धविशारदाः युद्धकुशलाः।। ९।।

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्।। १०।।

बलद्वये बलिष्ठपरिगणने पांडवविजये मम संदेहोऽस्ति। ततो भवदादयः सर्वे बहुसन्नद्धा भवन्त्विति भावेनाह।। **अपर्याप्तमिति।** सेनापतिभूतभीष्माभिरक्षितम्। अस्माकं तत्प्रागुक्तबलिष्ठोपेतं बलम् अपर्याप्तं पांडवजये न समर्थं प्रतीयते। भीमाभिरक्षितमिदं पांडवानां बलं तु पर्याप्तम् अस्मद्विजये शक्तं प्रतीयते।। १०।।

अयनेषु च सर्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि।। ११।।

हि यस्मादेवमतो भवन्तः सर्व एव सर्वेष्वयनेषु व्यूहप्रवेशमार्गेषु यथाभागमवस्थिताः स्वस्वरणभूमिस्थानेषु दृढमवस्थिताः सन्तः भीष्ममेवाभिरक्षन्तु। अन्यैर्युध्यमानो भीष्मः पृष्ठतोऽरिभिर्यथा न हन्यते तथा रक्षन्त्विति द्रोणाचार्यमुक्त्वा विषसाद।। ११।।

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः।
सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान्।। १२।।

ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्।। १३।।

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ।
माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः।। १४।।

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः।
पौण्ड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः।। १५।।

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ।। १६।।

एवं विषादिनस्तस्य दुर्योधनस्य हर्षं संजनयन् जनयितुम्। "लक्षणहेत्वोः क्रियाया" इति हेतौ शत्रंतम्। प्रतापवान्कुरुवृद्धः पितामहो भीष्मः सिंहनादं उच्चैर्विनद्य शंखं दध्मौ। ध्मा शब्दे।। १२।। ततस्तच्छंखध्वानानन्तरं पणवानकगोमुखाः वाद्यविशेषाः सहसैव युगपदेव। तुमुलः सर्वत्र परिपूर्णोऽभवत्।। १३।। ततः तेषां घोषानन्तरं श्वेतहयैः शुक्लवर्णाश्वैः युक्ते स्यंदने रथे पांडवस्त्वर्जुनः। स्थितावेवेत्यन्वयः।। १४।। तद्विवृणोति।। **पांचजन्यमिति**।। हृषीकेशशब्दार्थ उक्तो भाष्ये एकादशे। "हृषीकाणामिंद्रियाणामीशत्वाच्च हृषीकेश" इत्यादि। दध्मावित्यन्वयः।। १५।। अनंतविजयं अनंतविजयाख्यम्। नकुलः सुघोषाख्यं शंखं सहदेवो मणिपुष्पकाख्यं दध्मुरित्यन्वयः।। १६।।

काश्यश्च परमेष्वासः शिखण्डी च महारथः।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः।। १७।।

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते।
सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक् पृथक्।। १८।।

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्।। १९।।

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः।। २०।।

हृषीकेशं तदा वाक्यमिदमाह महीपते।

अर्जुन उवाच।

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत।। २१।।

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे।। २२।।

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः।। २३।।

परमेष्वासो महाधानुष्कः काश्यः। महारथः शिखण्डी च अपराजितः सात्यकिश्च।। १७।। पृथिवीपते हे धृतराष्ट्र, महाबाहुः सौभद्रोऽभिमन्युश्च। शंखमिति समुदायाभिप्रायः। स्वस्वशंखान्दध्मुरिति।। १८।। स घोषस्तुमुलो व्याप्तो भूत्वा नभश्च पृथिवीं च व्यनुनादयंस्तत्र तत्र प्रतिध्वनिं जनयन्नेव धार्तराष्ट्राणां हृदयानि व्यदारयत्। अद्यैव नष्टं कुरुकुलमिति त्वत्पुत्रा मेनिर इत्यर्थः।। १९।। तत्त्वोपदेशप्रसंजकं अर्जुनविषादं वक्तुं एतावानुपोद्घातः प्रवृत्तः। एवं दुर्योधनव्यापारं दलद्वयगतव्यापारं चोक्त्वाऽधुनाऽर्जुनव्यापारमाह **अथेत्यादिचतुर्भिः श्लोकैः**। अथानन्तरं कपिध्वधोजोऽर्जुनः व्यवस्थितान् युद्धे कृतनिश्चयान् दृष्ट्वा शस्त्रसंपाते शस्त्रप्रहरणे प्रवृत्ते। "वर्तमानसामीप्ये वर्तमानवद्वा"। प्रवर्तितमुद्युक्ते सति तदा शस्त्रसंपातप्राक्काले इदं वक्ष्यमाणं वाक्यमाहेत्यन्वयः।।२०।। सार्धश्लोकद्वयेन तद्वाक्यमाह।। **सेनयोरिति**। अस्मिन् रणोद्योगे कैः सह मया योद्धव्यम्। दुर्बुद्धेर्धार्तराष्ट्रस्य प्रियं कर्तुमिच्छंतो येऽत्र समागतास्तान्योद्धुकामानवस्थितान्योत्स्यमानान्यावद् द्रक्ष्यामि तावदुभयोः सेनयोर्मध्ये रथं स्थापयेत्याहेत्यर्थः।। २१।। २२।। २३।।

संजय उवाच।

एवमुक्तो हृषीकेशो गुडाकेशेन भारत।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्।। २४।।

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति।। २५।।

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान्।
आचार्यान्मातुलान् भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा।। २६।।

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि।
तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान्।। २७।।

कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत्।

एवं गुडाकेशेन गुडाकाया निद्रायाः ईशेन जितनिद्रेणार्जुनेनोक्तो हृषीकेशः सर्वेंद्रियप्रेरकः श्रीकृष्णः बलद्वयमध्ये भीष्मद्रोणप्रमुखत इति बुद्ध्या विविक्तेनान्वयः। रथं स्थापयित्वा हे पार्थ समवेतान्युद्धार्थं मिलितानेतान्कुरून् पश्येत्युवाचेति।।२४।।
२५।। तत्रेत्यस्य विवरणं सेनयोरुभयोरपीति। तथेति समुच्चये।। २६।। तानवस्थितान्बंधून्समीक्ष्यैवेत्येवकारेणान्वयः। विषीदन्विषादं कुर्वन्। विषादो नाम मोहनिमित्तकाच्छोकाद्यन्मनोदौर्बल्यम्। यस्मिन्सति सर्वव्यापारोपरमो भवति स इति ज्ञेयम्।। २७।।

अर्जुन उवाच-

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्।। २८।।
सीदंति मम गात्राणि मुखं च परिशुष्यति।

वेपथुश्च शरीरे मे रोमहर्षश्च जायते।। २९।।

इदमब्रवीदित्युक्तमर्जुनवाक्यमाह।। **दृष्ट्वेत्यादिनाऽऽध्यायसमाप्ति।** हे कृष्ण, सकललोककर्षक। तदुक्तं गीताभाष्ये पंचमेऽध्याये। नियमनादिना सकललोककर्षणात्कृष्णः। तच्चोक्तम्। "यतः कर्षसि देवेश नियम्य सकलं जगत्। अतो वदंति मुनयः कृष्णं त्वां ब्रह्मवादिन" इति महाकौर्मे इत्युक्तेः। युयुत्सुं योद्धुमिच्छंतं सम्यगवस्थितमिमं बंधुजनं दृष्ट्वा मम गात्राणि हस्ताद्यवयवाः सीदंति विशीर्यंते। षद्लृ विशरणगत्यवसादनेष्वितिधातोः। मुखे म्लानता च जायते।। २८।। शरीरे कंपो रोमांचश्च जायते। धनुर्हस्तात्पतति। त्वक्च परितस्तप्यत एव।। २९।।

गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः।। ३०।।

निमित्तानि च पश्यामि विपरीतानि केशव।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे।। ३१।।

न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च।
किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा।। ३२।।

अवस्थातुं च न शक्नोमि। मनश्च मे भ्रमतीव च विपरीतानि निमित्तानि दुर्निमित्तानि च पश्यामि। केशव ब्रह्मरुद्रप्रवर्तक। कश्च ईशश्च केशौ तौ सृष्ट्यादिना वर्तयतीति व्युत्पत्तेः। केशपदोपपदाद्वृतुवर्तन इत्यतोऽन्तर्णीतण्यर्थाड्डुप्रत्यये रूपसिद्धेः। उक्तं हि स्थितप्रज्ञस्य का भाषेत्येतद्भाष्ये। "हिरण्यगर्भः कः प्रोक्त ईशः शंकर एव च। सृष्ट्यादिना वर्तयति तौ यतः केशवो भवान्" इति।। ३०।। युद्धेन श्रेयो लभ्यत इत्यत आह।। **न चेति**।। श्रेयश्च न पश्यामि। आहवे युद्धे विजयादिकं फलं नेच्छामि।। ३१।। येषामर्थे प्रजोजननिमित्तं राज्याद्यपेक्षितं नः अस्माकं।। ३२।।

येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च।। ३३।।

आचार्याः पितरः पुत्रास्तथैव च पितामहाः।
मातुलाः श्वशुराः पौत्रा श्यालाः संबंधिनस्तथा।। ३४।।

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते।। ३५।।

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन।
पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः।। ३६।।

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबांधवान्।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव।। ३७।।

त इमे बांधवाः प्राणान् धनानि च त्यक्त्वा युद्धे व्यवस्थिताः। ते क इत्यत आह।। **आचार्या इति**।। नैवेच्छामीत्येवकारान्वयः। यदि मां युद्धान्निवृत्तं एते हन्युस्तर्हि घ्नतोऽपि नैव हंतुमिच्छामीत्यर्थः। हे मधुनामकदैत्यमर्दन।।३३।।३४।। कैमुत्यन्यायेनाह **अपीति**।। त्रैलोक्यराज्यस्यापि हेतोरेतान्हंतुं नेच्छामि। किमुत महीमात्रनिमित्तमिति। किञ्च धार्तराष्ट्रान्निहत्य नोऽस्माकं का प्रीतिः किमैहिकसुखम्। न किमपि। नापि पारत्रिकं प्रत्युत पारत्रिकदुःखहेतुपापमेवास्मानाश्रयेत्। न जायत इति जनः, अर्दयति संसारमिति अर्दनः जनश्चासावर्दनश्चेति जनार्दनः तस्य संबुद्धिः। उक्तं ह्येवं गीताभाष्ये दशमे।। **आततायिनः**। "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षडेते ह्याततायिन" (भी०प० १०७/११०) इत्युक्तलक्षणात्।। ३६।। तस्मात्सीदंति मम गात्राणीत्यादिनोक्तोपपत्तिबलात्सबांधवान्धार्तराष्ट्रान् हंतुं वयं नार्हाः।

"आततायिनमायांतं हन्यादेवाविचारयन्। नाततायिवधे दोषो हंतुर्भवति कश्चन" (शां.प० १५/१५) इत्युक्तेस्तेषाम् आततायित्वेन हन्तव्यतया प्राप्तत्वेऽपि तद्धननप्रसक्त्या बंधूनामपि हननप्राप्तेर्न हन्तुं वयं योग्या इति भावः।। ३६।। बन्धुत्वेऽप्याततायिसंबंधित्वात्तेऽपि बंधुजना हंतव्या एवेत्यत आह।। **स्वजनं हीति।** स्याम भवेम। तद्दर्शनस्पर्शनसंभाषणादेरभावप्राप्तेरिति भावः।। ३७।।

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्।। ३८।।

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन।। ३९।।

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत।। ४०।।

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः।। ४१।।

सङ्करो नरकायैव कुलघ्नानां कुलस्य च।
पतन्ति पितरो ह्येषां लुप्तपिंडोदकक्रियाः।। ४२।।

कुत एवं बुद्ध्या ते न निवृत्ता इत्यत आह **यद्यपीति।।** एते दुर्योधनादयः राज्यलोभेनोपहतचेतसः नष्टधर्मज्ञानाः दोषं पातकं न च पश्यन्ति। यद्यपि।। ३८।। तथाऽपि हे जनार्दन जननरहित संसारार्दन, कुलक्षयकृतं दोषं प्रपश्यद्भिरस्माभिः अस्माद्दोषान्निवर्तितुं कथं न ज्ञेयम्।। ३९।। कः कुलक्षयकृतो दोष इत्यत आह **कुलक्षय इति।।** सनातनाः परंपराप्राप्ताः कुलधर्माः क्षत्रियादिकुलधर्माः। उत शब्दोऽप्यर्थे। अवशिष्टं कृत्स्नमपि कुलधर्मोऽभिभवति अधर्माक्रांतं भवति।। ४०।। वार्ष्णेय वृष्णिकुलोद्भव।। ४१।। **कुलस्य चेति** पुत्रपौत्रादिसंतानस्य चेत्यर्थः। एषां कुलघ्नानां पितरः लुप्तपिंडाः लुप्तोदकक्रियाश्च संतः पतंति।। ४२।।

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः।
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः।। ४३।।

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन।
नरके नियतं वासो भवतीत्यनुशुश्रुम।। ४४।।

अहो बत महत्पापं कर्तुं व्यवसिता वयम्।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः।। ४५।।

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्।। ४६।।

उक्तंदोषमुपसंहरति **दोषैरिति द्वाभ्यां।।** जातिधर्माः क्षत्रियत्वादिजातिप्रयुक्ता धर्माः कुलधर्माश्च शाश्वताः परंपराप्राप्ताः।। ४३।। उत्सन्नकुलधर्माणां उत्सन्नजातिधर्माणां चेत्यपि ज्ञेयम्। अनुशुश्रुम "प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः। अपश्चात्तापिनः कष्टान्निरयान्यांति दारुणान्" इत्यादिवदद्भिर्वृद्धैः श्रुतवन्तः स्मः।। ४४।। एवं बंधुवधस्य दोषहेतुत्वाध्यवसायेन संतप्यमानोऽर्जुन आह **अहो बतेति।।** राज्यसुखलोभेन स्वजनं हन्तुं वयमुद्यता इति यत्तदेतन्महत्पापं कर्तुं व्यवसिता निश्चयवंतो वयम्। अहो बत महाकष्टमिति।। ४५।। एवं संतप्तः सन्मृतिमेवार्थयमान आह ।। **यदीति।।** अकृतप्रतीकारमशस्त्रं तूष्णीं आसीनं मां यदि शस्त्रपाणयो धार्तराष्ट्रा रणे हन्युस्तर्हि तद्धननं मे क्षेमतरं अत्यंतहितमेव भवेत्। बंधुवधदोषाभावाद्रणे हननेन गतिसंभवाच्चेति भावः।। ४६।।

सञ्जय उवाच

एवमुक्त्वाऽर्जुनः संख्ये रथोपस्थ उपाविशत्।
विसृज्य सशरं चापं शोकसंविग्नमानसः।। ४७।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमोऽध्यायः।। १।।

ततः किं जातमिति धृतराष्ट्रहार्दं परिहरति।। **संजय इति।।** संख्ये रणे रथोपस्थे रथमध्ये उपाविशत्। कथं शोकेन कंपितचित्तः सन् सशरं चापं विसृज्येति।। ४७।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते प्रथमोऽध्यायः।। १।।

द्वितीयोऽध्यायः

सञ्जय उवाच-

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः।। १।।

श्रीभगवानुवाच-

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन।। २।।

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।। ३।।

।।ॐ।। ततः किं जातमिति धृतराष्ट्रस्यापेक्षायां सञ्जय उवाच **तं तथेति**।। उक्तदिशा कृपयाऽऽविष्टमेवं विषण्णं अर्जुनं भगवानुवाच **कुत** इत्यादिद्वाभ्यां श्लोकाभ्याम्।। १।। हे अर्जुन कुतो हेतोस्त्वा त्वां विषमे सङ्कटे इदं कश्मलम् उपस्थितम्। अयं मोहः प्राप्तः। यतः आर्यैरसेवितम्, अस्वर्ग्यं स्वर्गविरोधि अयशस्करं च।।२।। तस्मात्क्लैब्यं कातर्यं मा स्म गमः नैव प्राप्नुहि। हे पार्थैतत्क्लैब्यं त्वयि नोपपद्यते योग्यं न भवति। क्षुद्रं लाघवकरं हृदयदौर्बल्यं कातर्यं त्यक्त्वोत्तिष्ठ। उत्थाय सन्नद्धो भव। हे परन्तप, परं शत्रुं तापयतीति शत्रुतापन। "द्विषत्परयोस्तापेः" इति "खचि खित्यनव्ययस्ये" ति मुमागमः।। ३।।

अर्जुन उवाच-

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन।। ४।।

गुरूनहत्वा हि महानुभावाञ्छ्रेयो भोक्तुं भैक्ष्यमपीह लोके।
हत्वाऽर्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान्।। ५।।

पुनः स्नेहकारुण्यतया व्याकुलो भगवदुक्तं हितमजानन्नर्जुन उवाच।। **कथमित्यादिपञ्चभिः श्लोकैः**। हे मधुदैत्यघातक शत्रुनिबर्हण, सङ्ख्ये युद्धे भीष्मं द्रोणं कथमहमिषुभिर्बाणैः प्रतियोत्स्यामि। कुतः यतस्तौ पूजार्हौ पूजनीयौ तत इति।। ४।। ननु चैतदहनने राज्याप्राप्तेः देहनिर्वाहो न स्यादित्यत आह।। **गुरूनिति**।। महानुभावान्भगवद्भक्त्यादिगुणसम्पन्नान् द्रोणादिगुरूनहत्वा इह लोके भैक्ष्यं भिक्षयोपलब्धं अन्नं भोक्तुं श्रेयः वरम्। पारत्रिकदुःखाभावादितिभावः। हि यतोऽतो न योत्स्यामीत्यन्वयः। न केवलं तेषां हनने पारत्रिकदुःखं किंत्विहाप्यतिदुःखमित्याह।। **हत्वेति**। अर्थं कामयन्त इत्यर्थकामास्तान् गुरून्हत्वा तैर्भुज्यमानांस्तानेव भोगांस्तद्रुधिरेण प्रदिग्धान्प्रकर्षेण लिप्तान् तदीयासनेष्वेवोपविश्य इह भुञ्जीय अनुभवेयम्। तदेतत् परलोकदुःखादतिशयितं दुःखमिति भावः।। ५।।

न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः।। ६।।

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।। ७।।

न हि प्रपश्यामि ममापनुद्या-
द्यच्छोकमुच्छोषणमिन्द्रियाणाम्।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम्।। ८।।

पापमङ्गीकृत्य युद्धकरणेऽपि जयः सन्दिग्ध एवेत्याह **न चैतदिति**। द्वयोर्मध्ये नोऽस्माकं कतरत्किन्नाम गरीयः अधिकतरं भविष्यतीति न विद्मः तदेव द्वयमाह।। **यद्वेति**। एतान्वयं जयेम जेष्यामः। यदि वा नोऽस्मानेते जयेयुः जेष्यन्तीति। किञ्चा-

स्माकं जयोऽपि पराजय एव फलत (बुद्ध्यते) इत्याह।। **यानेवेति।** यानेव हत्वा जीवितुं नेच्छामः त एव धार्तराष्ट्राः सम्मुखेऽवस्थिताः तस्मात्।। ६।। कार्पण्यदोषेण एतान् हत्वा कथं जीविष्याम इति कृपणतादोषेणाभिभूतशौर्यलक्षणस्वभावः धर्मसम्मूढचेताः धर्मे सम्मूढं सन्दिग्धं चेतो यस्य स तथोक्तस्तादृशोऽहं त्वा त्वां पृच्छामि। यच्छ्रेयः स्याद्भिक्षाटनयुद्धयोर्मध्ये यच्छ्रेयः स्यान्निश्चितं तन्मे ब्रूहि। किञ्चाहं ते शिष्यः शासनार्हः। अतस्त्वां प्रपन्नं शरणागतं मां शाधि शिक्षय।। ७।। त्वमेव विचार्य यद्युक्तं तत्कुर्वित्यत आहार्जुनः।। **न हीति।।** इन्द्रियाणामुच्छोषणमतिशोषकरं मदीयं शोकं यत्कर्मापनुद्यादपनयेत्तदहं न पश्यामि। राज्यलाभहेतुयुद्धकर्मैव तादृशमित्यत आह।। **अवाप्येति।।** यद्यपि भूमौ निष्कण्टकं राज्यं प्राप्स्यामि तथा सुराणां देवानामाधिपत्यं च प्राप्स्यामि एवम भीष्टं सर्वमवाप्यापि शोकापनोदनोपायं न प्रपश्यामीत्यर्थः। हत्वाऽर्थकामानिति उक्तदिशा सर्वस्यापि दुःखहेतुत्वादिति भावः।। ८।।

सञ्जय उवाच-

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह।। ९।।

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः।। १०।।

ततः किमकरोदर्जुन इति धृतराष्ट्राकाङ्क्षां निराह सञ्जयः।। **एवमुक्त्वेति।** हृषीकेशं सर्वेन्द्रियप्रेरकं, गुडाकेशो जितनिद्रः परन्तपः शत्रुतापनः, गोविन्दं गाः वेदवाचः प्रतिपादकत्वेन विन्दते लभत इति गोविन्दः तम्। हेत्याश्चर्ये। महाधैर्यादिगुणवतोऽप्येवं बुद्धिर्जातेति।। ९।। ततः किं जातमित्यत आह।। **तमुवाचेति।।** हे भारतेति धृतराष्ट्रसम्बोधनम्। प्रहसन्निवेति परिहासकरवाक्योक्तिद्योतकहासस्य सूचनायेवशब्दः।। १०।।

श्रीभगवानुवाच-

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः।। ११।।

भगवन्माहात्म्यज्ञानतद्भक्तिपूर्वकं भगवदाराधनरूपतया स्वविहितवृत्तित्वेन वाऽनुष्ठीयमानो नारायणद्विट्तदनुबन्धिनिग्रहः क्षत्रियाणां परमो धर्मः। तं धर्मं बन्धुस्नेहादधर्मत्वेनोक्तदिशा शङ्कमानम् अर्जुनं प्रत्युक्तरूपो निग्रह एवं परमधर्मः, तद्विरु-

द्धः सर्वोऽपि अधर्म इति कृत्स्नगीताशास्त्रेण बोधयिष्यन्नादौ तावदविवेकेन तव शोक इत्याह।। **अशोच्यानिति।।** अशोच्यान् शोकानर्हान्। हे पार्थ त्वम् अन्वशोचः। यान् त्वं शोचितवानभूस्ते न शोकार्हा इति यावत्। **प्रज्ञावादांश्च भाषसे।** प्रज्ञयोत्था वादाः प्रज्ञावादाः स्वबुद्धिमात्रपरिकल्पिता वादाः वान् भाषसे यान्प्रभाषंसे ते न वृद्धसम्मता इति यावत्। यद्वा प्रकर्षेण जानन्तीति प्रज्ञाः। "इगुपधज्ञाप्रीकिरः कः"। तेषामवादाः प्रज्ञावादाः प्राज्ञविरुद्धवादास्तान्प्रभाषस इत्यर्थः। न हि "दृष्ट्वेमं स्वजनं कृष्ण" इत्याद्यर्जुनवाक्येषु कश्चित्प्राज्ञसम्मतवादोऽस्ति। न हि प्राज्ञा नारायणद्विट्तदनुबन्धिनिग्रहं अधर्मं वदन्तीति भावः। ननु आसन्नविनाशास्ते कथमशोच्या इत्यत आह।। **गतासूनिति।।** पण्डिताः ज्ञानिनः। गतासूनासन्नविनाशान्। अगतासूनिवेत्युपमार्थश्चकारः। जीवत इव तान्नानुशोचन्ति यतोऽतो न शोच्यास्त इति तानन्वशोचस्त्वमित्यर्थः।। ११।।

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्।। १२।।

ननु कुतो न शोचन्ति कुतश्च मदीया वादाः प्राज्ञमतविरुद्धा इति। "दृष्ट्वेमं स्वजनं कृष्णे" त्यादिनोपपत्तेरुक्तत्वादिति चेत्। तत्किं तेषां जीवनाशात्तव शोक उत देहनाशात्। अथ देहान्यात्मनोऽभावात्तद्देहनाश एव तन्नाश इति। नाद्यः। जीवानामनादिनित्यत्वादित्याह **न त्वेवेति।।** जातु कदाऽपि। अहं न नासं नासमिति न। किं त्वासमेव। त्वं न नासीः। विपरिणामेन क्रियान्वयः। अपि त्वासीरेव। इमे जनाधिपाश्च न नासन् आसन्नेव। अहं यूयं च वयं सर्वे एव अतः परं अनन्तरकाले न न भविष्यामः। किंतु भविष्याम एव। अत्र पूर्वोत्तरार्धाभ्यां कालद्वयसम्बन्धोक्त्याऽनादित्वं नित्यत्वं चोक्तम्। वर्तमानकालसम्बन्धस्तु स्फुटत्वान्नोक्तः। "द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत" इति न्यायेन नञ् द्वयप्रयोगादेवावधारणसिद्धौ पुनस्तदुक्तिः "नित्यो नित्यानां" (काठक २-५-१३)। "स्वदेहयोगविगमौ नाम जन्ममृती पुरा। इष्येते ह्येव जीवस्य मुक्तेर्न तु हरेः क्वचित्।।" इति श्रुतिस्मृतिप्रसिद्धिद्योतनार्था च शब्दोऽनादित्वेन सह नित्यत्वस्य समुच्चयार्थः। तुशब्दस्तु स्मृत्युक्तदिशा ईश्वरस्येतरेषामिव देहतोऽप्युत्पत्तिनाशौ नेति विशेषार्थः। तदाह "ॐ असम्भवस्तु सतोऽनुपपत्तेः ॐ" (२-३-९)। "ॐ नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॐ" (२-३-१७), इति सूत्राभ्याम्। तत्राणुभाष्यमपि "सोऽनुत्पत्तिलय" इति। ये तु कृष्णस्येश्वरत्वमनादित्वं च न जानन्ति तान्प्रति यथा श्रुतैवोक्तयोजना। ये तु तज्ज्ञात्वा जीवानादिनित्यतामेव न

जानन्ति तान् प्रति तु यथैवंपदयोरध्याहारेण दृष्टान्तदार्ष्टान्तिकभावेन यथाऽहं न नासमनादितोऽवर्ते। एवं त्वमेते च सर्वे यूयं न नासुः अनादितोऽवर्तध्वमिति योजना। अत्रैतौ प्रयोगावभिमतौ कृष्णत्वदादिचेतना न नाशवन्तः भावत्वे सत्यनादित्वात्। "नासत" इति श्लोके वक्ष्यमाणप्रकृत्यादिवदिति। द्वितीययोजनायां तु त्वदादयो जनाधिपा न नाशवन्तः चेतनत्वे सत्यनादित्वात्। कृष्णवदिति। स्वरूपासिद्धिस्तु देहिन इत्यत्र निरसिष्यते। न च साधनवैकल्यम्। नित्यो नित्यानां इति श्रुतेः। तत्रानादित्वस्याप्युपलक्षणात्। एवं चैवमनादिनित्या जीवाः कथं नाम शोच्याः, अनादिनित्यजीवानां नाशभीत्या "न योत्स्य" इत्यादित्वदीया वादाः कथं नाम प्राज्ञमतविरुद्धा न भवेयुरिति भावः।।१२।।

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।। १३।।

देहनाशभयादिति द्वितीयपक्षं निराह **देहिन इति**।। देहिनः देहवतो जीवस्य अस्मिन्निदानीं वर्तमाने स्थूलदेहे कौमारं यौवनं जरा च यथा प्राप्नोति तथा देहान्तरप्राप्तिः। अयं भावः। कौमारावस्थाविशिष्टदेहहाने यौवनावस्थाविशिष्टदेहहाने च शोकस्तावन्नास्तीति प्रसिद्धम्। तत्कुत इति वाच्यम्। जरादिविशिष्टदेहान्तरलाभात्। समानलाभेन हानिर्हि समाधीयत इति चेत्। मृतावपि शोको न कार्यः देहान्तरलाभादेव। यदा तु जीर्णदेहलाभेन समीचीनयौवनदेहहानेः प्रतिनिधिः, तदा सुतरां समीचीनदेहान्तरलाभेन जीर्णदेहहानेरिति। अतो धीरः बुद्धिमांस्तत्र देहनाशविषये न मुह्यति न मोहं प्राप्नोति। एतेषां देहाः नश्यन्तीति शोकं न प्राप्नोतीत्यर्थः। तत्रावस्थामात्रहानिः, अत्रावस्थावतोऽपीति वैषम्यमनुपयुक्तम्। निष्कदानेन पटग्रहणदृष्टेरिति। अत्र देहिन इत्युक्त्या देहवतो जीवस्यैव न तु देहदेहिभेदहीनस्य हरेर्जराद्यवस्था देहान्तरावाप्तिर्वेति सूचितम्। देहान्यजीव एव नास्ति। एवं च त्वदादयो जनाधिपा नित्याः अनादिनित्यत्वादिति प्रागुक्तप्रयोगे देहपक्षीकारे असिद्धिबाधौ जीवपक्षीकारे आश्रयासिद्धिरिति तृतीयपक्षमाशङ्क्य परिहरति।। **देहिन इति**।। अत्र कौमारादिविषयेण तदनुभवो विषयी लक्ष्यते। देहिन इत्यस्य देहादन्यस्येत्यर्थः। देहोऽस्यास्तीत्यर्थे मतुबर्थेनिप्रत्ययविधानात्। एकवचनादेकस्येत्यपि लभ्यते। देहान्तरशब्दोऽत्रानेकदेहपरः। तथा चायमर्थः। अस्मिन्देहे कौमारं कौमारानुसन्धानम्, यौवनं यौवनानुसन्धानम्, जरा जरानुसन्धानम्, योऽहं कौमारशरीरवानभूवं स इदानीं युवशरीरवान्वर्ते, योऽहं युवशरीरवानभूवं स इदानीं जीर्णशरीरवान्वर्ते इत्येवंरूपेण तावदस्ति। तच्च देहिनो देहवतो देहा-

न्यस्येति यावत्। देहशब्दोऽत्र देहेन्द्रियान्तःकरणसङ्घातपरः। देहेन्द्रियान्तःकरणेभ्योऽन्यस्य चेतनस्य भवति। देहादेर्जडत्वेनानुसन्धानकर्तृत्वायोगात्। एवं च देहेन्द्रियादितोऽतिरिक्तजीवसिद्धिः। तथा चैकवचनबलादेकस्यैव देहादन्यस्य कौमाराद्यनेकदेहानुसन्धानं यथा तथा देहान्तरप्राप्तिरनेकदेहप्राप्तिर्देहिनो देहादन्यस्यैकस्यैव भवतीति पूर्वार्धेन देहादन्यसिद्धिः। त्रिपाद्या चोक्तविधयाऽनेकदेहप्राप्तिमान्सिद्ध इति देहादन्यजीवपक्षीकारे नाश्रयासिद्धिः। प्रत्यग्रजातस्य शिशोराहाराद्यभिलाषेण पूर्वपूर्वतरदेहानुसन्धानेन सिद्धानेकदेहानुगत्याऽनादित्वसिद्धेर्न हेतोः स्वरूपासिद्धिरिति भावः। ननु देहाद्यन्यतमस्यैवास्त्वनुसन्धानम्। चार्वाकाद्युक्ततर्कबलादित्यत आह **धीर इति**।। बुद्धिमांस्तत्र देहादन्यात्मविषये न मुह्यति। देहादीनां जडत्वकरणत्वादिना कर्तृत्वायोग इत्यादिरूपेण ते तर्का निरस्या इति भावः।। १३।।

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत।। १४।।

सत्यमेव तत्सर्वं भवदुक्तम्। उक्तविधयाऽऽत्महानेरभावात्, देहहानावपि समीचीनदेहान्तररूपप्रतिनिधिलाभात्, बान्धवानां हानिर्भविष्यतीति धिया शोको न युक्त इति। तथाऽपि तन्मृतौ ममैव सुखहानिर्दुःखप्राप्तिश्च स्यात्। तद्देहदर्शनस्पर्शनसम्भाषणादेः सुखहेतोरभावात्। छेदभेदादिना विकृततद्देहदर्शनस्य दुःखहेतोर्भावादित्यत आह **मात्रेति**।। मीयन्त इति मात्राः। माङ्मान इत्यतः कर्मणि त्रप्रत्ययः। स्त्रीत्वं शब्दस्वाभाव्यात्। ज्ञानविषयाः गन्धरसरूपस्पर्शशब्दाः, तेषां स्पर्शाः सम्बन्धाः। शीतोष्णशब्दौ शीतस्पर्शोष्णस्पर्शवाचकौ लक्षणया गन्धरसरूपस्पर्शशब्दाख्यसर्वविषयपरौ भूत्वा तदनुभवलक्षकौ। लाक्षणिकोक्तिकृत्यमग्रे व्यक्तम्। गन्धरसरूपस्पर्शशब्दाख्यविषयाणां घ्राणरसनचक्षुस्त्वक्श्रोत्ररूपेन्द्रियैः यथाक्रमं ये सन्निकर्षास्ते मात्रास्पर्शाः शीतोष्णसुखदुःखदाः। सुगन्धसुरससुरूपसुस्पर्शसुशब्दविषयकसाक्षात्काररूपानुभवजननद्वाराऽऽत्मनः सुखप्रदाः। अनिष्टगन्धरसादिविषयकसाक्षात्कारजननद्वारा दुःखप्रदाः। तेषां मृतौ च तन्निमित्तसुखदुःखहानिप्राप्ती भवत इति किल कौन्तेय तवाशय इति पार्थहार्दमनूद्य भगवान्कृष्णः काकुस्वरशिरस्कतुशब्देनावधारणार्थकेन निराचष्टे। हे कौन्तेय, मात्रास्पर्शा एव, गन्धादिविषयेन्द्रियसन्निकर्षा एव। इष्टानिष्टस्वविषयसाक्षात्कारद्वारा सुखदुःखदाः किमिति काकुस्वरेणाक्षेपः। केवलं तन्मात्रा एव न भवन्ति। किन्तु विषयेषु शोभनाध्यासनिमित्तस्नेहरूपेण वा अरित्वादिभ्रमहेतुकद्वेषरूपेण वा देहेन्द्रियान्तःकरणेषु ममताऽतिशयहेतुकाविवेकरूपेण वाऽभिमानेन सहिता

एव तथेत्यर्थः। कुत एवं तन्मात्रा एव स्वस्वविषयानुभवद्वारा सुखदुःखहेतवो भवन्त्वित्यत आह— **आगमेति**।। यत इति शेषो वा हेतुगर्भविशेषणं वा। एतच्चागमापायित्वं शीतोष्णसुखदुःखदाः मात्रास्पर्शा आगमापायिन इत्येवं स्वस्वविषयकधीद्वारा सुखदुःखदत्वविशिष्टमात्रास्पर्शानां विशेषणम्, "सविशेषणे हि विधिनिषेधौ विशेष्ये बाधाद्विशेषणमुपसंक्रामत" इति न्यायात्, मात्रास्पर्शानां स्वस्वविषयकधीद्वारा यत्सुखदुःखदत्वं तस्यागमापायित्वादिति सुखादिदत्वरूपविशेषणमुपसंक्रामति। सुप्त्यादौ श्रीचन्दनाग्निकणादिशीतोष्णस्पर्शसम्बन्धे अविनाभूतमनस्सम्बन्धात्मसन्निकृष्टत्वगिन्द्रियस्य सत्वेऽपि स्वविषयानुभवद्वारा सुखदुःखादिदत्वस्यादर्शनात्। जाग्रद्दशायामभिमानसत्वे एव तद्दर्शनात्। अन्वयव्यतिरेकाभ्यामभिमानसहिता एव मात्रास्पर्शाः स्वस्वविषयधीद्वारा सुखदुःखादिदाः न तु केवला इति भावः। सुप्तावन्येन्द्रियाणामुपरमेऽपि त्वगिन्द्रियस्य नोपरमः। तस्य तदाऽपि विषयसन्निकर्षोऽस्तीतिज्ञापनायैव इतरविषयलाक्षणिकशीतोष्णपदप्रयोगः। आगमापायित्वं चात्र गङ्गोदकस्येव प्रवाहतो नित्यत्वेऽपि व्यक्तिरूपेणानित्यत्वं न विवक्षितम्। मात्रास्पर्शानां सुखादिदत्वेन तदयोगात्। तथात्वे सुप्त्यादौ सत्वेनाभिमानस्य प्रकृतान्वयव्यतिरेकोक्त्ययोगात्। अर्जुनस्याभिमाननिवर्तनबोधानुपयोगाच्च। किन्तु किंशुककुसुमानामिव प्रवाहतोऽपि विच्छिद्यमानत्वम्। सुप्तिमूर्छाऽसंप्रज्ञातसमाधिषु विच्छेदेन प्रवाहविच्छेदसम्भवात्। तस्य प्रकृतोपयोगाच्चेति भावेन आगमापायित्वं व्यनक्ति— **अनित्या इति**।। शीतोष्णसुखदुःखदाः मात्रास्पर्शा अनित्याः प्रवाहतोऽप्यनित्याः। तेषां सुखादिदत्वं प्रवाहतोऽप्यनित्यं यतोऽतोऽन्वयव्यतिरेकाभ्यामभिमानयुता एव सुखादिदा इत्यर्थः। अत इति शेषः। अभिमानहीनमात्रास्पर्शानां सुखादिदत्वाभावात्। अभिमानत्यागेन तान्मात्रास्पर्शांस्तितिक्षस्व विफलीकुरु। सुखदुःखादिना यथा न भवन्ति तथा कुरु। न ह्यभिमानं विना कृतो मात्रास्पर्शरूपः सामग्र्येकदेशः सुखादिदाने शक्तो भवतीति भावः।। १४।।

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते।। १५।।

ननु दुःखाभावस्य युद्धाकरणेऽपि सम्भवात्किं तत्कृत्वा दुःखाभावायाभिमानत्यागेनेत्याशङ्क्य देहाद्यभिमानत्यागेन भवन् दुःखाभावः स्वयं फलरूपोऽपि परमपुमर्थहेतुश्च भवतीत्याह—यं हीति।। हे पुरुषर्षभ पुरुषश्रेष्ठ पार्थ। एते मात्रास्पर्शाः विषयेन्द्रियसन्निकर्षाः पुरुषं पुरं देहं सरति गच्छति सृगतौ प्रत्यक्षतो जानाति। उपपदान्तस्योकारः। सरतेर्डप्रत्ययः। षत्वम्। शरीरदर्शनवन्तम्। यद्वा पुरु पूर्णं ब्रह्म। तत्सरत्य-

वगच्छतीति ब्रह्मज्ञानी तम्। धीरं सुखे दुःखे च प्राप्ते सति तत्कार्ययोरुत्सेकविषादयोः स्तम्भकप्रयत्नवन्तं, अत एव समदुःखसुखम्। अनुपादेयत्वेन धर्मेण दुःखेन समं सुखं यस्य स तथा तम्। दुःखं यथाऽपुमर्थत्वहेतुनाऽनुपादेयं वैषयिकं सुखमपि अमृतत्व-विरोधित्वादनुपादेयं यस्य स समदुःखसुखः। दुःखसमसुखमिति यावत्। अत एव यं अभिमानहीनं जीवं स्त्रीजनं पुंजनं वा न व्यथयन्ति न चालयन्ति सुखदुःखकृतोच्चत्व-नीचत्वलक्षणविकारं न प्रापयन्ति। सोऽधिकारी अमृतत्वाय मुक्तये कल्पते समर्थो भवति। अत्र धीरमिति समदुःखसुखत्वे हेतुः। तच्चाभिमानत्यागे हेतुः। समदुःखसुखो जीवः सुखहेतुषु शोभनाध्यासलक्षणाभिमानवांस्तद्विरोधिषु द्वेषरूपाभिमानवांश्च कथं भवेदिति। सुप्त्यादौ पामराणामपि अभिमानाभावेन व्यथाभावादमृतत्वप्रसक्तिरिति शङ्काव्यावृत्तये पुरुषं शरीरदर्शनवन्तमित्युक्तम्। तथा व्यथाभावमात्रेण कथममृतत्वं, "तमेवं विद्वान्" (तै. आ. ३-१२-७) इत्यादि श्रुतिविरोधादित्यपि शङ्काऽपनुत्तये पुरुषं ब्रह्मज्ञानिनमित्युक्तम्। "पुरु ब्रह्म गुणाधिक्यात्तज्ज्ञानात्पुरुषः स्मृत" इत्युक्तेः। अत्र नरहरितीर्थीये "ब्रह्मा निरभिमानित्वादि" ति स्मृतिमुदाहृत्य चतुर्मुखादन्येषाम्अ-तिव्यथाराहित्यमेव लिङ्गभङ्गात्प्राग्देहाद्यभिमानाभावादित्युक्तम्।। १५।।

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभिः।। १६।।

ननु "पापमेवाश्रयेदस्मान्हत्वैतानाततायिन" इत्यादिना बन्धुहननादिरूप-युद्धात्परलोकदुःखं शोकहेतुतयोक्तम्। अतः शोक इत्यत आह– **नासत इति।।** अत्र सदसच्छब्दौ साध्वसाधुकर्मपरौ। भावाभावशब्दौ सुखदुःखवाचकौ। "सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते। प्रशस्ते कर्मणि तथा" (गी० १७-२६) इत्यादेः। "सद्भाव-वाचिनः शब्दाः सर्वे ते सुखवाचिन" इत्यादेः। असतो दुष्कर्मणः सकाशात् भावः सुखं नास्ति। यथेति दृष्टान्ततयाऽस्योपयोगः। सतः साधुकर्मणः सकाशादभावो दुःखं नास्ति। एतच्च युद्धं नारायणद्विट्तदनुबन्धिनिग्रहरूपत्वेन सत्कर्मत्वान्न परलोकदुःखहे-तुः। प्रत्युत सुखहेतुरेवेति भावः। किमत्र प्रमाणमित्यत आह– **उभयोरपीति।।** अन्तो निर्णयः पूर्वार्धोक्तार्थस्यावधारणम्। अन्यदर्शनस्यान्यान् प्रत्यप्रत्यायकत्वाद्दर्शनमूलः सम्प्रदायोऽत्र लक्ष्यते। उभयोरप्यनयोः सदसत्कर्मणोः दुःखसुखे यथाक्रमं न विद्येते इत्यर्थयोरपि तत्त्वदर्शिभिः अन्तस्तु सम्प्रदायस्तु प्रमाणतया दृष्ट इति वा दृष्टस्तु दृष्ट एवेति वा तुशब्दान्वयः। सत्कर्मणो दुःखं नास्ति, असत्कर्मणः सुखं वा नास्तीत्यन-योरर्थयोर्निर्णायकोपदेशपरम्परारूपसम्प्रदायो महात्मभिर्दृष्ट एवेत्यर्थः। नन्वनादित्वहेतु-

नाऽहमपि पक्षे निक्षिप्य नित्यत्वेनानुमातव्य इति यदुक्तं त्वया स त्वयुक्तः पक्षः। दृष्टान्ताभावेन व्याप्तिग्रहासम्भवात्। अन्यस्यानादिनित्यस्य मानाभावेनाभावादित्यतोऽन्यदप्यनादिनित्यमेतदप्यनेनोच्यते।। **नासत इति।।** असतः कारणस्य प्रकृतेरभावः प्रागभावः प्रध्वंसश्च न विद्यते नास्ति। तथा सतो ब्रह्मणश्चाभावो द्विरूपोऽभावः न विद्यते। अत्रासतः सतश्चाभावो न विद्यत इत्येकवाक्ये सम्भवति वाक्यद्वयग्रहणं न विद्यते। प्रागुक्तानादित्वानुमाने व्याप्तिसद्भावे आदरसूचनार्थम्। अत एवाग्रेऽविनाशित्वित्यादिना व्याप्तिग्रहणस्थलमनेकं दर्शयति। अत्र व्याप्तिस्थलप्रदर्शनार्थं नासतो विद्यते भाव इत्येतावदेव वाच्यम्। तथाऽपि प्रागुक्तद्वितीयप्रयोगे कृष्णो दृष्टान्तितः। तत्र साध्यसाधनानुगतिसूचनाय नाभावो विद्यते सत इत्यप्युक्तिः। तथा च द्वितीयप्रयोगेऽपि व्याप्तिः सुदृढा। नन्वन्यस्यानादिनित्यत्वे माना (भावात्) भाव इत्युक्तमित्यत आह।। **उभयोरपीति।** सदसतोरनादिनित्ययोरन्तस्तु निर्णयभूतपरम्परोपदेशलक्षणसम्प्रदायस्त्वित्यर्थः। तत्त्वदर्शिभिर्दृष्ट इत्यर्थः। नरहरितीर्थास्तु तत्त्वदर्शिभिरपीत्यपिपदं भिन्नक्रममुपेत्य "प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम" (विष्णु पु०) इत्यागमोऽत्रार्थे मानत्वेन समुच्चीयत इत्याहुः।।१६।।

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति।। १७।।

ननु "प्रकृतिः पुरुषः काल" इत्यादिवाक्यानामुपासनार्थत्वात्सम्प्रदायस्य च मूलानिश्चयात्प्रकृतिपुरुषयोः स्वरूपस्यैवासिद्धेः पुनरनुमानस्य व्याप्त्यसिद्धिरित्याशङ्क्य भगवान् किमिदानीं प्रकृत्यादिस्वरूपसाधनेन। किञ्चेदं नित्यं इदं नित्यमिति प्रत्येकमुक्तेन च। यद्देशतो अनन्तं तत्सर्वं नित्यमेवेत्येवं संग्राहकसंगृहीतं वर्णादिजीवादन्यदप्यस्ति। तद्व्याप्तिग्रहणस्थलं भविष्यतीत्याह— **अविनाशित्विति।।** येनेदं सर्वं ततं व्याप्तं तदकारादिवर्णजातम्, अव्याकृताकाशश्चेत्येवमादिसर्वम् अविनाशि तु नित्यमेवेति। तुरेवेत्यर्थः। अनादि चेत्यपि ग्राह्यम्। ननु "सुप्यजातौ णिनिस्ताच्छील्य" इति सूत्रेण सोपसर्गस्यापि च्छान्दसताच्छीलिकणिनिप्रत्ययान्ताविनाशिशब्देन स्वाभाविकविनाशाभावोक्तावपि शापेन वा बलवत्प्रयत्नादिना वा विनाशः किं न स्यादित्यत आह— **विनाशमिति।।** अस्य व्याप्तस्य वस्तुनो विनाशं ध्वंसं कश्चिदपि कर्तुं नार्हति। कुत इत्यत उक्तम्— **अव्ययस्येति।।** ह्रासहीनस्येत्यर्थः। ह्रास एव नास्ति तादृशस्य नाशं न कोऽपि कर्तुमीष्ट इति किमु वाच्यमित्यर्थः।।१७।।

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत।। १८।।

ननु "रूपं रूपं प्रतिरूपो बभूव" (काठक २-५-९) इति श्रुतेः जीवः प्रतिबिम्बः। प्रतिबिम्बश्चोपाधिकृतः प्रतिमुखमिव दर्पणोपाधिकृतम्। देह एवात्र जीवोपाधिर्नान्योऽस्ति। तथा च जीवचेतना न नित्याः नाशवद्देहोपाधिकत्वात् दर्पणोपाधिकप्रतिमुखवत्। नश्वरबिम्बोपाधिसन्निधिकत्वात् नश्वरमुखदर्पणसन्निधिकप्रतिमुखवदिति प्रतिपक्षग्रस्तमनादिनित्यत्वानुमानमित्यत आह– **अन्तवन्त इति।** एकवचन बहुवचनार्थे। शरीराणां नित्यानामिमे परिदृश्यमानाः भौतिकाः देहाः अन्तवन्तः विनाशिनः इति योजना। इम इति विशेषणादन्येऽन्तहीना अपि देहाः सन्तीति सूच्यते। त एवोपाधयो जीवानां नान्तवद्भौतिकदेहा इत्याद्यप्रतिपक्षे हेतुरसिद्धः। अत एव नित्यस्येति साध्योक्तिः। जीवाः नित्याः नित्योपाधिकत्वात् व्यतिरेकेण प्रतिमुखवदित्युक्तं भवति।नित्यस्येत्येवोक्तावीश्वरस्यापि देहोऽन्तवानिति प्राप्नोतीत्यतः शरीरिण इति विशेषणम्। द्वितीयहेतुरसिद्ध इत्याह– **अनाशिन** इति। बिम्बोपाधिसन्निधिनाशकृतनाशहीनस्य शरीरिण इत्यन्वयः। जीवाः नित्या नित्यबिम्बोपाधिसन्निधिकत्वात् व्यतिरेके प्रतिमुखवदित्युक्तं भवति। ननूपाधेर्नित्यत्वेऽपि परिच्छिन्नपरिमाणस्यैव वस्तुनो बिम्बत्वयोग्यत्वात्परिच्छिन्नयोश्च बिम्बोपाध्योः सन्निधेः दर्पणमुखसन्निधेरिव कादाचित्कत्वनियमात्कथं तस्य नित्यतेत्यत आह– **अप्रमेयस्येति।** प्रमा परिमितिः अपरिच्छिन्नस्येत्यर्थः। सर्वगतस्येति यावत्। जीवे सर्वगतत्वस्याभावादतद्भावे सामानाधिकरण्यं सारूप्यं गमयतीति 'सिंहश्चैत्र' इत्यादौ प्रसिद्धेः सर्वगतेश्वरसरूपस्येत्यर्थः। तत्प्रतिबिम्बस्येति यावत्। सर्वगतेश्वरप्रतिबिम्बस्य कथं बिम्बोपाधिसन्निधिनाशेन नाशः स्यादिति भावः। न च सर्वगतस्य प्रतिबिम्बत्वायोगः। तत्सारूप्यस्यैव प्रतिबिम्बताशब्दार्थत्वात्। तदाह सूत्रकारः। "ॐ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॐ" (२-३-३०) इति। उपसंहरति– **तस्मादिति।।** बिम्बोपाधितत्सन्निधीनां नाशाभावेन तन्नाशप्रयुक्तनाशस्य जीवचेतने अनाशङ्क्यत्वेन प्रतिपक्षानुत्थानात्, न त्वेवाहमित्यत्रोक्तानादिनित्यत्वानुमानेन जीवस्य नित्यत्वात्, जीर्णदेहहानेऽपि समीचीनदेहान्तरलाभरूपप्रतिनिधिना समाधानसम्भवात्, बन्धुदेहस्पर्शनदर्शनाद्यभावनिमित्तशोकस्य च परमपुमर्थहेत्वभिमानत्यागेन निवर्तितुं शक्यत्वात्, भगवत्पूजार्थं हे भारत युध्यस्वेति। नन्वेतदयुक्तम्। जीवेश्वरयोर्नित्यत्वाविशेषात्, कुत ईश्वरस्य पूज्यतेत्यतो वा जीवाद्धरेर्विशेषं वक्तुमविनाशित्वित्यादिश्लोकद्वयं प्रवृत्तम्। तथाहि। येन भगवता इदं जगत्

कालः गुणजातं ततं व्याप्तम्। कालतो गुणतो देशतश्च यद्विष्ण्वाख्यं ब्रह्मततिमत्तद्विष्ण्वाख्यं ब्रह्माविनाशि। तुर्विशेषे। "अनित्यत्वं देहहानिर्दुःखप्राप्तिरपूर्णता। नाशश्चतुर्विधः प्रोक्तः तदभावो हरेः सदा।।" इत्युक्तदिशा चतुर्विधनाशहीनमिति विद्धि जानीहीत्यर्थः। विनाशमित्यादि प्राग्वद् व्याख्येयम्। वर्णाकाशादेशकालाभ्यां व्याप्तत्वेऽपि न गुणतः साऽस्ति। जीवस्य कालतस्तततत्वेऽपि न देशगुणाभ्यां ततिरस्तीति हरेस्तततत्वे विशेषः। अस्त्वेवं हरेः सर्वप्रकारेण विनाशाभावः। तावता जीवादविनाशविषये को हरेर्विशेष इत्यत आह— **अन्तवन्त इति।** शरीरिणां शीर्यमाणदेहवतां संसारिणामिति यावत्। स्वरूपतो नित्यानां जीवानामिमे देहाः। अन्तवन्तो विनाशवन्तो जनिमन्तश्चेत्यपि ग्राह्यम्। संसारिदेहाः आद्यन्तवन्त इत्युक्त्या मुक्तदेहो नैवमिति लाभान्मुक्तेश्वरस्य हरेः कैमुत्यसिद्धो नित्यदेहः। एवं चोत्पत्तिविनाशवद्देहवतां च दुःखप्राप्तिरवर्जनीयैव। गुणतोऽपूर्णता व्यक्तैवेति। स्वरूपतो नित्यत्वेऽपि त्रिविधनाशवत्त्वाज्जीवस्य ततो हरेश्चतुर्विधनाशहीनस्यास्ति महान्विशेष इति तत्पूजा कार्येत्युपसंहरति— **अनाशिन इति।।** तस्माज्जीवेभ्योऽतिशयवत्त्वात्, अनाशिनश्चतुर्विधनाशहीनस्याप्रमेयस्य देशकालगुणापरिच्छिन्नस्य हरेः पूजार्थं युध्यस्वेति। किञ्च न केवलं सर्वप्रकारेणाविनाशित्वात्तत्पूजा कार्येति। किन्तु सर्वथैवाविनाशित्वात्स एव स्वतन्त्रः। ततश्च तदधीनत्वान्मुक्तेः युद्धादिस्वकर्मणाराधितश्च मोक्षं ददातीत्यतस्तत्पूजा कार्येति भावेन चोक्तमनाशिनोऽप्रमेयस्येति।। १८।।

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते।। १९।।

ननु यदुक्तं जीवचैतन्यस्य नित्यत्वं, यच्चोक्तं सर्वथैकप्रकारेणाविनाशित्वादीश्वरः स्वतन्त्रः, अनिच्छया देहनाशात्तन्निमित्तदुःखवत्त्वाच्च जीवः परतन्त्र इति, तज्जीवनित्यत्वपारतन्त्र्ये न युक्ते। हन्ताऽयमस्य हतश्चायमिति हननादिक्रियायाः, जीवे तत्र स्वातन्त्र्यस्य च प्रतीतेरित्यत आह— **य इति।** यः पुमानेनं जीवं हन्तारं जीवान्तरस्य स्वातन्त्र्येण घातकं वेत्ति, यश्चैनं केनचित्स्वातन्त्र्येण हतं मन्यते, तावुभौ जीवस्याऽनित्यत्वज्ञानी, हननादिक्रियायां जीवस्वातन्त्र्यज्ञानी चेत्युभौ न विजानीतः। जीवनित्यत्वभगवत्स्वातन्त्र्याज्ञानिनौ। भ्रान्ताविति यावत्। कुतो बाधकाद्भ्रान्तित्वकल्पनेत्यत आह— **नायमिति।।** बिम्बनित्यत्वोपाधिनित्यत्वबिम्बसन्निधिनित्यत्वानादित्वरूपोक्तहेतुभ्यो नायं हन्ति जीवम्। न हन्यते च जीवः। प्रतिबिम्बत्वादेव हेतोर्न स्वतन्त्रः सन्कश्चन हन्तीत्यर्थः। अतो बाधकाद्भ्रान्तित्वमितिभावः। अत्र हननक्रिया

जीवक्रियान्तरोपलक्षणम्। सर्वत्र तस्यास्वातन्त्र्यादिति। एनमीश्वरं जीवचेतनस्य हन्तारं यो मन्यते सोऽपि भ्रान्त एव। चेतनहननस्येश्वरेणाकरणादित्यपि योजना तात्पर्योक्ता।। १९।।

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता व न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।। २०।।

यदुक्तं जीवेश्वरयोरुत्पत्तिविनाशराहित्यं, ईश्वरस्य देहतोऽप्युत्पत्त्यभावेन स्वातन्त्र्यं, जीवस्य स्वरूपतो जन्मादिशून्यस्यापि देहोत्पत्त्यादिनाऽस्वातन्त्र्यं, तेष्वर्थेषु प्रमाणत्वेन मन्त्रवर्णमुदाहरति– **न जायत इति।।** तथा हि जीवविषये तावदियं योजना। अयं जीवः स्वरूपेण न जायते न म्रियते न नश्यति च। वाशब्दश्चशब्दार्थः। अग्रेतननञोऽनुकर्षः। जीवो न जायते चेत्तर्हि यथेश्वरज्ञानं वृद्धिह्रासविवर्जितं भूत्वैव कदाचिदचिन्त्यशक्त्या भूतमिव व्यवहारावलम्बनं भवति, "तदैक्षत" (छां. ६-२-३) इत्यादिश्रुतेः, तथा जीवेऽपि किं जननव्यवहारस्तन्निमित्त इत्यतो नेत्युच्यते। अयं जीवः स्वरूपेण भूत्वा कयाचिद्विवक्षया ईश्वरज्ञानवद्भविता न भवति। कुतो न जायते न म्रियते वेति स्वरूपोत्पत्तिविनाशाभावो जीवस्येत्यत उक्तम्।। अजो नित्यः शाश्वत इति। स्वरूपोत्पत्तिविनाशशून्यसदैकरूपभगवत्सरूपत्वादित्यर्थः। अतद्भावे। सामानाधिकरण्यस्य सारूप्यगमकत्वात्। अजनित्यपदाभ्यां बिम्बोत्पत्तिविनाशाभावः, शाश्वतपदेन बिम्बोपाधिसन्निधिजन्मनाशाभावश्च हेतुरुक्तो भवति। ईश्वरज्ञानवद्भूत्वा भविताऽपि चेन्न जीवः तर्हि किंनिमित्तो जननव्यवहारो जीव इत्यत उक्तम्– **पुराण इति।।** पुराणि देहान् अणति, अण पण गतौ गच्छति देहाद्देहान्तरं प्राप्नोतीति देहयोगनिमित्त इत्यर्थः। एवं तर्ह्युपाधिभूतदेहनाशात् नाशः स्यादित्यत आह– **न हन्यत इति।** अन्तवन्त इमे देहा इत्यत्रोक्तदिशा नित्योपाधेरन्यस्य भावात्, एतच्छरीर-नाशेऽपि न जीवनाश इति भावः। ईश्वरविषये तु पूर्वोत्तरार्धे ईश्वरजीवरूपविषयभेदेन योज्ये। तथा हि वाशब्दादेव पूर्वनञो म्रियते वेत्यत्रानुकर्षस्य सिद्धेः नञन्तरवैयर्थ्यात्, नायं भूत्वेत्यत्र श्रुतो नशब्दो न नञ्, किन्तु नृशब्दः। तथाचायं ना परमपुरुषः न जायते न वा म्रियते, देहयोगवियोगवान्न भवति, नित्यदेह एवेत्यर्थः। अत एव स्वरू-पानाशः कैमुत्यसिद्धः। देहोत्पत्तिविनाशयोरप्यभावेन स्वातन्त्र्यमपि सिद्धमेवेति भावः। एवं चेत्कथं तर्हि रामकृष्णादिरूपेण जननव्यवहार इत्यतः, **भूत्वा** रामकृष्णादिरूपेण सर्वदा भूत्वैव, कदाचिज्जनदृग्विषयत्वादिरूपेण भूयः **पुनर्भविता।** न तु देहयोगेनापि भविता। "किन्तु निर्दोषचैतन्यसुखां नित्यां स्वकां तनुम्। प्रदर्शयति लोकस्य

जनिरित्युच्यते हरेः।।" इति तत्त्वनिर्णयोक्तेः अयं जीवोऽप्यजो नित्यश्च। ईश्वरस्येव जीवस्याप्यनादिनित्यत्वे स्वातन्त्र्यस्यापि प्राप्तेरीश्वरादविशेषः स्यादित्यत उक्तम्– **शाश्वत इति**।। सदैकरूपः, अनाद्यनन्तकालमत्यक्तपारतन्त्र्यादिस्वभाव इत्यर्थः। कुत एतदित्यत उक्तम्– **पुराण इति**।। अनिच्छयाऽपि देहाद्देहान्तरप्राप्तिमत्त्वादिति हेतु-गर्भविशेषणमिदम्। न हि तादृशस्य स्वातन्त्र्यसम्भावनाऽपीति भावः। एतावान्गुण इत्याह– **न हन्यते हन्यमाने शरीर इति**।। २०।।

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम्।। २१।।

"य एनं" इति श्लोके जीवचैतन्यस्य हननं वा हननक्रियायां स्वातन्त्र्यं वा मन्यमानो न जानातीत्यत्र जीवचितो बिम्बोपाधिसन्निध्यनाशहेतुकनित्यत्वप्रतिबिम्त्वहे-तुकास्वातन्त्र्यरूपहेतू उक्तौ। यस्तु जीवचितो नित्यत्वं हरेः स्वातन्त्र्यं च जानाति स ज्ञानी। स्वातन्त्र्याभिमानाभावात्। हन्ताऽहमिति वा अस्यायं हन्तेति वा न जानाती-त्यज्ञानेऽभिमानाभावोऽपरो हेतुरुच्यते– **वेदेति**।। अविनाशिनं बिम्बनाशादिनिमित्त-कनाशहीनम्। मात्रास्पर्शा इत्यत्रोक्तदिशाऽभिमानकृता एव रागद्वेषसुखादिदोषाः न तु स्वत इति स्वतो दोषहीनमिति वा। दुष्टेषु नष्टशब्दप्रयोगान्नाशोऽत्र दोषो ध्येयः। नित्यं स्वाभाविकनाशहीनम्। अजमुत्पत्तिहीनम्। अव्ययं स्वरूपविकारशून्यम्। एनं जीवम्। यद्वा अविनाशिनं नित्यं स्वरूपतो नाशहीनम्। अजं जन्महीनम्। अव्ययं निर्विकार-म्। अत एव सर्वस्वतन्त्रमेनमीश्वरं यो वेद जानाति स पुरुषो ज्ञानी कथं केन प्रका-रेण कं घातयति कं वा हन्ति। घातयाम्येनमिति वा हन्म्येनमिति वा भावं न करो-तीत्यर्थः।। २१।।

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।। २२।।

पूर्वत्र पुराणपदेन जीवस्य देहाद्देहान्तरप्राप्तिरुक्ता। सा तु देहान्यनित्यजीवस्य सत्त्व एव युक्ता। कौमारं यौवनं जरा इत्यत्र देहात्मविवेकोक्तावपि कौमारादिदेहानाम-तिभिन्नत्वाभावान्न तेन देहात्मनोर्विनाशित्वाविनाशित्वलक्षणो विवेकः स्फुटमनुभवा-रूढो भवतीत्यतो दृष्टान्तान्तरेण तमुपपादयति– **वासांसीति**।। यद्वा, ईश्वरस्य देहतः स्वरूपतश्च नित्यत्वेन तद्विषये शोकाभावेऽपि जीवविषये तु स भविष्यति। जीवो नित्यस्तद्देहयोगवियोगौ कौमारादिदेहवदेवेत्युक्तावपि सर्वलोकप्रसिद्धजनिमृतिसत्त्वात्,

युद्धे च तत्प्राप्तेस्तन्निमित्तः शोक इत्यत आह– **वासांसीति**।। शरीरयोगवियोगयोः कौमारादिवच्छोककारणत्वाभावोऽङ्गीकृतश्चेत्तर्हि जनिमृती अपि न शोककारणम्। देहयोगवियोगयोरेव जनिमृतिशब्दार्थत्वादिति भावः। यद्वा, वाससो जरावत् स्वशरीरे जरादावस्वातन्त्र्यदर्शनात्सर्वत्रास्वातन्त्र्यं जीवस्य ज्ञेयमित्यनेनोच्यते। श्लोकार्थस्तु व्यक्तः।। २२।।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।। २३।।

ननु जीवचितः कालकृतस्य बिम्बनाशादिनिमित्तकृतस्य च नाशस्याभावेऽपि दक्षशिरच्छेद इव शास्त्रादिप्रबलहेतुना नाशोऽस्ति किमित्यत आह।। **नैनमिति।।** एनं देहीति प्रकृतं जीवं न क्लेदयन्ति। मृदुकरणेन शिथिलं न कुर्वन्तीत्यर्थः।। २३।।

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतस्थाणुरचलोऽयं सनातनः।। २४।।

ननु न छिन्दन्तीत्यादिलट्प्रयोगेण वर्तमानस्यैव छेदादेर्निषेधादिदानीं दृश्यमानत्वेनात्मनः प्राग्विनाशाभावेऽप्युत्तरत्र शस्त्रादिना विनाशः स्यादित्यतः छेदादियोग्यतैवात्मनो नास्तीत्याह– अच्छेद्योऽयमिति।। अयं जीवः "कृत्याः प्राङ्ण्वुल" इति सूत्रेणोक्तकृत्यसंज्ञकस्य ण्यप्रत्ययस्यअर्हे कृत्यतृचश्च" इत्यर्हार्थे छिदि दहेत्यादेर्धातोर्विधानाच्छेदनाद्यर्हो न भवतीत्यर्थः। अयमयमिति पृथग्वचनं यो यो जीवः स सर्वोऽप्येवंरूप इति प्रदर्शनाय। कुतो नार्हतेत्यत उक्तम्– नित्य इत्यादि।। सर्वगतः स्थाणुरिति पदविभागः। नित्य इति सर्वगत इत्यस्य विशेषणम्। सर्वगतपदेन सर्वगतत्वविशिष्ट उच्यते। नित्यः सर्वगतत्वविशिष्ट इत्युक्ते "सविशेषणे ही" ति न्यायेन नित्यत्वं सर्वगतत्वरूपविशेषणमुपसङ्क्रामति– नित्यं यत्सर्वगतत्वमिति। तद्वान्सर्वगत इत्यर्थः। स्थाणुरिति यत्किञ्चिन्निमित्तकृतविकारहीनः। अजो नित्यः शाश्वत इत्यत्र शाश्वतपदेन सामान्यतो विकाराभावोक्तावपीह नैमित्तिकनिषेधप्रकरणान्नैमित्तिकविकाराभावोक्त्यर्थं स्थाणुरित्युक्तम्। अतो न पुनरुक्तता। अचलः प्राकृतचलनहीनः, सनातनः वक्ष्यमाणदिशा सशब्द इत्यर्थः। 'त्वयीश्वरे ब्रह्मणि नो विरुध्यते', विज्ञानशक्तिरहमासमनन्तशक्तेः परास्य शक्तिर्विविधैव श्रूयतेइत्यादिश्रुतिस्मृतिरूपशब्दसहितः, तत्प्रतिपाद्य इति यावत्। तथा च स्थाणुत्वेऽपि हरेः "तदैक्षत" (छां० ६-२-३) इत्याद्युक्तकर्तृत्वमचिन्त्यशक्त्यैव युक्तम्। न तु पररीत्या मायावशादित्युक्तं भवति। ननु नित्य

इत्यादिविशेषणविशिष्टस्येश्वरत्वादयं जीवो नित्यः सर्वगः (गतः) स्थाणुरिति, भगवदभेदोक्तिरयुक्तेति चेत्। सत्यम्। उक्तानुपपत्तेरेवाभेदोक्तिरत्र अतद्भावे सामानाधिकरण्यं सारूप्यं गमयतीति न्यायाद्गौणी नेया, नित्यसर्वगतत्वादियुक्तभगवत्सरूपोऽयं जीव इति। उक्तगुणकेश्वरप्रतिबिम्बो जीव इति यावत्। तावता कथं छेदनाद्यनर्हो जीव इति शङ्कानिरास इति चेत्, यो यत्प्रतिबिम्बः सोऽसति विरोधे तत्समानधर्मक इति व्याप्तिबलेन जीवस्य स्थाणुत्वादीश्वरधर्मसमानधर्मप्राप्तेरिति तात्पर्यात्। अनाशिनोऽप्रमेयस्येत्यत्र अजो नित्यः शाश्वत इत्यत्र नित्य इति प्रकृतार्थे च जीवस्येश्वरप्रतिबिम्बत्वोक्तावपि न पुनरुक्तता शङ्क्या। तत्तच्छङ्कानिवर्तकत्वेन भिन्नगुणविशिष्टेश्वरप्रतिबिम्बत्वस्य तत्र तत्र कथनादिति ज्ञेयम्। ननु सयुक्तिकमच्छेद्यत्वाद्युक्त्यैव नैमित्तिकनाशशङ्कानिरासात् नैनमिति व्यर्थमिति चेत्, "प्रवृत्ते शस्त्रसंपात" इत्युक्तेः प्रसक्तौ सत्यामपि वर्तमानस्य छेदादेरदृष्टेरात्मनः छेदाद्ययोग्यत्वं युक्तमिति प्रदर्शनार्थत्वात्। यद्वा नैनमित्यादिश्लोक ईश्वरविषयः। तथा हि, वेदाविनाशिनमित्यत्रेश्वरस्य स्वतो नाशाभावोक्त्या तन्निमित्तशोकाभावेऽपि युद्धगतशस्त्रादिकरणविशेषेण छेदादिप्रसक्तेस्तन्निमित्तशोको ममेत्यत आह– नैनमिति।। "य एनं वेत्ती" ति श्लोके प्रकृतमीश्वरम्। शिष्टं व्यक्तम्। एतेनेश्वरस्य देहतोऽपि छेदाद्यभावात् स्वातन्त्र्यमित्युक्तं भवति। एनमेनमिति पृथक् पृथग्वचनं सर्वरूपाणामेवंभावप्रदर्शनाय। एवमव्यक्तोऽयमित्यत्रापि। ननु जीवस्य स्वतो नाशाभावेऽपि युद्धगतशस्त्रादिकरणविशेषेण छेदादिः स्यादित्यत आह– अच्छेद्योऽयमिति।। अयं जीवः। ननु जीवस्यापीश्वरवदच्छेद्यत्वादिसत्वे सर्वसाम्यं स्यात्। तथा च किं तत्पूजयेत्यतो जीवस्य नित्यमीशाधीनतामाह– नित्य इति।। सर्वगतस्थाणुरित्येकं पदम्। नित्य इति योग्यतया स्थितिरूपक्रियाविशेषणम्। "क्रियाव्ययविशेषणानां च नपुंसकत्वमेकवचनान्तत्वं च वाच्य" मित्येतन्नाश्रितम्। अयं जीवः। नित्यः नित्यं सर्वगते हरौ तिष्ठतीति नित्यः। सर्वगतस्थः। तदधीनतया सदा स्थित इति यावत्। स चासावणुश्च सर्वगतस्थाणुरित्यर्थः। ईशजीवयोः सर्वगतत्वाणुत्वरूपवैषम्यान्न सर्वसाम्यमिति भावेन सर्वगतेति अणुरिति चोक्तम्। ननु जीवस्येशाधीनत्वं यदा न स्यात्तदा स्यात्सर्वसाम्यम्। तथा च न तत्पूजा कार्येत्यत आह– अचल इति।। सर्वगतस्थपदं बुद्धिविविक्तमाकृष्यते भावप्रधानम्। सर्वगतस्थत्वान्न कदाचिच्चलतीत्यचलः। नित्यं सर्वगतस्थ इत्युक्त्यैवास्यार्थस्य लाभेऽपि केनचिद्वरादिनिमित्तेनापि न तदधीनत्वस्य नाश इति नैमित्तिकनाशाभावोक्त्यर्थमचल इत्युक्तिः। कुतः सदा हर्यधीनत्वं जीवस्येत्यत उक्तम्–सनातन इति।। नादेन विधिनिषेधरूपशब्देन सह वर्तत इति सनादः। सनाद एव सनातनः। दशब्दस्य च्छान्दसस्तनादेशः।

विधिनिषेधबद्धत्वात्सदा तदधीन इति भावः। तदुक्तं विष्णुपुराणे– 'नित्यं सर्वगते विष्णावणुर्जीवो व्यवस्थित' इत्यादि।। २४।।

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेनं विदित्वैवं नानुशोचितुमर्हसि।। २५।।

नन्वणोर्जीवस्याधारः परमात्मा सर्वगतश्चेत्कुतस्तथा न दृश्यत इत्यत आह– **अव्यक्तोऽयमिति।।** अयं सर्वगतपदेन प्रकृतो हरिः। ननु नैनमिति श्लोके देहतोऽपि छेदाद्यभावात्स्वतन्त्रो हरिरित्युक्तम्। देहवान्सर्वगतश्चेत्कथमव्यक्त इत्यतः **अचिन्त्योऽयमिति।** अचिन्त्यशक्तिक इत्यर्थः। एतेन हरेरव्यक्तत्वे तद्दर्शनश्रुत्यप्रामाण्यमिति निरस्तम्। तदाह सूत्रे– "ॐ अतोऽनन्तेन तथा हि लिङ्गं ॐ" (३-२-२७) इति। अचिन्त्यशक्तेः प्रतिबन्धे नाशे वा तस्य प्रतीतिप्रसङ्ग इत्यत उक्तम्– **अविकार्योऽयमिति।।** सा शक्तिर्न कदाऽप्यन्यथा भवतीत्यर्थः। कुत एतदच्छेद्यदेहत्वादीत्यत उक्तम्–**उच्यत इति।।** "सद्देहः सुखगन्धश्च" इत्यादितात्पर्योदाहृतश्रुतिष्वेतत्सर्वं हरेरुच्यत इत्यर्थः। अयमयमिति पृथग्वचनं सर्वरूपाणामेवं भावप्रदर्शनार्थम्। तेनायमयमव्यक्तोऽयमयमचिन्त्यो अयमयमविकार्य इतीदंशब्दो वीप्सारूपेणानेकरूपपरामर्शीति सूचितम्। नैनमित्यत्रापि पूर्वश्लोके एनमेनमिति बहुशब्दयोगेन बहुरूपपरामर्श इत्युक्तं भवति। अन्यथा नञः एनमित्यस्य च पुनः पुनरुक्तिरयुक्ता स्यादिति भावः। एवं सर्वशङ्कोद्धारेणात्मनित्यत्वं प्रतिपाद्योपसंहरति–**तस्मादिति।।** बिम्बोपाधितत्सन्निधिनाशनिमित्तस्य शापादिनिमित्तस्य शस्त्रास्त्रादिनिमित्तकस्य च नाशस्याभावेनात्मनो नित्यत्वादेनं जीवमेवं नित्यत्वादिना विदित्वा शोचितुं नार्हसीति। अथवा अस्त्वेवं भगवानेव नित्यः सर्वगतस्थाणुरित्यादावुक्तदिशा स्वतन्त्रः, ततश्च किमित्यत आह– **तस्मादिति।।** हरेरेव सर्वस्वतन्त्रत्वेनाखिलदुःखनिवृत्तिविशिष्टपुमर्थप्रदत्वात्, एवं युद्धादिस्वकर्मणाऽव्यक्तत्वादिरूपेणैनं भगवन्तं ज्ञात्वा शोचितुं संसारदुःखमनुभवितुं नार्हसि। मुक्तो भविष्यसीत्यर्थः। अत उक्तरूपेण तं ज्ञात्वा युद्धादिस्वकर्मणा तमाराध्याशेषदुःखं परिहरेति भावः।। २५।।

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि।। २६।।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।। २७।।

अस्त्वेवमात्मनो नित्यत्वं, अथाऽपि देहयोगवियोगरूपजनिमृती स्त एव। युद्धे च मृतिर्नियता। अतस्तन्निमित्तं च दुःखं मदीयानां भविष्यतीति मे शोक इत्यत आह– **अथ चेति**।। नित्यशब्दोऽत्रावधारणे। एनं जीवं नित्यजातं देहयोगरूपजनिमन्तमेव, नित्यं मृतं देहवियोगरूपमृतिमन्तमेव त्वं मन्यसे चेत्तथाऽपि हे महाबाहो! एनं जीवं शोचितुं नार्हसीत्यर्थः।। २६।।

पूर्वार्धेनार्जुनशङ्कामनूद्योत्तरार्धेन तथाऽपि त्वं न शोचितुमर्हसीत्येवोक्तम्। न तु तत्र हेतुरुक्तः। अतः शोकाभावे हेत्वाकाङ्क्षायां जन्ममरणयोर्यावन्मोक्षं नियतत्वादिति हेतूक्तिपूर्वं साध्यमाह– **जातस्येति**।। ध्रुवो नियत इत्यर्थः। मृत्युर्मृतिः। तस्माज्जन्ममृत्योर्नियतत्वादित्यर्थः।। २७।।

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिवेदना।। २८।।

एतदेव जन्ममृतिस्वरूपोक्त्या स्पष्टयति– **अव्यक्तेति**।। अव्यक्तं प्रधानमादिरुत्पत्तिकारणं येषां तान्यव्यक्तादीनि भूतानि जीवशरीराणि व्यक्तमध्यानि व्यक्तं कार्यतापत्त्यावस्थानं मध्यं जन्मनिधनान्तरालमेषां तानि व्यक्तमध्यानि, अव्यक्ते प्रधाने निधनं लयो येषां तानि अव्यक्तनिधनान्येव। तत्र तेष्वेवंरूपेषु भूतेषु का परिवेदना कः शोक इति। यद्वा कृष्णेनैवं स्वयं युक्तीरुक्त्वा शोको न कार्य इत्युक्तम्। तत्र देहनाशस्यावंश्यंभावित्वं यदुक्तं तन्नास्माभिः साध्यं, भवतोऽपि सिद्धं तेनैव शोको न कार्य इत्याह– **अथ चेति**।। अत्र नित्यशब्दो नियतवाची। "नित्यं नियतमेव चे" ति वचनात्। अथेत्यस्य तिष्ठतु तावदयं प्राचीनो विस्तर इत्यर्थः। एनं जीवं नित्यजातं नियतजनिमन्तं नित्यं मृतं वा नियतमृतिमन्तं त्वं मन्यसे चेत्, यदि यावन्मोक्षं जीवस्य जन्ममरणे नियते इति स्वयमेव मन्यसे,तथाऽपि तावन्मात्रज्ञानेनापि एनं जीवं शोचितुं नार्हसि। जन्ममरणयोरवर्जनीयतया नियमेन प्राप्नुवतोस्त्वयैव ज्ञातत्वात्। अवर्जनीये कथं शोक इति भावः। एवं चास्मिन्नेव श्लोके शोकाभावे जनिमृतिनियमरूपो हेतुः स्पष्टमेवावगम्यत इति पुनस्तत्र हेत्वाकाङ्क्षाभावादेतद्विवरणपरे जातस्येत्यादिश्लोकद्वये जीवस्य जनिमृतिनैयत्याऽनुवादः प्रागभिप्रेतजीवास्वातन्त्र्ये च हेतुत्वेनेति का तत्र परिवेदनेत्यनन्तरं तस्माज्जीवस्य जनिमृतिनियमवत्त्वाज्जीवे शोको यथा न कार्यः तथा स्वातन्त्र्यबुद्धिश्च न कार्येति श्लोकद्वयतात्पर्यार्थो ज्ञेयः।। २८।।

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित्।। २९।।

तर्हि कुत्र सा कार्या नैनमित्यादौ सा बुद्धिर्भगवति कार्येत्युक्तावपि सा किं भगवत्येव कार्या, अथ ततोऽन्यत्रापि क्वचिदित्याशङ्कां वतिप्रत्ययप्रयोगबलेन परिहरन् भगवत्स्वातन्त्र्यं प्रागुक्तमुपसंहरति– **आश्चर्यवदिति**।। कश्चित्सात्त्विकप्रकृतिः एनमव्यक्त इत्यत्र प्रकृतमेनमीश्वरमाश्चर्यवत्पश्यति। आश्चर्यत्वेन सर्वस्वतन्त्रत्वेन सन्तमेव तमाश्चर्यवत्स्वतन्त्रवद्यथा भवति तथा पश्यतीति क्रियाविशेषणम्। गगनं गगनाकारमित्यादिवत्। आश्चर्यभूतस्य हरेरेवाश्चर्यवदिति स्वोपमामुखेन हरेरितरस्य स्वातन्त्र्याभावज्ञापनायाश्चर्यवदिति वत्यन्तोक्तिः। अन्यश्च तथैव द्रष्टृवदेव आश्चर्यत्वेन सन्तमेनमाश्चर्यवद्यथा भवति तथा वदति। सागरं सागरोपममितिवदन्यदाश्चर्यवस्तु नेति ज्ञापनाय स्वोपमत्वेन वक्तीत्यर्थः। अन्यश्च सत्त्विकः आश्चर्यत्वेन सन्तमेनं हरिं आश्चर्यवद्यथा भवति तथा रामरावणयोर्युद्धं रामरावणयोरिवेतिवत्, अन्यदाश्चर्यतया श्रोतव्यं वस्तु नेति ज्ञापनाय स्वोपमत्वे शृणोति। कश्चिच्च सात्त्विक एनमाश्चर्यतया सन्तं हरिं श्रुत्वाऽपि नैव वेद। अत्यद्भुतवस्तुत्वादिति भावः। ईश्वरस्य सर्वान्प्रत्याश्चर्यत्वेऽपि विपरीतदर्शिनामसुरादीनां बहूनां भावात्, यथावद्दर्शी यथावद्वादी च कश्चिद् कश्चिदेवेति ज्ञापनाय कश्चिदित्याद्युक्तिः। यद्वोपसंहारपरोत्तरश्लोकोपयुक्तत्वेनाप्रमेयस्येत्यादिना प्राङ्महिमोक्तावपि पुनर्महिमान्तरमाह– **आश्चर्यवदिति**।। वतिरत्र एवकारार्थः। एनं पूर्वत्र प्रकृतं जीवं, यः कश्चिदजादिलक्षणेश्वरसरूपत्वतदधीनत्वादिना पश्यति स पुमानाश्चर्यवत्। आश्चर्य एव। उक्तरूपेणैनं जीवं वदन् शृण्वंश्चाश्चर्य एव दुर्लभ एवेत्यर्थः। सर्वेषामप्यहमित्यात्मदर्शनादिभावात् दर्शनादिमान्कथं दुर्लभ इत्यत उक्तमुपपादयति– **श्रुत्वेति**। दृष्ट्वा उक्त्वेत्यपि ग्राह्यम्। सामान्यतो दर्शनादौ सत्यप्युक्तरूपेण सम्यक् न वेदेति सम्यग्ज्ञानी दुर्लभ इत्यर्थः। प्रतिबिम्बभूतजीवस्यापि सम्यग्ज्ञानी दुर्लभः। किमीश्वरसामर्थ्यं वर्णनीयमितीश्वरसामर्थ्योक्तिर्ध्येया (ज्ञेया)।। २९।।

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि।। ३०।।

यदेतज्जीवस्य न त्वं नेम इत्यादिना नित्यत्वमुक्तं, तत्स्वाभाविकत्वान्नेशाधीनम्। तथा च सर्वं परमेश्वराधीनं स एव सर्वस्वतन्त्र इत्युक्तमतस्तद्विरोध इत्यतः तदपि "द्रव्यं कर्म च" इत्यादेरीश्वरायत्तमित्याह– **देहीति**।। सर्वस्य देहिनः, देहे स्थूलदेहे सूक्ष्मलिङ्गदेहे चिद्रूपस्वरूपदेहे च, अयं पूर्वप्रकृतो हरिः रक्षकत्वेन तिष्ठति। अतो देही जीवो नित्यमवध्यः। हे भारत, तस्माद्रक्षकतया स्थितत्वेन नित्यमवध्यत्वात्सर्वाणि भूतानि त्वं शोचितुं नार्हसीत्यर्थः।।३०।।

(यद्वा) देहयोगवियोगयोर्नियतत्वादात्मनश्चेश्वरसरूपत्वाद्विम्बनाशादिनिमित्त-नाशाभावान्न शोकः कार्य इत्युपसंहरति– **देहीति**।। प्राग्वदेव पूर्वार्धस्यार्थः। तस्मादित्यस्य तु देहयोगवियोगयोरवर्जनीयत्वादात्मनश्चेश्वरसरूपत्वेन सर्वथैवानाशादित्यर्थः। भगवत्सरूपत्वेऽप्यनाशः कुत इत्यतोऽतिसमर्थो भगवानिति तत्सामर्थ्यं प्रागुक्तमिति तस्य तदुपसंहारोपयुक्तता ध्येयेति।। ३०।।

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते।। ३१।।

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्।। ३२।।

यदुक्तं प्राक् वेपथुश्च शरीरे मे रोमहर्षश्च जायत इति तत्राह– **स्वधर्ममिति**।। यद्वा न केवलमात्मनित्यत्वादशोकः। किं तर्हीत्यत आह– **स्वधर्ममिति**।। न केवलमात्मनोऽविनाशादेवाविकम्पः। स्वधर्ममप्यवेक्ष्य विकम्पितुं शरीरे कम्पं सर्वावयवचेष्टां कर्तुं नार्हसीत्यर्थः। यच्चोक्तं "न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहव" इति तत्राह– **धर्म्यादिति**।। परलोकसुखहेतुर्धर्मः, तत्सम्बन्धि तज्जनकमिति यावत्। यद्वा धारकत्वाद्धर्मो हरिः, तत्पूजारूपं यत्तद्धर्म्यं तस्माद्युद्धादन्यच्छ्रेयः क्षत्रियस्य न विद्यते हि प्रसिद्धमेतत्।। ३१।।

किञ्च स्वयमेव महति श्रेयसि प्राप्ते विकम्पोऽनुचित इत्याह– **यदृच्छयेति**।। यदृच्छयाऽप्रयत्नेनोपपन्नं प्राप्तम्। "यदृच्छा हि तदिच्छा स्यात्" इत्युक्तेरीश्वरेच्छाप्राप्तमिति वा। अपावृतमपगतावरणं स्वर्गद्वारं च पारत्रिकसुखसाधनमिति यावत्। ईदृशं भगवत्पूजात्वेन स्वधर्मत्वेन स्थितं युद्धं सुखिनः सुखहेतुपुण्यवन्तः क्षत्रियाः, हे पार्थ, लभन्ते प्राप्नुवन्ति। यद्वा ईदृशं युद्धं ये क्षत्रियाः लभन्ते ते सुखिन इत्यर्थः। तेन स्वजनं हि कथं हत्वा सुखिनः स्याम इति निरस्तम्।। ३२।।

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि।। ३३।।

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते।। ३४।।

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्।। ३५।।

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्।। ३६।।

युद्धाकरणेऽनर्थप्राप्त्युक्त्या च तत्कर्तव्यतामाह— **अथ चेदित्यादिचतुर्भिः**। अथ चेत् यदृच्छया पारत्रिकसुखहेतुत्वेन च प्राप्तमपि। धर्म्यं प्राग्वत्। इमं सङ्ग्रामं युद्धं न करिष्यसि न कुर्याः। तर्हि ततः स्वधर्मभूतयुद्धाकरणात् न केवलं धर्मकीर्त्योर्हानिः स्वविहितधर्मत्यागात्पापं चावाप्स्यसि।। ३३।।

अपकीर्तिं चावाप्स्यसीत्याह— **अकीर्तिं चेति**।। अपि चाकीर्तिं अपकीर्तिम्। अव्ययां शाश्वतीम्। अस्तु को दोष इत्यत आह— **सम्भावितस्येति**।। लोके बहुमतस्य, अतिरिच्यते अधिका भवति।। ३४।।

दयालुत्वान्निवृत्तोऽयमिति कीर्तिमेव कथयिष्यन्तीत्यत आह— **भयादिति**।। मंस्यन्ते ज्ञास्यन्ते। महारथस्वरूपमुक्तं पूर्वाध्याये। मन्यन्तां ते, ततः का हानिरित्यत आह— **येषामिति**।। येषां महारथानां त्वं बहुमतो भूत्वाऽसीः तेषां पुरत एव लाघवं यास्यसीत्यर्थः।। ३५।।

न केवलं लाघवप्राप्तिः। तवाहिताः शत्रवः अवाच्यवादान्वचनानर्हशब्दान्बहून्वदिष्यन्ति। अतः शत्रुकृन्निन्दादिश्रवणात् दुःखतरं अतिशयितदुःखं किं नु? न किमपीत्यर्थः।। ३६।।

हतो वा प्राप्स्यसि (से) स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः।। ३७।।

यच्चोक्तं 'न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः' इति जयः सन्दिग्ध इति, पक्षद्वयेऽप्यहानिरित्याह— **हतो वेति**।। जित्वा वा भोक्ष्यसे महीमित्यत्र स्वर्गं च पश्चात्प्राप्स्यसीत्यपि ध्येयम्। 'ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः। ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात्' इति श्रुतौ ये शूराः प्रधनेषु युद्धेषु युध्यन्ते। ये च तत्र म्रियन्ते ये च सहस्रसंख्याकदक्षिणादातारः तानेवाऽयं प्रेतोऽपि गच्छतादिति यमं प्रति प्रेतस्य स्वर्गप्रार्थनात्। तत्र च ये युध्यन्ते तान्प्रेतो गच्छतादिति युद्धशूराणां जयेऽपि स्वर्गप्राप्तेरत्र श्रुतावनगमात्। तस्मात्पक्षद्वयेऽपि फलभावाद्युद्धाय कृतनिश्चयः सन्नुत्तिष्ठ सन्नद्धो भवेत्यर्थः।।३७।।

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैव पापमवाप्स्यसि।। ३८।।

यच्चोक्तं "पापमेवाश्रयेदस्मान्" इति तत्राह– **सुखेति**।। यथा दुःखमनुपादेयं तथा वैषयिकसुखमप्यनुपादेयमित्यनुपादेयत्वेन दुःखसमं सुखं कृत्वेत्यर्थः। लाभालाभावित्यादावपि समावित्यनुषङ्गः। अनुपादेयत्वेनालाभसमं लाभं कृत्वेत्यर्थः। जयाजयावित्यत्राप्येवमर्थो ध्येयः। सुखाद्यभिलाषं हित्वा भगवत्पूजारूपोऽयं स्वधर्म इति बुध्वेति यावत्। युद्धाय युज्यस्य युङ्क्ष्व। ततो भगवद्भक्तिपूर्वकं स्वधर्मतयाऽनुष्ठानात्पापं नैवाप्स्यसि। प्रत्युत पुण्यमेवाप्स्यसीत्यर्थः।। ३८।।

एषा तेऽभिहिता सांख्ये बुद्धिर्योगेत्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि।। ३९।।

'न त्वेवे' त्यादिग्रन्थोक्तार्थोपसंहारपूर्वकं तत्सङ्गतत्वेनोत्तरप्रकरणारम्भं प्रतिजानीते– **एषेति**।। अत्र सांख्यशब्दो जीवेश्वरज्ञानपरः। 'न त्वं नेम' इत्यादिना जीवस्य प्राधान्येन, तादर्थ्येन न त्वेवाहमित्यादिनेश्वरस्येति द्वयोरपि प्रकृतत्वात्। बुद्धिशब्दश्च बुध्यतेऽनयेति करणव्युत्पत्त्या बोधजनकवाक्यपरः। योगशब्दश्च युज्यते प्राप्यते फलमनेनेति करणव्युत्पत्त्योपायपरः। अयमर्थः– हे पार्थ, सांख्ये जीवेश्वरस्वरूपज्ञानविषये तज्जननार्थ(तज्ज्ञानार्थ)मिति यावत्। एषा न त्वेवाहमित्यारभ्य देही नित्यमवध्य इत्यन्ता। बुद्धिः। योगे तज्ज्ञानहेतूपायविषये तु, उपायज्ञानार्थमिति यावत्। इमां 'त्रैगुण्यविषया' इत्यादिनाऽऽषष्ठसमाप्ति वक्ष्यमाणां बुद्धिं उपायबोधजनिकां वाचं वाक्यानीति यावत्। शृणु। श्रवणमात्रस्य विधिना विनापि सम्भवाच्छ्रुत्वा तत्र निष्ठां कुर्वित्यर्थः। अत्र वागभिहितेति यौगिकबुद्धिपदेन तदुक्तिर्नाविशदं वाङ्मात्रमुक्तम्। किन्तु तदवबोधो यथोत्पद्येत तथोक्तमिति ज्ञापनायेति ध्येयम्। आदरजननाय योगं प्रशंसति– **बुद्ध्येत्यादिसार्धश्लोकेन**।। यया मद्वाग्जन्यया बुद्ध्या ज्ञानोपायबुद्ध्या युक्तः सन् तदनुष्ठानद्वारा ब्रह्मसाक्षात्कारातिशयं प्राप्य कर्मबन्धं संसारं निःशेषतः प्रहास्यसि मुक्तो भविष्यसि।। ३९।।

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्।। ४०।।

किञ्च इह वक्ष्यमाणे योगशब्दितज्ञानोपायभूतनिष्कामविष्ण्वाराधनरूपकर्मविषये अभिक्रमस्योपक्रमस्य नाशो नास्ति। उपक्रममात्रस्यापि निष्फलता नास्तीत्यर्थः। प्रारम्भमात्रमिच्छा वा इत्यादेः उपक्रान्तविष्णुधर्मविच्छेदे वा विष्णुधर्मवतोऽन्यधर्माकरणे वा प्रत्यवायो न विद्यते। अस्य धर्मस्य विष्णुपूजात्मकनिष्कामकर्मणः स्वल्पमपि

एकांशोऽपि महतो भयात्संसारभयात् त्रायते रक्षति। तस्मात्तत्र निष्ठां कुर्विति भावः। ननु "ज्ञानं हि जैवमुक्तमि" ति भाष्योक्तेः जीवतत्त्वं प्रागुक्तम्। ब्रह्मज्ञानोपायश्च वक्ष्यते। न हि निवृत्तकर्मानुष्ठानादिरूपो योगो जीवज्ञानहेतुः। अतः कथं पूर्वोत्तरप्रकरणयोः साध्यसाधनविषयतया सङ्गतत्वम्। मैवम्। "श्रुत्वाऽप्येनं" इत्यत्र भगवत्प्रतिबिम्बत्वादिना जीवचैतन्यवेदी दुर्लभ इत्युक्त्या तादृशत्वेन तज्ज्ञानोपायस्याप्याकाङ्क्षितत्वेन वक्ष्यमाणनिवृत्तकर्मानुष्ठानाराधितभगवत्प्रीतेरेवेश्वरतत्त्वज्ञानस्योपायत्वात्। तादर्थ्येन प्रकृतस्यापीश्वरस्य तस्मादेवं विदित्वैनम् इत्यत्र स्वातन्त्र्यादिना ज्ञानस्य मोक्षादिसर्वपुमर्थहेतुत्वोक्त्या तज्ज्ञानोपायस्याप्याकाङ्क्षितत्वात्। वक्ष्यमाणसाधनस्य च यथावत्तया परापरतत्त्वज्ञानोपायत्त्वान्न पूर्वोत्तरप्रकरणयोरसङ्गतिः। अत्र योगस्यानेकाध्यायप्रतिपाद्यत्वाच्छ्रोतृमनःसमाधानाय पूर्वसङ्गतत्वेन प्रतिज्ञाकरणसार्थक्यं ज्ञेयम्।। ४०।।

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्।। ४१।।

ननु ज्ञानोपायविषया वाचोऽन्योन्यविरुद्धा बह्व्यो मतभेदेन सन्ति। अतः कथमेकत्र त्वदीयायामेवोपायविषयवाचि निष्ठाशब्दितं विश्वासं करोमीत्यत आह— **व्यवसायेति**।। व्यवसायात्मिका प्रमाणनिर्णीतार्थनिश्चयात्मिका निश्चयजनिका बुद्धिः करणव्युत्पत्त्या वाक्। एकैव एकोपायविषयैव। इह लोके वेदे च। न तत्र विप्रतिपत्तिरस्ति। स एव वैष्णवधर्मानुष्ठानहेतुः। अव्यवसायिनां प्रमाणनिर्णीतार्थनिश्चयहीनानां बुद्धयः उपायविषयाः वाचः बहुशाखाः बहुमुखाः विरुद्धनानार्थविषयाः अनन्ताश्च। तथा च कथमप्रामाणिकमतविवादेन प्रामाणिकेऽर्थे अविश्वासः। मया वक्ष्यमाणोपायस्तु प्रामाणिक इति तत्र तत्र व्यक्तीभविष्यतीति भावः।। ४१।।

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः।। ४२।।

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति।। ४३।।

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते।। ४४।।

नन्ववैदिकमतानामप्रामाणिकत्वेन तत्राविश्वासेऽपि वैदिकेष्वपि केचित्कर्माणि

स्वर्गफलान्येवाहुः। त्वया तु काम्यार्थान्येव स्वर्गादिफलानि, निष्कामानीश्वरार्पण-बुद्ध्याऽनुष्ठितानि तु ज्ञानार्थानीत्यभिप्रेयते। तथा च कथं त्वद्वचने निष्ठा स्यादित्यत-स्तेषां वैदिकाभासताप्रदर्शनाय निन्दामाह— **यामित्यादित्रयेण।।** वेदवादरताः वेदैर्य-दापातत उच्यते कर्मादि तत्रैव रताः। वेदोक्तविष्णुमहिमविवादपूर्वकं वेदपाठका वा निरर्थकवेदपाठका वा। अत एवाविपश्चितः। वेदतात्पर्यार्थापरिज्ञानिनः। अन्यन्मोक्षा-ख्यफलं वा ब्रह्मस्वरूपं वा नास्तीति वादिनः कामात्मानः काम्यफलमनस्काः भोग-चित्ता इति वा। स्वर्गपराः स्वर्गतात्पर्यकाः स्वर्गमेव परमपुमर्थं मन्यमाना इति यावत्। जन्म च कर्म च तत्फलं च प्रददातीति तथाविधां क्रियाविशेषबहुलां बहुकर्मविशेषप्र-तिपादिकां यामिमां वाचं पुष्पितां सञ्जातपुष्पां मोक्षफलमपेक्ष्य पुष्पस्थानीयस्वर्गादिफ-लकां भोगैश्वर्यप्राप्तिं प्रति प्रवदन्ति। तया वाचाऽपहृतचेतसां भोगैश्वर्ययोरासक्तचित्तानां व्यवसायात्मिका सम्यक् प्रमाणनिर्णीतार्थनिश्चयरूपा बुद्धिः समाधौ भगवति मनःस-माधानार्थं न विधीयते। तस्यैव परमपुमर्थहेतुत्वादिति भावः। यद्वा अव्यवसायबुद्धिः केन कारणेन भवति यत्परित्यागात्सा बुद्धिर्न भवति इत्यतोऽव्यवसायबुद्धेः कारणमाह— **यामिति।।** योजना तु पूर्ववदेव। वेदतात्पर्यविषयीभूतभगवत्स्वरूपमो-क्षस्वरूपयोरज्ञानिनामापातप्रतीतार्थमादाय स्वर्गादिफलका वेदा इति वादिनां भोगैश्व-र्यसक्तानामसद्वादिनां वाक्यान्यव्यवसायबुद्धिकारणम्। तत्त्यागे च सा बुद्धिर्न भवतीति भावः। अत्र पक्षे समाधावित्यस्य तत्त्वविषयतया दार्ढ्यार्थमित्यर्थः। तस्यैव विष्णुधर्मा-नुष्ठानहेतुत्वादिति।। ४२।। ४३।। ४४।।

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्।। ४५।।

"एवं योगे त्विमां शृण्वि" ति योगोक्तिं प्रतिज्ञाय तत्रादरजननाय सार्धश्लोकेन तं प्रशस्य स्वोक्तौ निष्ठाभावे कारणीभूतमतान्तरविधानं च श्लोकत्रयेण तन्निन्दोक्त्या निरस्येदानीं प्रतिज्ञातं योगं प्राधान्येनाह— **त्रैगुण्येत्यादिना आषष्ठाध्यायसमाप्ति।।** "बहूनि मे व्यतीतानि" इत्यादेः प्रासङ्गिकत्वेनाप्रधानत्वात्। त्रयाणां सत्त्वरजस्तमसा-मिदं त्रैगुण्यम्। त्रिगुणसम्बन्धि, "सम्बन्धार्थे विचित्रा हि तद्धितगतिरि" ति वचनात् ष्यङ्प्रत्ययः। त्रिगुणजन्यं यत्स्वर्गादि तद्विषयाः आपाततः स्वर्गादिफलककर्मादिप्रति-पादकाः प्रतीयन्ते वेदाः। "वादो विषयकत्वं च मुखतो वचनं तथे" त्युक्तेः। हे अर्जुन, त्वं तु निस्त्रैगुण्यः निष्क्रान्तस्त्रैगुण्यात् त्रिगुणसम्बन्धिस्वर्गादितो निस्त्रैगुण्यः। त्रैगुण्यबुद्धितो निर्गतो भव। आपाततः प्रतीतार्थे भ्रान्तिं मा कार्षीरित्यर्थः। यद्वा

त्रैगुण्यं त्रिगुणसम्बन्धि स्वर्गाद्यस्थिरफलं संसारबन्धनं वा। तदेव विषं त्रैगुण्यविषं यापयन्ति अपगमयन्तीति त्रैगुण्यविषयाः। यातेरन्तर्णीतण्यर्थात् "आतोनुपसर्गे क" इति कः। नित्यपुमर्थहेतुभगवत्स्वरूपविषया इति यावत्। तानाश्रित्येति शेषः। निस्त्रैगुण्यो भव प्राग्वदेवार्थः। वेदतात्पर्यविषयीभूतार्थं बुध्वा क्षुद्रफलककर्मादिरूपापातप्रतीतार्थे भ्रान्तिं मा कार्षीरिति भावः। किञ्च निर्द्वन्द्वः "सुखदुःखे समे कृत्वा" इत्यत्रोक्तदिशा समदुःखसुखादिरिति वा, सुखदुःखादिप्राप्तावुत्सेकानुत्सेकहीन इति वाऽर्थः। नित्यं सत्त्वे साधुगुणोपेते हरौ तिष्ठतीति नित्यसत्त्वस्थः। नित्यं हरिस्मृतिमान्भवेति सर्वत्रान्वेति। कथं नित्यं हरिस्मृतिरित्यत आत्मवान् परमात्मवान् तथा स्मृतिमानिति। "ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ" इति (४-१-३) सूत्रोक्तदिशा मम स्वामी हरिरिति स्मृतिमानिति यावत्। अप्राप्तप्राप्तिर्योगः, प्राप्तपरिरक्षणं क्षेमः। शास्त्रविरुद्धविषये योगक्षेमाभ्यां निष्क्रान्तो निर्योगक्षेमः। शास्त्रविरुद्धविषये योगक्षेमहीनो भवेत्यर्थः। उपलक्षणमेतत्। तादृशयोगक्षेमेच्छाहीनोऽपि भवेत्यर्थः। निर्द्वन्द्वत्वादिविशेषणयुक्तस्य (युक्तः सन्) नित्यपुमर्थहेतुर्भगवानेव वेदतात्पर्यविषयो न काम्यकर्मेति ज्ञात्वा काम्यकर्मत्यागेव सर्वत्र सन्ततः साधुगुणो हरिः मम स्वामीति नित्यस्मरणमेव ज्ञानोपायो न त्वैक्यस्मृतिरित्युक्तं भवति।। ४५।।

यावानर्थ उदपाने सर्वतः संप्लुतोदके।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः।। ४६।।

ननु यामिमामिति त्रयेण काम्यकर्मिणां समाध्यभावेन ज्ञानाभावान्न मोक्ष इति निन्दां कृत्वा निस्त्रैगुण्यो भवेति काम्यकर्मत्यागेन योगानुष्ठाननियम उक्तः। स त्वयुक्तः। ज्ञानफलं कर्मिणामिव कर्मफलं स्वर्गादिकं ज्ञानिनां नास्तीति ज्ञानकर्ममार्गयोः साम्यादित्यत आह– **यावानिति**।। सामर्थ्याद्यथैवंपदयोरध्याहारः। यावान्तावान्नित्यनयोरावृत्तिः। अयमर्थः। यथा यावानर्थः सर्वतः संप्लुतोदके महासमुद्रेऽन्तर्भवति एवं सर्वेषु वेदेषु सर्ववेदोक्तकाम्यकर्मिणां यावानर्थः स्वर्गादिरूपं फलं तावानर्थः तावत्फलं विजानतः परोक्षतो भगवन्तं जानतो ब्राह्मणस्य ब्रह्मापरोक्षज्ञानिनः भवत्येवेत्यर्थः। ज्ञानिकर्मिणोरन्योन्यफलाभावेऽपि ज्ञानिफलं महासमुद्रोदकमिव महत्। कर्मिफलं तु कूपोदकमिवात्यल्पमतः कुतः तयोः साम्यम्। तथा चाल्पास्थिरफलककर्मनिन्दया महानन्तफलज्ञानसाधने योगे प्रेरणं पूर्वश्लोकोक्तं युक्तमिति भावः। अत्र विजानत इति परोक्षज्ञानस्य ब्राह्मणपदोक्तापरोक्षज्ञानस्य च हेतुहेतुमद्भावेन द्वयोरुक्तिः। पूर्वत्र स्वामित्वेन हरिस्मरणस्य योगशब्दितज्ञानोपायत्वप्रकटनाय स्वरूपकथनमिति टीको-

क्तिस्त्वभ्युपगमवादेनेति ज्ञेयम्। यद्वा पूर्वत्र निस्त्रैगुण्यो भवेति स्वर्गादिक्षयिष्णुफलककाम्यकर्मरूपे अपाततः प्रतीते वेदार्थे भ्रान्तिं मा कार्षीरित्युक्तकाम्यकर्मनिवृत्तौ त्रैगुण्यविषहारिवेदाश्रयणं कार्यमित्युक्तेऽर्थे वेदतात्पर्यार्थं निवृत्तकर्माराध्यं विष्णुं सम्यग्जानतोऽतिशयितफलावाप्तिरूपयुक्तिमाह— **यावानिति**।। सर्वतः संप्लुतोदके प्रकृत्यात्मके महाप्रलयोदके। अधिकरणसप्तमी। तत्र स्थित इत्यर्थः। उदपाने परमात्मनि। उत् उद्रेकात् अपः पालकराहित्यात्, अनः चेष्टकत्वाद्धेतोः उच्चासावपश्च अनश्चेत्युदपानस्तस्मिन् प्रलयेऽप्युद्रिक्तगुणतया पालकवर्जिते (पालकवर्जितः सन्) कालादिचेष्टकतया स्थिते हरौ प्रसन्ने सति यावानर्थः धर्ममोक्षादिर्भवति तावान्सर्वेषु वेदेषु विजानतो विशेषज्ञस्य, कर्माणि भगवज्ज्ञानार्थानि, भगवानेव वेदमुख्यार्थः, स्वर्गादिफलश्रवणं रुच्यर्थमित्यादि जानतो ब्राह्मणस्य तावानर्थो भवति। अतः प्रतीतार्थे त्रैगुण्ये भ्रान्तिं मा कार्षीरिति।। ४६।।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।। ४७।।

ननु सकामतया कर्म कुर्वतां 'यामिमां' इत्यादिनोक्ता निन्दा न युक्ता। 'स्वर्गकामो यजेत' इत्यादौ कामनाया अपि विधानात्। न हि विहितकृतां निन्दा युक्ता। न च यागकामनयोर्द्वयोरपि विधौ वाक्यभेदः। स्वर्गकामनाविशिष्टयागविध्यभ्युपगमादित्यत आह— **कर्मण्येवेति**। अत्र त इति ज्ञानिभूतसर्ववर्णाश्रमोपलक्षणम्। फलेष्विति पदं फलकामोपलक्षणम्। अयमर्थः। हे पार्थ, ते तव त्वादृशस्यान्यस्य ज्ञानिनोऽपि कर्मण्येवाधिकारो योग्यता। फलेषु स्वर्गादिफलकामनासु मा नाधिकारः। अतः कर्मैव कार्यं विधिविषय इति यावत्। न तु कामना कार्या। कुतः कुर्वन्नेवेति (ईशा० २) श्रुतौ एवं त्वयीत्युत्तरार्धे कर्माकरणे प्रत्यवायस्येव कामनाया अकरणे प्रत्यवायाश्रवणात्। तथा च कामनानुवादेन यागविधिरेवायं न तु विशिष्टविधिरिति भावः। अतः कामनायाः विध्यविषयत्वात् कर्मकृतौ फलं हेतुर्यस्य स कर्मफलहेतुः मा भूरित्यर्थः। शाकपार्थिवादिवत् कृतिपदलोपोऽत्र ध्येयः। तर्हि स्वयं क्लेशरूपत्वात् कर्म न कार्यं इत्यत आह— **मा त इति**।। ते तव त्वादृशस्य सर्वस्यापि ज्ञानिनोऽकर्मणि कर्माकरणे सङ्गः स्नेहो माऽभूत्। स्वर्गादिरूपाल्पास्थिरफलाभावेऽपि अनल्पस्थिरमोक्षरूपमहापुमर्थहेतुभगवज्ज्ञानभक्तिप्रसादानां भावात्तत्कामनया कर्मकरणोपपत्तेर्ज्ञानभक्त्यादिकामनायाश्च निन्दाऽभावात्। प्रत्युत 'वृणीमहे ते परितोषणाय' इत्यादिना चतुर्थस्कन्धे प्रचेतसां महतामाचाराच्च। तथा च सूत्रं 'ॐ बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॐ'

इति (३-४-४३)। न च ज्ञानिनः '૩ઁ अनियमः सर्वेषां अविरोधाच्छब्दानुमानाभ्यां ૩ઁ' (३-३-३२) इत्युक्तदिशा मोक्षस्य सिद्धतया किं कर्मकरणेन साध्यमिति चेन्न। ज्ञाने मोक्षे चातिशयार्थत्वात्। यथोक्तं '૩ઁ भावं तु बादरायणोऽस्ति हि ૩ઁ' (१-३-३३) इति। यद्वा पूर्वमात्मवानित्यनेनैक्यभावनं न कार्यमित्युक्तम्। तत्कुत इत्यतो जीवब्रह्मैक्यस्यैवाभावादित्यैक्याभावरूपहेतुमाह— **कर्मण्येवेति**।। त इत्युपलक्षणम्। त्वदादिसर्वजीवानां कर्मण्येवाधिकारः। कर्मसंपादन एव सामर्थ्यमित्यर्थः। एवकारव्यवच्छेद्यमाह— **मा फलेष्विति**।। फलेषु कदाचनाधिकारो नास्ति। फलसंपादने सामर्थ्यं नास्ति। किं त्वीश्वर एव फलदाने समर्थ इति भावः। तदाह सूत्रे '૩ઁ फलमत उपपत्तेः ૩ઁ' इति (३-२-३९)। एवं च फलसंपादने शक्तत्वाशक्तत्वाभ्यां सर्वजीवानाम् ईश्वरेणैक्याभावादिति युक्तिरुक्ता भवति। तस्याः प्रतिज्ञामाह— **मा कर्मफलहेतुर्भूरिति**।। उक्तदिशा कर्मफलहेतुरीश्वरः, मनसा स मा भूः। तदैक्यभावना न कार्येति यावत्। मिथ्योपासनायाः '૩ઁ न प्रतीके न हि सः ૩ઁ' इति व्याससूत्रे (४-१-४), 'अचेतनासत्यायोग्यान्यनुपास्याफलत्वविपर्ययाभ्यां' इति साङ्कर्षणसूत्रे च निषेधात्। तर्हि सत्त्वस्थ इत्युक्तदिशा नित्यं स्वामित्वेन हरिस्मृत्यैवालं, किं कर्मकरणेनेत्यत आह— **मा त इति**।। त्वदादेः सर्वस्य अकर्मणि कर्माकरणे सङ्गः स्नेहो माऽभूत्। तदकरणे प्रत्यवायश्रवणादिति भावः।। ४७।।

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।। ४८।।

'मा ते सङ्गोऽस्त्वकर्मणि' इत्युक्तम्। तर्हि किं कार्यमित्यत आह— **योगस्थ इति**।। योगो ज्ञानोपायः तत्र तिष्ठतीति योगस्थः। ज्ञानोपायमनुतिष्ठन्सङ्गं फलस्नेहं त्यक्त्वा तत एव फलरागत्यागादेव सिद्ध्यसिद्ध्योः समो भूत्वा कर्माणि कुरु। ईश्वरप्रीत्यै कर्माणि कुर्वित्यर्थः। योगस्थ इत्युक्तयोगः क इत्यतः सङ्गं त्यक्त्वेत्यादिना योगशब्दार्थो व्याख्यातः। तत्र त्यागसमत्वयोः प्रत्येकं योगत्वभ्रान्तिनिरासायाह— **समत्वमिति**।। सङ्गत्यागस्याप्युपलक्षणम्। त्यागोपेतं समत्वं योग इत्यर्थः।। ४८।।

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः।। ४९।।

किञ्च कर्मफलस्य ज्ञानफलादल्पत्वाज्ज्ञानोपायानुष्ठानाय प्रयतस्वेति "यावानर्थ" इत्यत्रोक्तेऽर्थे कर्मरूपस्य पुमर्थोपायस्य ज्ञानरूपोपायादधमत्वरूपं हेत्वन्तर-

मुच्यते— **दूरेण ह्यवरमिति**। बुद्धियोगाज्ज्ञानलक्षणपुमर्थसाधनात्कर्म दूरेणातीवावरमधमम्। अतो बुद्धौ ज्ञाने शरणमन्विच्छ ज्ञानस्योपायभूतयोगानुष्ठानलक्षणां ज्ञाने स्थितिं अन्विच्छेत्यर्थः। कथं कर्म ज्ञानादवरमित्यत आह— **कृपणा इति**।। "फलं कर्मकृतौ हेतुर्येषां ते फलहेतवः"। ते कृपणाः दीनाः इमं लोकं हीनतरं लोकं वा विशन्तीत्यर्थः। यद्वोत्तरार्धस्यैवमर्थः। ज्ञानस्य कर्मत उत्तमत्वे सति उत्तमायाम् ज्ञानावस्थायां ईश्वरैक्यभावनं युक्तमित्यत आह— **बुद्धाविति**।। बुद्धौ ज्ञाने जातेऽपि विष्णुमेव शरणमन्विच्छ। कुतः। फलहेतवः फलहेतुरीश्वरः। फलहेतवः ईश्वरैक्यभाविनो ये ते कृपणाः। तमःप्राप्तिमन्त इत्यर्थः।। ४९।।

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।। ५०।।

ज्ञानात्कर्मावरमित्येतत्काम्यकर्मिणां कृपणत्वोक्त्योपपाद्येदानीं कर्मफलाज्ज्ञानफलस्य विलक्षणत्वोक्त्याऽप्युपपादयति— **बुद्धियुक्त इति**।। बुद्धियुक्तो भगवज्ज्ञानयुक्तः। उभे सुकृतदुष्कृते पुण्यपापे जहाति त्यजति। पुण्यमध्ये यदनिष्टं मानुष्यादिफ(लकं) लं तज्जहाति। यत्तूपासनादिजन्यं ज्ञानवृद्धिकरं मुक्तावानन्दवृद्धिकरं च तत्पुण्यं नैव जहाति। दुष्कृतं तु सर्वात्मना जहाति। तस्माज्ज्ञानस्य सर्वानिष्टनिवृत्तिविशिष्टोभयवृद्धिरूपमहाफलत्वात्, योगाय ज्ञानोपायाय युज्यस्व सन्नद्धो भव प्रयतस्वेति वा। योगं स्तौति— **योग इति**।। योगो ज्ञानोपायः कर्मसु कौशलं श्रेष्ठमित्यर्थः। यद्वा अस्तु ज्ञानोपायाय प्रयत्नः। किं फलस्नेहरहितकर्मणेत्यत आह— **योग इति**।। कर्मसु मध्ये भगवज्ज्ञानपूर्वं फलस्नेहरहितं भगवदर्थत्वेन क्रियमाणं कर्म कौशलमुच्यते। स एव च योगो नाम। अतः फलस्नेहहीनं कर्मैव ज्ञानोपाय इत्यर्थः।।५०।।

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्।। ५१।।

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्ताऽसि निर्वेदं श्रोतव्यस्य श्रुतस्य च।। ५२।।

पूर्वोक्तं ज्ञानसाधनं ज्ञानफलं च विवृणोति— **कर्मजमिति**। कर्मजं फलं त्यक्त्वेत्युपलक्षणम्। कर्मजफलसंकल्पत्यागादिपूर्वकं भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपं योगमास्थाय बुद्धियुक्ताः सम्यक् शास्त्रजनितभगवज्ज्ञानिन इत्यनेन ज्ञानसाधनं योगो विवृतः। ततश्च। मनीषिणः, प्रशंसायां मतुबर्थेनिप्रत्ययः, अपरोक्षज्ञानिनो भूत्वा जन्म-

बन्धविनिर्मुक्ताः सन्तोऽनामयं निर्दुःखं पदं मोक्षं गच्छन्तीत्युक्त्या ज्ञानफलं विवृत्तं ज्ञेयम्।। ५१।।

फलकामनादिवर्जितानीश्वराराधनरूपाणि कर्माणि मोक्षसाधनज्ञानार्थिना कियत्पर्यंतं कर्तव्यानीत्यत आह— **यदा त इति।।** यदा ते तव बुद्धिरन्तःकरणं मोहकलिलमन्यथाज्ञानलक्षणं दोषं व्यतितरिष्यति परित्यक्ष्यति। तदा महद्भ्यः श्रुतस्य श्रोतव्यस्य च। सर्वकर्मोपलक्षणमेतत्। तस्य सर्वस्य निर्वेदं नितरां लाभं गन्ताऽसि प्राप्स्यसि। मुक्तिहेतुज्ञानसाधनभूतो निवृत्तकर्मानुष्ठानरूपो योगः साक्षाज्ज्ञानहेतुः श्रवणादिरूपप्रमाणस्यादृष्टद्वारा सत्त्वशुद्ध्युत्पादनेनोपकारकः सन् मिथ्याज्ञानदोषनिवृत्तिपर्यन्तं तत्त्वज्ञानोदयपर्यन्तं च कर्तव्य इति भावः।। ५२।।

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
समाधावचलाबुद्धिस्तदा योगमवाप्स्यसि।। ५३।।

किं तन्मोहकलिलं कीदृशं च तदतितरणमित्याकाङ्क्षायां पुंसामधममध्यमोत्तमावस्थादिप्रदर्शनेन पूर्वश्लोकोक्तमेव योगानुष्ठानविधिं स्पष्टयति— **श्रुतीति।।** परोक्षनिश्चयात्पूर्वावस्थायां श्रुतिभिर्वेदैर्विप्रतिपन्ना विरुद्धा सती बुद्धिर्यदा वेदार्थानुकूलेन तत्त्वनिश्चयेनासच्छास्त्रैश्चालनहीना इदमदो वेति संशयानास्कन्दिता सती स्थास्यति। ततश्च समाधिर्भवति। जाते च समाधौ असंप्रज्ञातध्याने अपरोक्षज्ञानं भवति। तेन च ब्रह्मदर्शनेन परमानन्दमग्नतया भेरीताडनादिनाऽपि चलनहीना बुद्धिर्मनो यदा स्थास्यति तदा योगं योगफलं ज्ञानोपायानुष्ठानस्य फलमवाप्स्यसीत्यर्थः। पूर्वावस्थायामनुष्ठितयोगस्य परोक्षभगवन्निश्चयावधित्वमुक्तम्। परोक्षनिश्चयस्य काष्ठात्वसच्छास्त्रैरनेकधा परिलोड्यमानत्वेऽप्यप्रामाण्यशङ्ककाकलङ्कितत्वशून्यत्वम्। तद्दशायामनुष्ठितनिवृत्तकर्मरूपयोगस्य तु समाधौ भगवदपरोक्षज्ञानावधित्वम्। तस्य तु काष्ठा भेरीताडनादिनाऽप्यप्रतिबोधसमाधिस्थत्वम्। एतेन बुद्धेर्मनसः मोहकलिलं श्रुतिविरुद्धत्वरूपो दोषः। तत्तरणं नाम वेदार्थानुकूलेन निश्चये दृढतयाऽवस्थानम्। तदा निर्वेदं गन्ताऽसीत्यस्य विवरणं सामाधावचलाबुद्धिरिति भवति। श्लोकद्वयस्याप्यचञ्चलसमाध्यावस्थाप्राप्तिर्योगानुष्ठानावधिरिति तात्पर्यं ध्येयम्। यद्वा बुद्धिर्मनः श्रुतिविप्रतिपन्ना श्रुतिविशेषेण प्रतिपन्ना श्रुत्यर्थनिर्णयं प्राप्ता सती इदमदो वेति चञ्चलत्वहीना यदा स्थास्यति तदा समाधौ स माधिः समाधानम्। सति सप्तमी। श्रुत्यर्थनिश्चयेन निश्चलत्वे सति अपरोक्षज्ञानं भवतीति योज्यम्। तेन च विष्णावचला भवति बुद्धिः। ततश्च योगं भगवद्योगं मुक्तिमवाप्स्यसीति।। ५३।।

अर्जुन उवाच-

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्।। ५४।।

ज्ञानिनि प्रकृते (सति) लब्धावसरोऽर्जुनः प्रागुक्तलक्षणानुवादपूर्वकं लक्षणान्तरादिकं पृच्छति— **स्थितेति**। स्थिता प्रतिष्ठां प्राप्ता प्रज्ञाऽपरोक्षदृशिर्यस्य स तथा। तस्य समाधिस्थस्य समाध्यवस्थां गतस्य प्राक् त्वदुक्तदिशाऽसंप्रज्ञातध्यानस्थत्वलक्षणं गतस्य। का भाषा भाष्यतेऽनयेति भाषाशब्दो लक्षवचनः किं लक्षणमित्यर्थः। येन लक्षणेनायं ज्ञानीति व्यवह्रियते तत्किमित्यर्थः। केशव ब्रह्मरुद्रप्रवर्तक। 'केशाद्वोऽन्यतरस्यामि' ति मत्वर्थे 'व' प्रत्ययोक्तेः प्रशस्तकेशवानिति वा। स्थितधीरपरोक्षज्ञानी किं प्रभाषेत किं प्रत्यासीत किमुद्दिश्य व्रजेत प्रवृत्तिं कुर्यादित्यर्थः। अत्र किं लक्षणमिति वक्तव्ये यौगिकभाषाशब्देन तदुक्तिः प्रागुक्तं समाधिस्थत्वलक्षणमयावद्द्रव्यभावित्वान्न सम्यग्व्यवहारोपयोगि। यावल्लक्ष्यभावि तु सम्यक् सार्वत्रिकव्यवहारोपयोगि। अतः सार्वत्रिकव्यवहारहेतुभूतं यावल्लक्ष्यभावि लक्षणं किमिति प्रष्टुमिति ज्ञेयम्। स्थितप्रज्ञस्य का भाषेत्येव पूर्तौ समाधिस्थस्येति प्राचीनलक्षणानुवादस्तु त्वदुक्तं लक्षणं ज्ञातं तन्न पृच्छ्यते। येन सिद्धार्थता प्रश्नस्य स्यात्। किं त्वन्यदेव पृच्छ्यत इति ज्ञापयितुम्। यद्वा समाधिस्थस्य विषमबुद्धिवर्जितस्येत्यर्थः। उत्तरार्धे किं शब्दः आक्षेपार्थः। भेरीताडनादिनाऽपि अप्रतिबुद्धो ब्रह्मदर्शनेन परमानन्दमग्नत्वात्, स्थितधीरपरोक्षज्ञानी भाषणोपवेशनगमनादिरूपप्रवृत्तिं किमर्थं कुर्यात्। करोति च शुकादिः। अतः "समाधौ अचलाबुद्धिस्तदा योगमवाप्स्यसी" ति उक्तमसदिति।। ५४।।

श्रीभगवानुवाच-

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।। ५५।।

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।। ५६।।

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।। ५७।।

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।। ५८।।

का भाषेति कृतलक्षणप्रश्नस्योत्तरमाह– **प्रजहातीति।** उत्तरार्धे कृताक्षेपस्य तु समाधिं या निशेत्यग्रे वक्ष्यति। यदा मनोगतान्सर्वान् कामान्प्रजहाति परित्यजति। कामानित्युपलक्षणं कामक्रोधादीनित्यर्थः। यदा चात्मन्येव परमात्मन्येव व्यवस्थितः सन् तदेकचित्तः सन्निति यावत्। आत्मना परमात्मना तत्प्रसादेनेत्यर्थः। तुष्टः सन्तोषयुक्तः तदा स्थितप्रज्ञोऽपरोक्षज्ञानी उच्यत इत्यर्थः। अत्र सर्वान्कामानित्यस्य विरुद्धकामानित्यर्थः। कामादेर्मनोगतत्वाव्यभिचारेऽपि मनोगतानित्युक्तिर्विरुद्धसर्वकामप्रहाणघटनाय ज्ञानस्य कामादेश्च मानसैकनिष्ठत्वात् 'रसोऽप्यस्य परं दृष्ट्वा निवर्तत' इति वक्ष्यमाणदिशाऽन्योन्यं विरुद्धत्वान्मनसि भगवज्ज्ञाने जाते तद्विरुद्धाः कामादयो न स्थातुमर्हन्तीति युक्तिसूचनेन तद्धटनात्। प्रायः सर्वविरुद्धकामादित्यागवत्त्वे सति भगवदेकचित्ततया सन्तुष्टत्वं ज्ञानिलक्षणमित्युक्तं भवति। न च "योगे त्विमां शृण्वि" ति ज्ञानोपायं प्रतिज्ञाय ज्ञानिलक्षणोक्तिरसङ्गतेति शङ्क्यम्। प्रायो विरुद्धकामत्यागभगवदेकचित्ततत्प्रसादायत्तसन्तोषवत्त्वादीनां ज्ञानिलक्षणतयोक्तवक्ष्यमाणानामेव ज्ञानोपायशब्दितयोगरूपत्वात्। परन्तु ज्ञानार्थिनैतानि यत्नसाध्यानि ज्ञानिनि तु स्वभावसिद्धानीति विशेषः।। ५५।।

एतदेव कामशब्दोपलक्षितदोषान्तरत्यागकथनादिना त्रिभिः स्पष्टयति– **दुःखेष्वित्यादिभिः।।** दुःखेषु प्राप्तेषु अनुद्विग्नं क्षान्तं मनो यस्य स तथा। सुखेषु विषये विगतेच्छः। अशोभने शोभनाध्यासो रागः। रागभयक्रोधाः वीता अपगता यस्मात्स तथा तादृशो मुनिः स्थितधीरुच्यते।। ५६।।

वीतरागभयक्रोधत्वं केन हेतुना भवतीत्यत आह– **य इति।।** अनभिस्नेह इति हेतुगर्भम्। यः सर्वत्राऽनभिस्नेहत्वात्तत्तच्छुभाशुभं प्राप्यापि नाभिनन्दति न द्वेष्टि। तस्य प्रज्ञा अपरोक्षधीः प्रतिष्ठिता।। ५७।।

किञ्चाज्ञानी यदा इन्द्रियार्थेभ्यः शब्दस्पर्शरूपरसगन्धेभ्यः। सर्वशः सर्वाणि इन्द्रियाणि श्रोत्रादीनि कूर्मः करचरणाद्यङ्गानि स्वभावेनोपसंहरति। तद्वदनायासेनोपसंहरते तस्य प्रज्ञा प्रतिष्ठिता। ज्ञानिनो जिज्ञासोरिवेन्द्रियप्रत्याहरणं न यत्नसाध्यं किं त्वनायासेनैवेति ज्ञापनाय कूर्मोऽङ्गानीवेति दृष्टान्तः।। ५८।।

विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते।। ५९।।

नन्वेवं कामप्रहाणादिलक्षणसाधनं चेज्ज्ञानं तर्हि सर्वोऽपि जनः कस्मान्न तत्साधयति। कामाद्युपद्रवपरिहारार्थं किं दंदह्यमानशिराः बंभ्रमीति इत्यतो निराहारत्वेनेन्द्रिय-

जयः, तेनैव च ज्ञानमित्यादिदुःसंपादत्वं ज्ञानस्याह— **'विषया' इत्यादिभिस्त्रिभिः।।** तत्राद्येनेन्द्रियजय उच्यते। देहिनो निराहारस्य। हेतुगर्भमिदम्। निराहारत्वेन हेतुना विषयाः रूपादयः— इन्द्रियाणां तद्भोगशक्तय उपलक्ष्यन्ते। ताः निवर्तन्ते। रसवर्जं रसो रागः मानसिकविषयाभिलाषवर्जम्। निराहारत्वेन विषयाभिलाषो न निवर्तते। रसोऽप्यस्य देहिनः परं दृष्ट्वा निवर्तते। परमात्मदर्शनेनैव विषयाभिलाषोऽपयातीत्यर्थः। यद्वा रसेतरे रूपगन्धस्पर्शशब्दाः निवर्तन्ते। अत्रापि विषयपदेनेन्द्रियाणां तद्भोगशक्त्यादयो लक्ष्यन्ते। चक्षुरादीन्द्रियाणां रूपादिविषयभोगशक्तयो मनसस्तदाकाङ्क्षाश्च निवर्तन्ते इत्यर्थः। रसवर्जं रसशब्दः प्राग्वल्लाक्षणिकः। रसनेन्द्रियस्य रसभोगशक्तिवर्जं मानसिकरसाकाङ्क्षावर्जमिति रसविषयकमनोगताकाङ्क्षा रसनेन्द्रियगतरसभोगशक्तिश्च निराहारत्वेन हेतुना न निवर्तत इत्यर्थः। तद्द्वयं कदा निवर्तत इत्यत उक्तम्— **रसोऽपीति।।** अस्य देहिनः रसः मानसिको रसविषयको रागः रसनेन्द्रियस्य तद्भोगशक्तिश्च परं दृष्ट्वा निवर्तते। अचेतने चेतनवदुपचाराद्रसः परं दृष्ट्वा निवर्तत इत्युक्तमिति ज्ञेयम्। अयमर्थः। यदा बाह्येन्द्रियाणि विषयसन्निधानेऽपि न तैः सन्निकृष्यंते। सन्निकृष्टान्यपि मनस्तदाभिमुख्येन न हरन्ति। अपहृतेऽपि मनसि न विषयरागो जायते, तदा नात्मनः क्षोभो भवति इत्येष इन्द्रियजयः। सोऽयं सङ्ग्रहेण द्वेधा भवति। बाह्येन्द्रियाणां शक्तिजयान्मनसो रागक्षयाच्च। एतद्द्वयं च जिज्ञासोर्निराहारत्वेन, ज्ञानिनो ब्रह्मदर्शनेन भवतीत्येवमिन्द्रियजयस्य महाप्रयत्नसाध्यत्वमिति।। ५९।।

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।। ६०।।

तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता।। ६१।।

नन्विन्द्रियजयार्थं किं निराहारत्वरूपमहाप्रयत्नेन, प्रत्याहारादिसाधारणयत्नेनापि तत्संभवात्। तथा किं ब्रह्मापरोक्षज्ञानेन, नित्यानित्यविवेकज्ञानेनापि रागनिवृत्त्युपपत्तेरित्यत आह— **यततो ह्यपीति।।** विपश्चितः परोक्षज्ञानिनः यततोऽपि साधारणप्रयत्नवतोऽपि पुरुषस्य देहाभिमानिनः इन्द्रियाणि मनः प्रसभं बलात् हरन्ति स्वयं विषयसन्निकृष्टानि सन्ति तदभिमुखं कृत्वा तद्रागीकुर्वन्तीत्यर्थः। तावता आत्मनः कथमिन्द्रियविजय इत्यत आह— **प्रमाथीनीति।।** प्रमथनशीलानि पुरुषस्य क्षोभणशीलानि न तेन तानि जितानि। यो हि यं व्याकुलं न करोति स तेन विजित इत्युच्यते। अतो महाप्रयत्नः प्रागुक्तदिशा कार्य इति।। ६०।।

यदि साधारणयत्नविवेकज्ञानाभ्यामिन्द्रियाणि न जीयन्ते, तर्ह्यशक्यान्येव तानि जेतुम्। निराहारत्वे देहावस्थित्यसंभवात्। इन्द्रियजयस्य ब्रह्मदृष्टिसाध्यतयाऽभिमतत्वेन तस्य तद्धेतुत्वे विवक्षिते सत्यन्योन्याश्रयप्रसङ्गादित्यत आह– **तानीति**।। तानीन्द्रियाणि सर्वाणि संयम्य विषयेभ्य उपसंहृत्य, मत्परः अहमेव भगवान्कृष्ण एव परः सर्वोत्कृष्टो यस्य स मत्परः। भगवानेव सर्वोत्तम इति ज्ञात्वा। युक्तः। समाध्यर्थस्य युजे रूपम्। भगवति मनो युञ्जान इत्यर्थः। आसीत तिष्ठेत्। अयं भावः। यद्यपीन्द्रियजये परोक्तः प्रत्याहारादिः साधारणप्रयत्नो न साधनम्। नापि निराहारत्वादिकं प्रागुक्तमशक्यम्। तथाऽपि तत्प्रतिनिधिना महाप्रयत्नेन जेयानि। तत्र भगवतः सर्वोत्तमत्वज्ञानपूर्वं तस्मिन्नेव निरन्तरं मनोयोजनमिन्द्रियजये मुख्यं साधनम्। निराहारत्वादिकं तु वस्तुगतिप्रदर्शनार्थमेवोक्तमिति। यदर्थं सार्धश्लोकद्वयेनेन्द्रियजयरूपोपोद्धात उक्तः अथेदानीं महाप्रयत्नेन साधितेन्द्रियजयस्य ज्ञानसिद्धिः फलमित्याह– **वशे हीति**।। यस्य वशे इन्द्रियाणि वर्तन्ते तस्य प्रज्ञा प्रतिष्ठितेति। यत एवं महायाससाध्येन्द्रियजयफलं ज्ञानमत एवायासभीरुर्जनो न तत्साधयतीति, न तु ज्ञानस्योक्तलक्षणाभावादिति श्लोकत्रयतात्पर्यार्थः। अत्रोक्तमिन्द्रियजयस्य ज्ञानरूपं फलं न साक्षादिति 'रागद्वेषवियुक्तै' रित्यादौ व्यक्तीभविष्यतीति ज्ञेयम्।। ६१।।

ध्यायतो विषयान्पुंसः संगस्तेषूपजायते।
संगात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।। ६२।।

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।। ६३।।

मत्परो युक्त आसीतेति हरिसर्वोत्तमत्वज्ञानपूर्वं तस्मिन्नेव मनोयोजनमिन्द्रियजयस्य मुख्यं साधनम्। "रागद्वेषवियुक्तै" रिति वक्ष्यमाणदिशा रागादिपरिहारोऽप्यपरं साधनम्। तत्र रागादेर्यत्कारणं यच्च फलं तदुभयज्ञाने सति तत्परित्यागो भवत्यतः तदुपोद्धातत्वेन तदुभयमाह **ध्यायत इति श्लोकद्वयेन**।। तथाऽपि 'वीतरागभयक्रोध' इति रागादिराहित्यं ज्ञानिलक्षणत्वेनोक्तम्। तथाऽपि तस्य तत्सिद्धम्। जिज्ञासुना च साध्यम्। अतस्तत्परिहाराय तत्कारणफलयोरुक्तिर्नायुक्तेति ज्ञेयम्। विषयान् रूपादीन् हितबुद्ध्या ध्यायतः पुंसः तेषु विषयेषु संग आसक्तिर्भवति। आसक्त्या च तेषु कामः संजायते अधिको भवति। कामाच्च केनचित्प्रतिहतात्क्रोधो भवति।। ६२।।

किञ्च क्रोधाद्भवति संमोहः अकार्येच्छा, परवित्तापहरणाद्यधर्मे धर्मबुद्धिरित्यादि मिथ्याज्ञानं वा। संमोहादुक्तद्विरूपात् स्मृतिविभ्रमः क्रमात्प्रतिषेधादिस्मृतिनाशः, परवित्तापहरणादेरधर्मत्वाद्यभिधायकश्रुत्याद्यर्थस्य पूर्वं स्वयं ज्ञातस्याप्यन्यथा स्मरणं वा। स्मृतिभ्रंशाद्बुद्धिनाशः येन पूर्वं निर्णीतदोषबुद्धेः सर्वात्मना नाशो भवति। तन्नाशात् तेन चाधर्मकरणाच्च प्रणश्यति नरकाद्यनर्थं प्राप्नोति। एतदुक्तं भवति, रागद्वेषयोः परंपरया नरकाद्यनर्थप्राप्तिः फलमिति ज्ञानेन तत्परिजिहीर्षायां, विषयध्यानं परंपरया तत्कारणमिति ज्ञानेन तदकरणाद्रागद्वेषयोरनुत्पाद इति।। ६३।।

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति।। ६४।।

अस्त्वेवमुक्तदिशा रागद्वेषपरिहारः। ततः किमित्यतस्तस्यैंद्रियजयाख्यं फलमिंद्रियजयाज्जायमानं फलं चाह– **रागद्वेषेति।।** यद्यपींद्रियजयस्य 'वशे ही' त्यत्र ज्ञानं फलमित्युक्तम्। तथाऽपि तन्न साक्षात्। किन्तु मनःप्रसादद्वारेति अत्र श्लोकद्वयेनोच्यत इत्यदोषः। अयमर्थः। य उक्तविधया त्यक्तरागद्वेषः स पुमान् रागद्वेषवियुक्तैस्ताभ्यां अप्रयुक्तैरिंद्रियैश्चक्षुरादिबाह्येंद्रियैः अत एवात्मवश्यैः स्वाधीनैः रूपरसादीन्विषयान्केवलदेहधारणमात्रार्थं चरन्ननुभवन्नपि। विधेयात्मा विधेयः स्वाधीनः आत्मा मनो यस्य स तथा तादृशो भूत्वा प्रसादं मनसः स्वतोऽपि प्रायो विषयागतिलक्षणं प्रसादं अधिगच्छति प्राप्नोति। अत्र पादत्रयेण रागद्वेषपरिहारस्यैंद्रियजयाख्यं फलमुक्तम्। रागद्वेषाप्रयुक्तत्वादेवेन्द्रियाणां विधेयात्मत्वहेतुनाऽऽत्मवश्यत्वस्येन्द्रियाणामुक्त्या तज्जयस्य प्रतीतेरात्मवश्यत्वस्य स्वात्मनः क्षोभानापादकत्वरूपत्वात्। विषयांश्चरन्नित्युक्तिस्तु, इन्द्रियजयकारणत्वं निराहारत्वस्य प्रागुक्तमयुक्तम्, अशक्यत्वादित्याशंक्य देहधारणमात्रोपयुक्तविषयानुभवो न दोषायेति वक्तुम्। इन्द्रियजयस्याव्यवहितफलोक्तिर्विधेयात्मा प्रसादमधिगच्छतीति।। ६४।।

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठति।। ६५।।

प्रसादे सति किं स्यादित्यत उक्तम्– **प्रसाद इति।।** प्रागुक्तरूपमनःप्रसादे सति अस्य प्रसन्नचेतसः पुंसः आशु शीघ्रं बुद्धिर्ब्रह्मापरोक्षज्ञानं पर्यवतिष्ठति सम्यग्भवति। ततश्चास्यापरोक्षज्ञानिनः सर्वदुःखानां, हानिरुपजायते, हि प्रसिद्धमेतत् 'तरति शोकमात्मवित्' (छां० ७-१-३) इत्यादौ इति। अत्र प्रसादे सति बुद्धिः पर्यवतिष्ठतीत्येतावत्येव वक्तव्ये सर्वदुःखानां हानिरिति ज्ञानफलस्याप्युक्तिः, 'बुद्धियुक्तो जहातीह' इत्यत्र

सुकृतदुष्कृतहानस्य ज्ञानफलत्वोक्तिरयुक्ता। सुखदुःखप्राप्तिपरिहारयोरन्यतरत्वाभावेना-पुमर्थत्वात् इत्याशंकानिरासाय प्रसंगात्प्राप्तेति ज्ञेयम्।। ६५।।

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शांतिरशांतस्य कुतस्सुखम्।। ६६।।

इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि।। ३७।।

श्रवणमननाभ्यामुपकृतेन ध्यानेनैव ब्रह्मापरोक्षज्ञानसिद्धेः किमनेन प्रसादेनेत्यतः प्रसादाभावे दोषमाह— **नास्तीत्यादिश्लोकद्वयेन।।** विपक्षे दोषोक्तिपरत्वान्मनः प्रसादाभावे युक्तिशब्दितचित्तनिरोधो न भवतीत्येतत्प्रकरणप्राप्तमादौ योज्यम्। 'नास्ति बुद्धि' रित्येतदग्रे योज्यम्। अयुक्तस्य चित्तनिरोधहीनस्य भावना ध्यानं न भवति। अभावयतश्चाध्यायिनश्च बुद्धिरपरोक्षज्ञानं न भवति। न चाबुद्धेरिति शेषः। अपरोक्षज्ञानहीनस्य च शांतिर्मुक्तिर्नास्ति। अशान्तस्यामुक्तस्य च सुखं कुतः न कुतोऽपीत्यर्थः। अबुद्धेः शांतिर्नेत्येतावत्येव वाच्येऽशांतस्य कुतः सुखमित्युक्तिर्न केवलमपरोक्षिणो मुक्तौ सर्वदुःखप्रहाणमात्रं किंतु संसारिभिरलभ्यं परमं सुखं चेति ज्ञापयितुं प्रसंगात्प्राप्तेति ज्ञेयम्। यद्वा शांतिर्भगवदेकनिष्ठबुद्धिता। सुखं मोक्षः।। ६६।।

अयुक्तस्य भावना नेत्ययुक्तम्। कृतश्रवणमननस्य पुंसो ध्यानोपपत्तेरित्यत आह— **इन्द्रियाणामिति।** चक्षुरादींद्रियाणां स्वैरं विषयेषु चरतां गच्छतामनु पृष्ठभावितया मनो विषयान्प्रति विधीयते ईश्वरेण क्रियते यत्तन्मनस इन्द्रियाणां पृष्ठभावितया ईश्वरेण करणं अस्य पुंसः प्रज्ञां परोक्षनिश्चयं हरति। उत्पत्स्यत्यपरोक्षज्ञानं निवारयति। उत्पन्नमपि ज्ञानं चित्तनिरोधहीनस्य न ध्यानोपयोगि सदपरोक्षज्ञानाय प्रभवतीत्यर्थः। कथम्। अंभसि वायुर्नावमिव प्लवमिवेति।। ६७।।

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।।६८।।

प्रजहातीत्यादिनोक्तज्ञानिलक्षणस्यासंभवनिरासाय ज्ञानस्य महाप्रयत्नसाध्येंन्द्रियनिग्रहसाध्यत्वं 'विषया विनिवर्तन्त' इत्यादिना यदुक्तं तदुपसंहरति— **तस्मादिति।।** यस्मादेवं निगृहीतेन्द्रियस्यैवोक्तरूपः प्रसादः, प्रसादवत एव चित्तनिरोधरूपा युक्तिः,युक्तिमत एव श्रवणमनने, ताभ्यां तत्त्वनिश्चयः तत्त्वनिश्चयवत एवापरोक्षसाधनं ध्यानम्। तस्मात् हे महाबाहो! सर्वश इन्द्रियाणि सर्वाण्यपीन्द्रियाणि इन्द्रि-

यार्थेभ्यः रूपादिसर्वेन्द्रियविषयेभ्यो यस्य निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता। प्रसादयुक्तिश्रवणमननतत्त्वनिश्चयध्यानप्रणाड्या अपरोक्षधीः प्रतिष्ठिता प्रकर्षेण जायत इति।। ६८।।

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।। ६९।।

'स्थितप्रज्ञस्य का भाषेति' पृष्टं ज्ञानिलक्षणं 'प्रजहातीत्यादि' श्लोकचतुष्टयेनोक्त्वा, तस्यासंभवं च 'विषया' इत्यादि श्लोकनवकेनोक्त्वा 'तस्मादित्यनेन' तदुपसंहृत्येदानीं 'स्थितधीः किं प्रभाषेते' त्युत्तरार्धे भाषणादिप्रवृत्तिं परमानन्दतृप्तः किमर्थं करोतीति कृतज्ञानिप्रवृत्त्याद्याक्षेपस्योत्तरमाह— **या निशेति**।। यद्वा 'प्रजहातीत्यादि' श्लोकचतुष्टये विक्षिप्योक्तं ज्ञानिलक्षणं पिण्डीकृत्याह— **या निशेति**।। या भूतानां प्राणिनां निशेव निशा परमेश्वरस्वरूपलक्षणा यत्परमेश्वरस्वरूपं प्राणिनां निशास्थनीयमिति यावत्। निशायां सुप्तानीव न किंचिद्भगवत्स्वरूपं जानन्तीति भावः। तस्यां भगवत्स्वरूपलक्षणायां प्राणिनिशायां संयमी इन्द्रियसंयमयुक्तो ज्ञानी जागर्ति। भगवत्स्वरूपं सम्यगापरोक्ष्येण पश्यति। यस्यां विषयलक्षणायां भूतानि जाग्रति रूपादिविषयेष्वासक्त्याऽनुभववन्तो वर्तन्ते प्राणिनः सा निशा मुनेर्मननवतः। अत एव पश्यतोऽपरोक्षिणः सा निशेव निशा। न किञ्चिज्ज्ञानातीत्यर्थः। तथात्वे भाषणभिक्षाटनादिप्रवृत्त्यनुपपत्तिरिति चेत्। प्रारब्धकर्मणेषत्तिरोहितब्रह्मस्वरूपस्य वासनया प्रायोऽल्पाभिसंधिपूर्वकं प्रवृत्तीनां मत्तस्येवोपपत्तेरिति भावः। एतेन नित्यं भगवदेकचित्ततया तदितरत्राभिसंधिहीनत्वं ज्ञानिलक्षणमित्युक्तं भवति। एतच्च देवेतरज्ञानिलक्षणं बोध्यम्। अन्यथा सर्वप्रेरकाणां देवानामपि ज्ञानित्वात्तेषां भगवदितरत्राभिसंध्यभावे लोकयात्रोच्छेदापत्तेः। शब्दक्रमादर्थक्रमस्य बलवत्त्वात्। मुनेः पश्यत इति व्यत्यासेन मुनेर्मननवतः पश्यत इति पौर्वापर्येण योजना। ततश्च तयोर्हेतुहेतुमद्भावलाभः। स च मननादेः प्राक् दर्शनसाधनत्वस्य स्पष्टमनुक्तेः इह प्रसंगादुक्त इति।। ६९।।

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्।
तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी।। ७०।।

ननु ज्ञानिनो बाह्यानुसंधानहीनस्य मत्तस्येव युज्येतापि कथञ्चिद्रमनादिकम्। विषयानुभवस्तु दृश्यमानः कथं स्यात्। तस्य नियतसाधनसाध्यस्यानुसंधानेन विनाऽनुदयात्, इत्यतो ज्ञानिना क्रियमाणविषयानुभवप्रकारमाह— **आपूर्यमाणमिति**। नानानदीजलैरापूर्यमाणमपि अचलप्रतिष्ठं सरित्प्रवेशाद्वृद्धिविशेषहीनतया स्वभावत एव

स्थितम्। सरितामप्रवेशनिमित्तशोषहीनं च। सरित्प्रवेशार्थं यत्नहीनं चेत्यपि ध्येयम्। समुद्रमापो यद्वद्यथा प्रविशंति तद्वत् तथा यं ज्ञानिनं विषयैरापूर्यमाणत्वे वा अनापूर्यमाणत्वे वा उत्सेकानुत्सेकहीनं कामाः विषयाः प्रविशन्ति स ज्ञानी शान्तिं मोक्षम्। आप्नोति। न तु कामकामी कुत्सितविषयेच्छावान् शान्तिमाप्नोतीत्यर्थः। यद्वा विषयभोक्ताऽकामी कथमुच्यत इत्यत उक्तम्।। **न त्विति**।। एवं विषयाननुभवन्स ज्ञानी न कामकामी।। ७०।।

विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः।
निर्ममो निरहंकारः स शांतिमधिगच्छति।। ७१।।

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वा स्यामंतकालेऽपि ब्रह्मनिर्वाणमृच्छति।। ७२।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोऽध्यायः।। २।।

एतच्छ्लोकोक्तं प्रपञ्चयति— **विहायेति**। यो निःस्पृहो निषिद्धस्पृहाहीनः, निर्ममः स्वामित्वाभिमानहीनः निरहंकारः भक्षयामीति कर्तृत्वाभिमानहीनः चरति भक्षयति भक्षयामीति कर्तृत्वाद्यभिमानत्यागेन विषयाननुभवतीत्यर्थः। स एव पुमानन्यः पशुरिति वा स पुमान्शांतिमधिगच्छतीति वा ज्ञानिन इयं स्तुतिः।। ७१।।

"प्रजहाती" त्यादिनोक्तं ज्ञानिलक्षणप्रकरणं समापयति— **एषेति**। एषा 'प्रजहातीत्यादिनोपक्रान्ता' 'या निशे' त्यत्र निष्कृष्योक्ता ब्राह्मी ब्रह्मविषया स्थितिः। सर्वकामप्रहाणनित्यभगवदनुस्मृत्यादिरूपब्रह्मज्ञानिलक्षणरूपा स्थितिरिति यावत्। एनामुक्तरूपां स्थितिं प्राप्य न मुह्यति। भववेदनानुभववान्न भवति। अन्तकालेऽपि देहत्यागकालेऽपि अस्या भगवदनुस्मृत्यादिरूपस्थित्यां स्थित्वा निर्वाणं प्राकृतशरीरहीनं ब्रह्म ऋच्छति प्राप्नोति। प्रारब्धकर्माभावे यद्देहे ज्ञानोदयस्तद्देहत्यागकाले भगवदनुस्मृत्या तद्देहपातानन्तरमेव मुक्तिः। प्रारब्धसत्वे तु देहान्तरं प्राप्येति भावः। तथा च सूत्रम् 'ॐ भोगेन त्वितरे क्षपयित्वाऽथ संपत्स्यत ॐ' (४-१-१९) इति। ब्रह्मपदेन विरिञ्चोपादानव्यावृत्त्यर्थं निर्वाणमिति विशेषणम्। परब्रह्मप्राप्तेरेव मोक्षत्वादिति भावः।। ७२।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते द्वितीयोऽध्यायः।। २।।

तृतीयोऽध्यायः

अर्जुन उवाच-

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्मणि घोरे मां नियोजयसि केशव।। १।।

'एषा तेऽभिहिता सांख्ये' (२-३९) इत्यन्तेन 'न त्वेवाहं' (२-१२) इत्यादिना ग्रन्थेन जीवेश्वरस्वरूपमुक्त्वा, तज्ज्ञानोपायं च 'योगे त्विमां शृण्वि' ति (२-३९) प्रतिज्ञापूर्वं 'त्रैगुण्यविषया वेदा' (२-४५) इत्यादिनोक्त्वा 'कर्मजं बुद्धियुक्ता हि' (२-५१) इत्यादिना किंचित्प्रपंचनं तस्य कृतं पूर्वाध्याये। अत्र तु पूर्वोक्तस्यैव निवृत्तकर्मरूपज्ञानोपायशब्दितयोगस्यावश्यकार्यतया ज्ञापनरूपं प्रपंचनं प्राचुर्येण क्रियत इति पूर्वोत्तराध्याययोः पौर्वापर्यं ध्येयम्। 'दूरेण ह्यवरं कर्म' (२-४९) इत्युक्ते लब्धावसरः पृच्छति— **ज्यायसी चेति**। 'दूरेण ह्यवरं कर्म बुद्धियोगात्, कृपणाः फलहेतवः' (२-४९) इत्यादिनोक्तदिशा बुद्धिः कर्मणः सकाशात् ज्यायसी चेत् श्रेष्ठा यदि। हे जनार्दन, ते तव मता तत्तर्हि कर्मणि किं किमर्थं मां नियोजयसीत्येकः प्रश्नः। तत्रापि घोरे रागद्वेषाद्युपेते युद्धाख्ये कर्मणि किमर्थं नियोजयसीत्यन्यः। अयं भावः। 'सर्व एते पुण्यलोका भवन्ती' त्यादिफलश्रवणेन सर्वकर्मणां 'हतो वा प्राप्स्यसि स्वर्गं' (२-३७) इत्यादि युद्धस्यापि काम्यत्वात्तेषां च बुद्धियोगादवरत्वात्, यत्याश्रमविहितानां शमादीनां फलाश्रवणेनाकाम्यत्वात्, 'शांतो दांत' इत्युपक्रम्यात्मानं पश्येदिति ज्ञानार्थत्वश्रवणाच्च यत्याश्रमं स्वीकृत्य तद्धर्मनिष्ठो भवेत्येव नियोक्तव्यम्। न तु काम्यकर्मणि युद्धे युद्ध्यस्व भारतेति नियोजनं युक्तमिति। अत्र केशवशब्दार्थ उक्तः प्रथमाध्याये। न जायते अर्दयति च संसारमिति दशमभाष्ये। नञः परनिपातः अत एव नलोपाभावः। उत्तरपदे परतः तस्य स्मरणात् इति तट्टीकोक्तदिशा च जनार्दनशब्दार्थो ध्येयः इति।। १।।

व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्।। २।।

ननु 'बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसीति' (२-३९) बुद्धिपदोक्तयुद्धाख्यकर्मणोऽपि ज्ञानार्थत्वमुक्तमिति चेत्। तर्हि व्यामिश्रेण क्वचित्कर्मप्रशंसा क्वचिज्ज्ञानप्रशंसेत्येवम्, यद्वा युद्धस्य क्वचित्स्वर्गार्थत्वं क्वचिज्ज्ञानार्थत्वमित्येवं व्यामिश्रेण संदेहोत्पादकेन वाक्येन मे बुद्धिं मोहयसीव डोलायमानां करोषीव। यदि कामिनो युद्धं स्वर्गार्थम् अकामिनो ज्ञानार्थम् इति चेत्तथाऽपि यतिधर्म एव नियोगो युक्तो न तु वैकल्पिके युद्धे। अतो येनाहं श्रेयोऽवाप्नुयां, तदेकं निश्चित्य वदेति।। २।।

श्रीभगवानुवाच-

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।। ३।।

यद्यपि सर्वकर्माण्याश्रमत्रयविहितानि काम्यकामिभेदेन काम्यान्यकाम्यानि चेति वैकल्पिकानि। यतिधर्मास्तु शमादयः केवलमकाम्याः युद्धकर्मेव नरकाद्यनर्थहेतुरागद्वेषाद्युपेताश्च न भवन्ति, तथाऽपि तेषाम् अनाधिकारिकविषयत्वात्, तव च जनकप्रियव्रतादेरिव आधिकारिकत्वात्। 'सुखदुःखे समे कृत्वा' (२-३८) इत्यत्रोक्तदिशा भगवद्भक्त्या स्वधर्मत्वेनानुष्ठाने पापानवाप्तेर्वैकल्पिकेऽपि युद्धकर्मण्येव नियोज्य इति भावेनाद्यप्रश्नस्योत्तरमाह– **लोक इत्यादिना।** द्वितीयस्य तु श्रेयानित्यादिनाऽग्रे ध्येयम्। अस्मिन्लोके साधकवर्गे निष्ठा स्वरूपेण स्थितिः मुक्तिरिति यावत्। यद्वा निष्ठा नितरां संसारगतिनिवृत्तिर्द्विविधा द्विप्रकारा द्विविधसाधनसाध्येत्यर्थः। पुरा मया प्रोक्ता। हे अनघेति संबुद्धिः। कथमित्यत आह। सांख्यानां ज्ञानप्रधानानां देवानां सनकादियतीनां च। ज्ञानयोगेन, प्राचुर्याज्ज्ञानस्योक्तिः। अप्रचुरकर्मोपेतप्रचुरज्ञानोपायेन जपध्यानादिना निष्ठा मुक्तिः, योगिनां कर्मरूपोपायवतां कर्मयोगेनाप्रचुरज्ञानोपेतेन प्रचुरकर्मोपायेन निष्ठा मुक्तिः। योगिनामित्यनन्तरमितिशब्दोऽध्याहार्यः। अत्र भगवज्ज्ञानिनामप्युभयेषां न ज्ञानमात्रेण स्वयोग्ययावदानन्दानुभवरूपसंपूर्णमुक्तिः अपि तु कर्मसमुच्चितेनैव। तत्र केचन सनकादयो यतयः स्वगतज्ञानकर्मणोर्मध्ये ज्ञानप्रचुराः संतो मुक्तिभाजः। केचित्तु जनकप्रियव्रतादयो गृहस्थाः स्वगतज्ञानकर्मणोर्मध्ये प्रचुरकर्माणः संत एव मुक्तिभाजो भवन्ति। आधिकारिकतया तथैव भगवता क्लृप्तत्वात्। तथा च त्वमप्याधिकारिक इति कर्मणि विनियोज्य एवेति भावः। अत्र नीरमिश्रक्षीरे क्षीरशब्देप्रयोगवत्प्राचुर्याभिप्रायेण ज्ञानयोगेन कर्मयोगेनेत्येकैकोक्तिरिति ज्ञेयम्।। ३।।

न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति।। ४।।

यतिधर्माः शमादय एवानुष्ठेयाः न तु गृहिधर्माः। तत्रापि न घोरं युद्धकर्मेति वादिनं पार्थं प्रति तव जनकादेरिवाधिकारिकत्वात् वर्णाश्रमोचिताः धर्मास्त्वयाऽनुष्ठेया एवेत्युक्तम्। इदानीं कर्म न कार्यमिति वदतः किं कर्माकरणप्राप्यत्वहेतुना मुक्तेर्नैष्कर्म्यशब्दवाच्यत्वात्तदन्यथाऽनुपपत्त्या कर्म न कार्यमित्यभिप्रायः। उत कर्मणः संसारबीजत्वात्तदकरणं मुक्तिहेतुरिति। 'कर्मणा बध्यते जन्तुरि' ति स्मृतेः कर्मणो मुक्तिप्रतिबन्धकत्वाद्वा। आद्यं निराह– **नेति**।। कर्मणामनारंभादकरणान्नैष्कर्म्यं कर्माकरणप्राप्यत्वहेतुना नैष्कर्म्यशब्दवाच्यं मोक्षमश्नुत इति यत्त्वयोक्तम्, तन्न भवति। कुत इत्यत उक्तम्– **पुरुष इति**।। पुराणि शरीराणि सरति प्राप्नोतीति पुरुसः। पुरुस एव पुरुषः। हेतुगर्भमिदम्। सदा सूक्ष्मेण स्थूलेन वा देहेन युक्तत्वादिति। कर्माकरणमात्रेण मोक्ष इति पक्षे कदाचित्कर्मानधिकारि (र) शरीरस्यापि सम्भवेन तद्देहे कर्माकरणनिमित्तमोक्षप्राप्त्याऽधुना दृश्यमानं पुरुषत्वं न स्यादिति भावः। नैष्कर्म्यशब्दवाच्यत्वं तु काम्यकर्माप्राप्यत्वनिमित्तेनोपपन्नम्। मया तु निवृत्तकर्मण्येव नियोगः क्रियत इति भावः। द्वितीयमपि निराह– **नेति**।। कर्मणामनारंभादकरणान्नैष्कर्म्यं काम्यकर्माप्राप्यं मोक्षमश्नुते, संसारबीजभूतकर्माभावादिति त्वयोक्तं यत्तन्न। कुतः पुरुष इति। प्राग्वदेवार्थः। अनादौ संसारे कर्माधिकृतानंतजन्मसंभवेन सदा पुरुषशब्दितदेहयुतत्वात्तत्र कृतानंतकर्मणां भावेनाद्यतनदेहावच्छेदेन कर्माकरणमात्रेण संसारबीजाभावकृतमोक्षाशा कुतः स्यादिति भावः। तृतीयपक्षनिरासस्तु 'यज्ञार्थात्कर्मणोऽन्यत्र' इत्यादौ वक्ष्यते। ननु 'निष्कामं ज्ञानपूर्वं तु' इति स्मृतौ निवृत्तकर्मणा (णो) मोक्ष उच्यते। तस्य मोक्षहेतुत्वे फलांतराभाव एव युक्तिर्न त्वन्या। तथा च कर्माकरणस्यापि फलांतराभावरूपयुक्तिसाम्यात्, आयासाभावरूपगुणवत्त्वाच्च, कर्माकरणादपि मोक्षः स्यात्। 'एवं त्वयि नान्यथेतोऽस्ती' त्यादौ श्रुतः कर्माकरणे प्रत्यवायस्तु अमुमुक्षुविषतयोपपन्न इत्यत आह– **न चेति**।। सन्न्यसनात् काम्यकर्माकरणादेव, तन्मात्रादिति यावत्। अनेन निवृत्तकर्मकरणमुपलक्ष्यते। निवृत्तकर्मकरणमात्रात्सिद्धिं मोक्षं पुरुषो न समधिगच्छति न प्राप्नोति। किंतु तेनान्तःकरणशुद्धिविषयवैराग्यश्रवणमननध्यानज्ञानद्वारैव। 'निवृत्तं सेवमानस्तु ब्रह्माभ्येती' ति श्रु (स्मृ) तेरप्ययमेवाभिप्रायः। तथा च न तत्प्रतिबंद्या कर्माकरणस्य मोक्षहेतुत्वं शंक्यमिति भावः। ननु यत्याश्रमधर्माणां श्रुत्यादिसिद्धे मुक्तिहेतुत्वे फलांतराभावे एव युक्तिरिति तत्प्रतिबंद्यास्तु कर्माकरणस्य मुक्तिहेतुत्वमित्यतोऽप्युक्तम्– **न चेति**।। सन्न्यसनाद्यत्याश्रमादेवेत्यर्थः। स तु भगवति मनःसमाधानद्वारा (तत्प्रीतिविशेषद्वारा वा) मुक्तिहेतुर्न फलांतराभावत्त्वहेतुना। येन तत्प्रतिबंद्याऽपि फलांतराभावयुक्त्या कर्माकरणस्य मुक्तिहेतुत्वं शंक्येतेति। एतेन लोक

इति पूर्वश्लोकोक्तदिशा न केवलमाधिकारिकत्वात्तव कर्मणि नियोगः, अपि तु कर्माकरणस्य त्वदुक्तरीत्या मुक्तिहेतुत्वाभावादपीति हेत्वंतरमुक्तं भवति।। ४।।

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यतेह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।। ५।।

किंच कर्मणेत्यादिस्मृतिबलात् कर्मणो मुक्तिप्रतिबंधकत्वमिति तृतीयपक्षे स्मृतौ कर्मशब्दः संकुचितवृत्तिरिति वक्ष्यमाणोपोद्घाततया कर्माणि सर्वात्मना त्यक्तुं न शक्यानीत्याह— **न हीति।।** जातु कस्यांचिदवस्थायां क्षणमात्रमपि कश्चिदपि ज्ञोऽज्ञो वा अकर्मकृत्कर्माण्यकुर्वन्न तिष्ठति। कुत इत्यत उक्तम्— **कार्यत इति।।** सर्वः सर्वेण जनेन व्यत्ययात्। अवशः अवशेन 'अः इति ब्रह्म' (ऐ० आ० २-३-८) इति श्रुतेः। विष्णुवशेनैव सता स्वतंत्रकर्तृविष्ण्वधीनकर्तृताकेनैव (सता) कर्त्रा प्रकृतिजैर्गुणैः सत्त्वादिभिर्विकार(कर्तृ)भूतैः कर्म कार्यते। स्वतंत्रकर्त्रा भगवता विकारकर्तृसत्त्वादिभिश्च प्रेरितो जनः सदा किंचित्कर्म करोतीति हेतोरकर्मकृत्कोऽपि नेत्यर्थः।। ५।।

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते।। ६।।

यस्त्विद्रियाणि मनसा नियम्यारभतेऽर्जुन।
कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते।। ७।।

ननु शरीरयात्राद्यर्थकर्मणां त्यक्तुमशक्यत्वेऽपि यज्ञादिकर्मणां त्यक्तुं शक्यत्वात्तेषामस्तु त्यागः। न ह्यशक्यविषये शास्त्रप्रवृत्तिरस्ति। अतः 'कर्मणा बध्यत' इति कर्मत्यागपरे शास्त्रे कर्मशब्दो यज्ञादिकर्मपरो भविष्यतीत्यतो मन एव बंधमोक्षयोः प्रयोजकं न कर्मकरणाकरणे इति भावेन मनस एव प्राधान्यमाह— **कर्मेत्यादिश्लोकाभ्यां।।** कर्मेंद्रियाणि वाक्पाणिपादपायूपस्थानि। चक्षुरादीन्युपलक्ष्यंते। संयम्य निगृह्य यो मनसा इंद्रियार्थान् रूपादीन्मनसा स्मरन्नास्ते वर्तते। स विमूढात्मा भ्रांतः मिथ्याचारः कपटाचारः डांभिक उच्यत इत्यर्थः।। ६।।

यस्त्विद्रियाणि चक्षुरादिज्ञानेंद्रियाणि मनसा नियम्य असक्तः फलेच्छाहीनः सन् कर्मेंद्रियैः कर्मयोगं स्ववर्णाश्रमोचितकर्मरूपज्ञानोपायं आरभते करोति स विशिष्यते। पूर्वतनादधिको भवति। एतेन पूर्वश्लोके मनसो निग्रहाभावे बंध इत्यन्वयः, द्वितीये तु मनसो निग्रहे बंधाभाव इति व्यतिरेक उक्तः। तथा पूर्वत्र मनसोऽनिग्रहे मोक्षाभाव इति व्यतिरेकः, द्वितीये तु श्लोके मनसो निग्रहे मोक्ष इत्यन्वय इति बंधापेक्षया मन-

सोऽनिग्रहनिग्रहयोरन्वयव्यतिरेकौ, मोक्षापेक्षया च व्यतिरेकान्वयावित्युक्तदिशाऽभिप्रेततया बंधमोक्षयोर्मनोऽनिग्रहनिग्रहावेव प्रयोजकावित्युक्तं भवति। मनस एव प्रयोजकत्वज्ञापनाय मनसा स्मरन्नित्युक्तिः। अन्यथा स्मरणस्य मानसत्वाव्यभिचारान्मनसेति व्यर्थं स्यादिति ज्ञेयम्।। ७।।

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः।। ८।।

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः।
तदर्थं कर्म कौंतेय मुक्तसंगः समाचर।। ९।।

ततः किमित्यत आह— **नियतमिति**। हि यस्मादकर्मणः कर्माकरणात्कर्मानुष्ठानं ज्यायः प्रशस्ततमम्। अतो नियतं वर्णाश्रमोचितं कर्म कुरु। किंचाकर्मणः कर्माकुर्वतः ते तव शरीरयात्राऽपि देहनिर्वाहोऽपि न प्रसिद्ध्येदित्यर्थः।। ८।।

'कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते। तस्मात्कर्म न कुर्वंति यतयः पारदर्शिनः।।' इति स्मृतेर्मुक्तिप्रतिबंधकत्वात्कर्म न कार्यमिति प्राग्विकल्पितं तृतीयं पक्षं निराह— **यज्ञार्थादिति**। यज्ञो विष्णुः 'यज्ञो वै विष्णुरिति' श्रुतेः। तदर्थात् **विष्ण्वर्थात्**। यद्वा जानातीति ज्ञः। 'इगुपधज्ञाप्रीकिरः कः' स्वपरगताशेषविशेषज्ञत्वात्, ज्ञो विष्णुः। येनोद्देशेन यातो विषयीकृतः स उद्देशो यज्ञः। विष्णुविषयोद्देशार्थात्कर्मणोऽन्यत्र विष्ण्वन्यविषये विष्णूद्देशादन्योद्देशविषये वा। अयं लोको जनः कर्मबन्धनः। 'कृत्यल्युटो बहुलमि' ति कर्तरि ल्युट्। कर्म बंधनं बंधकं यस्य स कर्मबंधनः। अवैष्णवकर्मैव प्रतिबंधकं न वैष्णवं कर्म। 'कर्मणेति' स्मृतौ कर्मपदमवैष्णवकर्मपरं न तु कर्ममात्रपरम्। अत एव प्राक् 'न हि कश्चिदिति' श्लोके कर्मणेति स्मृतिबलात्कर्ममात्रं न करोमीति त्वया वक्तुमशक्यम्। स्मृतौ कर्मपदस्य संकोचस्त्वयाऽप्यभ्युपेय इति भावेनाकर्मकृत्कोऽपि नास्ति। सदा भगवदादिप्रेरितः (किंचित् कर्म) कुर्वन्नेव सर्वोऽप्यास्ते इत्यसंकुचितवृत्तित्वे बाधकमुक्तम्। तथा शरीरयात्राऽपीत्यत्रापि देहनिर्वाहाभावो बाधक उक्तः। अतस्तदर्थं भगवत्पूजार्थं मुक्तसंगः फलकामनाहीनः सन्कर्म समाचर कुर्विति।। ९।।

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।। १०।।

देवान्भावयताऽनेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।। ११।।

इष्टान्भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः।। १२।।

यज्ञशिष्टाशिनः संतो मुच्यन्ते सर्वकिल्बिषैः।
भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात्।। १३।।

वर्णाश्रमोचितकर्मणः सर्वथा कर्तव्यत्वे स्तुतिनिंदापरकृतिपुराकल्परूपार्थवादं चाह— **सहेत्यादिचतुर्भिः श्लोकैः।।** यज्ञैः सह वर्तंत इति सहयज्ञाः ब्राह्मणादिप्रजाः पुरा सर्गादौ सृष्ट्वा प्रजापतिरुवाच। किमुवाचेत्यत आह— **अनेनेत्यादिना कारणादित्यन्तेन।।** हे प्रजाः— अनेन यज्ञेन यूयं प्रसविष्यध्वम्। इष्टकामानिति शेषः। स्वस्वाभिमतपुमर्थान्संपादयत। एष यज्ञः वो युष्माकमिष्टकामधुक्। कामा भोगाः तान्दोग्धीति कामधुक्। इच्छाविषयभोगप्रदोऽस्तु।। १०।।

कथमिष्टकामदोग्धृत्वं यज्ञस्येत्यत आह— **देवानिति।** हे प्रजाः, अनेन यज्ञेन यूयं देवान् भावयत। संभावयत, हविर्भिः तर्पयत। ते हविरादिभिस्तृप्ता देवा वो युष्मान् भावयन्तु। इष्टाकामदानेन तर्पयन्तु। एवमन्योन्यं भावयन्तो देवाश्च यूयं च परं श्रेयो मोक्षाख्यमवाप्स्यथ।। ११।।

एतदेव स्पष्ट(यन्)यितुं कर्माकरणे दोषमाह— **इष्टानिति।।** यज्ञैर्भाविता देवा वो युष्मभ्यम् इष्टान् भोगान्दास्यन्ति। तैर्देवैर्दत्तान्नादींस्तेभ्यो यज्ञादिभिरप्रदाय यो भुङ्क्ते सः स्तेन एव चोर एव।।१२।।

एवमयजतो विनिन्द्य यजतः स्तौति— **यज्ञेति।।** विष्णुतदितरदेवाराधनावशिष्टभोजिनः संतः सर्वकिल्बिषैः पापैः मुच्यन्ते। यद्वा वैश्वदेवादियज्ञावशिष्टभोजिनः संतः सर्वकिल्बिषैः "खण्डनी पेषणी चुल्ली उदकुंभी च मार्जनी। पंचसूना गृहस्थस्य ताभिः स्वर्गं न विन्दति।।" इत्युक्तपंचसूनाकृतदोषैर्मुच्यंत इत्यर्थः। पुनरयजतो निन्दति।। भुंजत इति। आत्मकारणात्स्वार्थमेव ये पचन्ति ते पापाः अघमेव अघनिमित्तमेव भुंजते तद्भोजनं पापहेतुरेवेत्यर्थः। इति प्रजापतिरुवाचेति इति शब्दो योज्यः।। १३।।

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः।
अज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।। १४।।

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।। १५।।

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति।। १६।।

वर्णाश्रमोचितकर्मणः सर्वथा कर्तव्यत्वे स्तुत्याद्यात्मकार्थवादं चतुर्भिरुक्त्वा, अधुना जगच्चक्रप्रवर्तकत्वरूपं हेत्वन्तरं विपक्षेऽनर्थोक्त्याऽऽह— **अन्नादित्यादित्रिभिः श्लोकैः।।** अन्नाद्भूतानि भवन्ति, रेतोद्वारा प्राणिन उत्पद्यन्ते। पर्जन्यादादित्यादन्नसंभवः वृष्टिद्वारा अन्नस्योत्पत्तिः। पर्जन्यो मेघचक्राभिमानी आदित्यः यज्ञाद्भवति। यज्ञशब्दोऽत्राज्यादिहविः परः। यजमानदत्तानां (दत्तेन) आज्यादिहविषामुपभोजनेनादित्यस्य ब्रलाद्युपचयान्निमित्तादुपचारेण "यज्ञाद्भवति पर्जन्य" इत्युच्यते। यद्वा पर्जन्यशब्देनादित्याभिमन्यमानं मेघचक्रमेव लक्षणया वा, 'जननात्परसस्यादेः पर्जन्यो मेघसंततिरिति' (नारदीये) स्मृत्युक्तयोगवृत्त्या वा ग्राह्यम्। तच्च यज्ञाद्भवति। हविर्भागेन परितुष्टादादित्यादुत्पद्यते। 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः' (नारदीये) इत्यादेः। वृष्टिर्वार्षिकमेघचक्रं जायत इत्यर्थः। यज्ञो देवतोद्देशनद्रव्यत्यागरूपो ज्योतिष्टोमादिः कर्मसमुद्भवः। तदंगक्रिययोत्पद्यते।। १४।।

कर्म ब्रह्मोद्भवं परब्रह्मजन्यं विद्धि जानीहि। ब्रह्म परब्रह्म चाक्षरसमुद्भवम्। अक्षरशब्दितवेदाभिव्यंग्यम्। वेदेन यथावदवगतमेव ब्रह्म सत्कर्म कारयतीति भावः। तानि चाक्षराणि भूतव्यंग्यानीति शेषोक्त्या चक्रं ध्येयम्। तस्मादुक्तपरंपरया यज्ञाभिव्यंग्यत्वात्सर्वगतं ब्रह्म "नित्यं यज्ञे प्रतिष्ठितमि" त्युच्यते। एवं च भगवतो यज्ञे प्रतिष्ठितत्वात् यज्ञानुष्ठानेन चक्रप्रवृत्तौ भूतस्थितिहेतुत्वनिमित्तसुकृतमिव भगवदभिव्यक्तिनिमित्तं च सुकृतं भवतीति भावः।। १५।।

एवं पुरातनैः प्रवर्तितं भगवतैव वा प्राणिनामिष्टसिद्धये प्रवर्तितं जगच्चक्रं इह लोके यो नानुवर्तयति कर्म न करोतीति यावत्। विश्वस्य चक्रेऽन्तर्भावात् कर्माकरणेन (कर्माकरणे) चक्राप्रवृत्तौ चक्रविनाशकत्वेन विश्वहन्तृत्वात् स अघायुः। तादर्थ्यात्ताच्छब्द्यम्। अघनिमित्तमायुर्यस्य स तथा। इंद्रियारामः इंद्रियैर्विषयेषु रतिमान्। हे पार्थ, व्यर्थमेव जीवति नरके मज्जतीत्यर्थः। यज्ञदानतपोरूपत्रिविधकर्मणां गृहस्थानामिव ब्रह्मचर्याद्याश्रमत्रयस्यापि विद्यादानाभयदानस्वभोक्तव्यान्नदानस्य च तथाऽध्ययनप्रवचनध्यानादिरूपवाचिकमानसिकयज्ञस्य तथा कृच्छ्रचांद्रायणादितपसः सत्वेन तेषामपि चक्रप्रवर्तनसंभवो ज्ञेयः। उक्तं हि "वाचिको मानसो यज्ञो न्यासिनां तु विशेषत" इत्यादि (नारदीये)।।१६।।

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते।। १७।।

एवं 'न कर्मणामनारंभात्' इत्यादिना 'सह यज्ञा' इत्यादिना चोक्तदिशा कर्माकरणतत्करणयोर्हानिलाभौ चेत्तर्हि परमेश्वरे असंप्रज्ञातसमाधिरूपं मनः समाधानमपि न कार्यं प्रसज्येत। तत्र कर्मलोपस्यावश्यकत्वादित्यत आह– **यस्त्विति**।। तुशब्दः समाधिस्थत्वविशेषसूचकः। यस्त्वसंप्रज्ञातसमाधिस्थः मानवोऽपरोक्षज्ञानी। मनुतेरवण्। आत्मरतिरेव। अत्रात्मशब्दः सर्वोऽपि परमात्मपरः। आत्मनि आत्मनो वा रतिमान्दर्शनजन्यसुखवान्। परमात्मविषयकदर्शनजन्यसुखवानेव न त्वन्यत्र रतिमानित्येवकारार्थः। भगवतोऽन्यत्र रतिराहित्यं न प्रायेणेति मंतव्यं किंतु सर्वात्मनेत्याह– **आत्मतृप्त इति**।। आत्मना तृप्तः परमात्मप्रसादेनैव। तदन्यत्र सर्वात्मनाऽलंबुद्धिमानित्यर्थः। अन्यत्रालंबुद्धिरपि भगवत्प्रसादायत्तेति भावः। किंचातिशयितं सुखं दत्वा भगवानन्यत्र सर्वात्मनाऽलंबुद्धिमुत्पादयतीत्यतोऽन्यत्रालंबुद्धौ हेतुतया प्रागुक्तरत्याख्यमेव सुखमाह– **आत्मन्येव च संतुष्ट इति**।। सम्यक् तुष्टिमान् संतुष्टः महासुखवानित्यर्थः। हेतुगर्भमिदम्। भगवद्दर्शननिमित्तकमहासुखवत्त्वादन्यत्रालंबुद्धिमानिति। भगवद्दर्शननिमित्तकं महासुखं केन हेतुना स्यादित्यतस्संतुष्टत्वे हेतुरात्मन्येवेति। अधिकरणसप्तमी। आत्मनि स्थित एव सन्संतुष्ट इति। असंप्रज्ञातसमाधिरूपयाऽऽत्मनि स्थित्यैव संतुष्टो न त्वन्येन केनापीत्येवकारार्थः। अत्र मानव इति उक्तिः अपरोक्षिण एवासंप्रज्ञातसमाधिरिति द्योतयितुम्। यस्त्वेवंरूपः तस्य कार्यं कर्तव्यं संध्यावंदनादिकं किमपि कर्म न विद्यते।। १७।।

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः।। १८।।

ननु कर्मकरणाकरणयोर्लाभहानी चेत्तर्हि समाधिर्न कार्यः प्रसज्येतेति चोदिते समाधिस्थस्य कार्यं न विद्यते इत्युत्तरं कस्मादुक्तम्। कर्मकृतिकाले त्वयाऽहमुद्बोधनीय इति कंचित्प्रत्युक्त्वा समाधौ स्थितः सन् तेन योगशास्त्रोक्तैरुपायैरुद्बोधितः कर्म करोतीत्येवोत्तरं कुतो नोक्तमित्यत आह– **नैवेति**।। तस्यासंप्रज्ञातसमाधिस्थस्य समाधिं विनेह कृतेन यज्ञादिकर्मणाऽऽत्मरत्याधिकस्तत्समो वाऽर्थः पुमर्थो नास्ति। ननु यज्ञादिकरणार्थं उत्थानाभावेऽपि नित्यनैमित्तिककर्माकरणे प्रत्यवायात् तत्करणार्थं समाधित उद्बोधनं आवश्यकमित्यत आह– **नाकृतेनेति**।। तस्य समाधिस्थस्याकृतेन कर्मणा संध्यावंदनादितत्तत्कालानुष्ठेयकर्माभावेन कश्चन दोष इति शेषः, नास्ति। ननु

समाधिस्थस्याल्पस्य यज्ञादेरनुष्ठाने फलाभावेऽपि संध्याद्यकृतौ प्रत्यवायाभावेऽपि गुरुदेवतादिषु पूजाकरणाकरणयोरर्थप्रत्यवायौ स्यातामेवातस्तत्सन्निधानप्राप्तौ उद्बोधनमावश्यकमित्यत आह– **न चेति**।। अस्यासंप्रज्ञातसमाधिस्थस्य। सर्वभूतेषु। विषयसप्तमीयम्। अर्थव्यपाश्रयः अर्थस्य व्यपाश्रयः प्राप्तिः येन दर्शनसंभाषणपूजनादिव्यापारेण भवति सोऽर्थव्यपाश्रय इति व्यधिकरणबहुव्रीहिः। गुर्वादिविषयकदर्शन-(सं)भाषणवंदनादिव्यापारः पुमर्थप्राप्तिहेतुभूतः समाधिस्थस्य नास्तीत्यर्थः। चशब्दः पूर्वार्धोक्तसमुच्चये। गुर्वादिविषयव्यापारेणाप्यात्मरतितुल्यं सुखं न लभ्यत इत्यभिप्रायः। एवं तत्पूजाद्यकरणमपि समाधिस्थस्य नानर्थप्राप्तिहेतुरित्युपलक्ष्यते। यद्वा न केवलं चक्रप्रवर्तकत्वेन भूतस्थितिहेतुत्वात्कर्म कर्तव्यम्। किंतु मुक्तस्यैवाकर्मत्वादमुक्तेनावश्यं कर्म कार्यमिति तस्मादित्यनेन वक्तुं अकर्मत्वं मुक्तस्यैवेत्याह– **यस्त्विति**।। यस्तु मानवः प्राप्तज्ञानफलो मुक्तः आत्मरतिः आत्मना परमात्मना रतिः अभिव्यक्तस्वरूपानन्दो यस्य सः तथा। आत्मना परमात्मना तृप्तः कृतकृत्यः आत्मतृप्तः आत्मन्येव च संतुष्टः प्रीतिमान्। यद्वा तृप्तिसंतोषशब्दयोः प्रीतिरूपैकार्थत्वेऽप्यात्मना तृप्तः प्रीतिमान् आत्मन्येव च संतुष्ट इत्येव (इत्येतावता) अर्थभेदो ध्येयः। तस्य तु तस्यैवेति तुशब्दोऽत्र योज्यः। मुक्तस्यैव कार्यं न विद्यते। ननु 'कृष्णो मुक्तैरिज्यते वीतमोहैः' इत्युक्तेर्मुक्तस्यापि कर्म कर्तव्यमित्यत आह– **नैवेति**।। प्राग्वदेवार्थः स्वेच्छयैव करणं न विधिबद्धत्वेन। न वा फलापेक्षया, तस्यैव फलरूपत्वेन फलांतराभावादिति भावः।।१८।।

तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः।। १९।।

तस्मादसंप्रज्ञातसमाधिस्थस्य वा मुक्तस्यैव वाऽकर्मत्वेन त्वादृशेनावश्यं कर्मणः कर्तव्यत्वादसक्तः फलस्नेहरहितः सन् कार्यमवश्यकर्तव्यं कर्म सततं समाचर भगवत्पूजात्वेनानुतिष्ठ। ननु मुक्तस्य कर्मणा प्रयोजनाभावात् (यथा) कार्याभावः। एवं मुमुक्षोरपि कर्मणा फलाभावात्कार्याभावः किं न स्यादित्यत आह– **असक्त इति**।। पुरुषः असक्तः कर्माचरन्नेव ज्ञानद्वारा परमाप्नोति हि यस्मात्तस्मान्मुक्तसमाधिस्थाभ्यामन्यस्य कर्मणा फलसत्वादस्त्येव कार्यमिति भावः।। १९।।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि।। २०।।

ननु ज्ञानादेव मोक्षसिद्धेः कथं 'असक्तो ह्याचरन्नेवेति' उच्यत इत्यतो मुक्तावानंदातिशयार्थं विहितकर्मणोऽवश्यकर्तव्यतायां ज्ञानिनामाचारमपि प्रमाणयति– **कर्मणैवेति**। सहयोगे तृतीया। जनकादयो जनकप्रियव्रतादयो ज्ञानिनः कर्मणैव कर्मसहिता एव कर्म कुर्वंत एव संसिद्धिं संपूर्णमोक्षमास्थिताः प्राप्ताः। ज्ञानमात्रान्मुक्तिसिद्धावपि तत्रानंदातिशयार्थं कर्म कुर्वंतीत्यर्थः। तृतीयायाः करणार्थत्वेऽपि कर्मणा करणेन संसिद्धिं मोक्षमाप्ता इत्यर्थः। लांगलेन जीवाम इतिवज्ज्ञानद्वारकत्वाभिप्रायं करणत्वमिति। यद्वा संसिद्धिं ज्ञानं कर्मणा प्राप्ता इत्यर्थः। न केवलं ज्ञानिनामाचारात्कर्म कर्तव्यं किं त्वीश्वरप्रीतिद्वारा मुक्तिहेतुलोकसंग्रहार्थत्वाच्च कर्म कार्यमित्याह– **लोकेति**।। लोकानामज्ञजनानां कर्मणि प्रवृत्तिरूपं संग्रहमेवापि। न केवलं ज्ञान्याचारमित्यपेरर्थः। एवकारस्तु तिष्ठतु तावत्कर्मकरणेऽन्यो हेतुरित्यर्थसूचकः तथा च मोक्षे सुखातिशयः इति ज्ञेयम्। तदुक्तं– 'अज्ञानां ज्ञानदं कर्म ज्ञानिनां लोकसंग्रहात्। अद्धैव तुष्टिदं मह्यं सा मुक्तानन्दपूर्तिदा' इति (कृष्णसंहितायां)।। २०।।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।। २१।।

कथं कर्मकरणेन लोकसंग्रह इत्यत आह– **यद्यदिति**।। श्रेष्ठो महात्मा यत्प्रमाणं कुरुते यद्वाक्यादिकं प्रमाणं सदपि लोके प्रमाणत्वेनानवगतं प्रमाणतया ज्ञापयतीत्यर्थः। यद्वा यत्प्रमाणमित्येकं पदं बहुव्रीहिः। यत्प्रमाणं लौकिकं वैदिकं वा कर्म कुरुते तदेव लोकोऽनुवर्तते अनुसरति।। २१।।

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि।। २२।।

यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः।
मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः।। २३।।

उत्सीदेयुरिमे लोका न कुर्यां कर्मचेदहम्।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः।। २४।।

किञ्च प्रयोजनमात्रहीनेनापि मया केवलानुग्रहेण लोकसंग्रहार्थं कर्म क्रियते मुक्तावानंदवृद्धिप्रयोजनवता ज्ञानिना तत्कर्तव्यमिति किं वाच्यमिति भावेनाह– **न म इत्यादि त्रिभिः**।। हे पार्थ मे किंचन कर्तव्यं नास्ति। यतस्त्रिषु लोकेषु प्रागप्राप्तं पश्चात्प्राप्तव्यं नास्ति। तथाऽपि कर्मणि वर्त एव। कर्म करोम्येव।। २२।।

यदि ह्यहं जातु कदाचिदतंद्रितोऽनलसः कर्मणि न वर्तेयं न कर्म कुर्यां तर्हि मम वर्त्म मार्गं कर्माकरणरूपं मनुष्याः सर्वशः सर्वेऽपि अनुवर्तंते अनुसरेयुः। मद्दृष्टांतेन कर्म न कुर्युरित्यर्थः।। २३।।

ततः को दोष इत्यत उच्यते। अहं चेत्कर्म न कुर्यां तदा इमे लोकाः उत्सीदेयुः (नश्येयुः) कर्मलोपेन नरकं प्राप्नुयुः। किं च कर्मलोपे सति ब्रह्मक्षत्रादिवर्णविवेको न स्यात्। अतो वर्णसंकरस्य च कर्ता स्यां भवेयम्। एवमहमेव प्रजाः उपहन्यां हतवान् भवेयम्।। २४।।

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम्।। २५।।

ननु अज्ञवदाग्रहेण ज्ञानिनाऽपि कर्म कार्यं चेद्विद्वदविद्वत्कर्मणोरविशेषप्रसंग इत्यत आह– **सक्ता इति**।। हे भारत अविद्वांसोऽज्ञाः कर्मणि सक्ताः अभिनिविष्टाः फलेच्छावंतः संतो यथा कर्म कुर्वंति तथा विद्वान् ज्ञान्यपि असक्तः फलेच्छाहीनः सन् लोकसंग्रहं चिकीर्षुः कर्म कुर्यादित्यर्थः। सक्त्यसक्तिपूर्वकत्वेन कर्मानुष्ठानं तयोर्विशेष इति भावः।। २५।।

न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम्।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्।। २६।।

अज्ञानां कर्मणि सक्तिं जनयितुमपि ज्ञानिना कर्म कार्यमित्याह– **न बुद्धीति**।। अज्ञानां भगवत्स्वरूपमजानतां कर्मसंगिनां कर्माभिनिवेशिनां बुद्धेर्भेदं विपर्यासं न जनयेत्। कर्मानुष्ठानाद्बुद्धेश्चालनं न कुर्यात्। विद्वान्युक्तो भगवति मनोयोगवान् तत्पूजात्वेनेति यावत्, कर्म समाचरन् सर्वकर्माणि जोषयेत्। सेवयेत् अज्ञानिति शेषः।। २६।।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताऽहमिति मन्यते।। २७।।

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्तंत इति मत्वा न सज्जते।। २८।।

प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु।
तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचालयेत्।। २९।।

ज्ञान्यज्ञानिनोः सक्ता इत्यादिश्लोकद्वयोक्तं कर्मानुष्ठानवैलक्षण्यं प्रपंचयति— **प्रकृतेरित्यादिश्लोकत्रयेण।।** अत्र प्रकृतिशब्देन जीवस्वभावेश्वरजडप्रकृतयो ग्राह्याः। प्रकृतेः प्रकृष्टकृतिमत्त्वहेतुना प्रकृतिपदवाच्यस्य हरेः गुणैरिच्छाज्ञानप्रयत्नादिरूपगुणैर्धर्मैः स्वतंत्रैः। तथा प्रकृतेः उत्तममध्यमाधमरूपजीवराशिस्वभावस्य गुणैरनुगुणैः तत्त्वज्ञानमिश्रज्ञानमिथ्याज्ञानादिरूपधर्मैरीशाधीनैः। तथा प्रकृतेः जडप्रकृतेः संबंधिभिः गुणैस्तत्कार्यभूतैः सत्त्वरजस्तमोगुणैः प्रकृतेर्विकारभूतैर्देहेंद्रियान्तःकरणरूपगुणैः क्रियमाणानि कर्माणि साधुकर्ममिश्रकर्मासाधुकर्माणि प्रति अहंकारविमूढात्मा सन् कर्ताऽहं स्वतंत्रकर्ताऽहमिति मन्यते। ईश्वरः स्वतंत्रकर्ता सन् स्वज्ञानेच्छादिना स्वाधीनकर्त्रा त्रिविधजीवस्वभावमनुसृत्य प्रकृतिविकारजीवकरणैः प्रकृतिकार्यसत्त्वादिगुणरूपोपादानकारणेन कर्म कारयति। तत्क्रियमाणकर्मणामहमेव स्वतंत्रकर्तेत्यात्मानम् अज्ञो जनो मन्यत इत्यर्थः।। २७।।

एवमविद्वान्करोति चेत् विद्वान्कथमित्यत आह— **तत्त्वविदिति।।** गुणकर्मविभागयोः गुणानामिच्छादिभगवद्गुणानां सत्त्वादिप्रकृतिगुणानां प्रकृतिविकारतया प्रकृत्युपसर्जनभूतचक्षुरादींद्रियशरीरमनसां चान्योन्यमुक्तविधया विभागस्य तथा कर्म च स्वतंत्रभगवत्कर्तृकं तदायत्तजीवकर्तृकं विकाररूपप्रकृतिकर्तृकं चेति कर्मविभागस्य तत्त्ववित्तु तत्त्वज्ञानी तु गुणा भगवदिच्छादयः गुणेषु जीवस्वभावकर्मादिषु प्रेरकत्वेन वर्तन्ते। भगवदिच्छाद्यनुसारेण च गुणा इंद्रियाणि गुणेषु शब्दादिविषयेषु वर्तन्ते। अतो जीवस्य न क्वापि स्वातंत्र्यमिति मत्वा न सज्जते। स्वात्मनः कर्तृत्वाभिमानेन संसारमग्नो न भवतीत्यर्थः।। २८।।

स्वात्मनः स्वतंत्रकर्तृतां मन्यमानाः अविद्वांसः ज्ञानिना बोधनीया इत्यत आह— **प्रकृतेरिति।।** प्रकृतेरीश्वरस्येच्छादिगुणैः कर्तृभूतैः। प्रकृतेर्जडस्य कार्यभूतसत्त्वादिगुणैर्निमित्तैः प्रकृतेर्जडस्य विकारभूतगुणेष्विंद्रियेषु संमूढाः ममैवैतानि करणानि इति तेषु स्वातंत्र्याभिमानिनः अत एव गुणकर्मसु गुणेषु शब्दादिविषयेषु सज्जन्ते स्नेहातिशयवन्तो भवन्ति, स्वकर्मसु च सज्जन्ते स्वातंत्र्यभ्रमवन्तो ये तानकृत्स्नविदः गुणकर्मविभागाज्ञान्मंदानयोग्यजनान् स्वयं कृत्स्नविज्ज्ञानी न विचालयेत्। गुणकर्मसु संगं त्याजयित्वा सन्मार्गे न प्रवर्तयेदित्यर्थः। 'शब्दाद्या इन्द्रियाद्याश्च सत्त्वाद्याश्च शुभानि च' इत्यादेः गुणशब्दोऽनेकार्थो ध्येयः।। २९।।

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः।। ३०।।

एवमविद्वत्कर्मणो विद्वत्कर्मणोऽनभिमानेनानुष्ठानरूपवैलक्षण्यमुक्त्वेदानीं तवापि ज्ञानित्वात्तथैवानुष्ठेयं कर्मेत्याह— **मयीति**।। अध्यात्मचेतसा आत्मानं परमात्मानं मामधिकृत्य स्थितमध्यात्मम्, अध्यात्मं च तत् चेतश्च तदध्यात्मचेतः तेनेति वा। अधि अधिकं स चासावात्मा चाध्यात्मा। अध्यात्मनि चेतोऽध्यात्मचेतः तेनेति वा। सर्वाधिकपरमात्मभूतमन्निष्ठमनसा निराशीः विष्णुभक्तिज्ञानाद्यन्यकामरहितः निर्ममः कर्मण्यहमेव स्वातंत्र्येण करोमीति स्वतंत्रकर्तृताऽभिमानहीनो भूत्वा सर्वाणि कर्माणि मयि सन्यस्य भगवान् कृष्ण एव मयि स्थित्वा सर्वकर्माणि करोतीति ज्ञात्वा तानि च श्रीकृष्णपूजारूपाणीति मयि समर्प्य विगतज्वरः त्यक्तशोकः सन् युध्यस्वेति। तदुक्तं— 'नाहं कर्ता हरिः कर्ता तत्पूजा कर्म चाखिलम्' (ब्रह्मतर्के) इत्यादि।। ३०।।

ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः।
श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः।। ३१।।

ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतम्।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः।। ३२।।

विद्वांस एवं कर्म कुर्वंतीत्येतावता मयाऽप्युक्तविधया कर्म कार्यमिति कुत इत्यतः स्वोक्तस्य करणे अकरणे च फलमाह— **ये म इत्यादिश्लोकद्वयेन**।। ये मानवाः श्रद्धावंतः मद्वाक्येष्वास्तिक्यबुद्धिमंतः, अनसूयंतः कष्टे कर्मणि प्रवर्तयतीति मयि दोषदृष्टिमकुर्वंतः संतः इदं पूर्वोक्तश्लोकोक्तरीत्या कर्मानुष्ठानरूपं मे मतं नित्यमनुतिष्ठंति तेऽपि कर्मभिर्निवृत्तकर्मभिर्मुच्यंते, ज्ञानद्वारेति योज्यम्। किमुतापरोक्षज्ञानिनो मुच्यंत इति कैमुत्यसूचनार्थोऽपि शब्दः। एतत्सूचनं च प्रासंगिकं ध्येयम्।। ३१।।

ये तु एतन्मे मतम् अभ्यसूयंतः कष्टं कर्मेति दोषदृष्टिमंतः संतो नानुतिष्ठंति तानचेतसः विवेकशून्यान् अत एव ज्ञातव्यसर्वज्ञानविषये विमूढान् विशेषेण मिथ्याज्ञानिनः अत एव नष्टान् नरकाद्यनर्थभाजो विद्धि जानीहि।। ३२।।

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति।। ३३।।

यदि त्वन्मतानुष्ठाने मोक्षः अन्यथा तु नाशः तर्हि ते मतं किमिति लोको नानुतिष्ठतीत्यत आह— **सदृशमिति**।। प्रकृतिशब्दोऽत्र पूर्वसंस्कारार्थः सन् तत्कार्यरागद्वेषोपलक्षकः। ज्ञानवानपि मन्मतकरणाकरणयोरिष्टानिष्टज्ञानवानपि। स्वस्याः प्रकृतेः स्वकीयपूर्वसंस्कारकार्यरागद्वेषयोः सदृशमनुगुणमेव चेष्टते। कर्म करोति। किमु-

ताज्ञ इत्यपेरर्थः। ननु मनोनिग्रहे स्वभावानुगतचेष्टोपरतिः स्यादित्यत आह— **प्रकृतिमिति**।। प्रकृतिं स्वभावं यांति प्राणिनः। तत्र मनोनिग्रहः किं करिष्यति न किमपीत्यर्थः। तदुक्तं— 'बुध्वाऽप्यसौ यतो नित्यस्वभावानुगचेष्टितः। स्वभावं यांति भूतानि निग्रहः किं करिष्यति' (प्रकाशसंहितायां) इति। यद्वा मंदान्न विचालयेदित्ययोग्येषु तत्त्वबोधो न कार्य इत्युक्तं, तत्कुत इत्यत आह— **सदृशमिति**।। प्रागिवार्थः। तत्त्वोपदेशेनोत्पन्नज्ञानवानपि स्वभावानुगुणचेष्टावानेव भवति। न तूपदेशजन्यज्ञानानुरूपचेष्टावानपि भवति। अतस्तत्र तत्त्वोपदेशो व्यर्थ इति भावः।।३३।।

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ।। ३४।।

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।। ३५।।

यदि सर्वाणि भूतानि स्वभावानुगुणमेव चेष्टते निग्रहोऽकिंचित्करः, तर्हि 'मयि सर्वाणि' इत्यत्रेतिकर्तव्यतापूर्वं कर्मविधानं 'ये मे मतं' इत्यादिना तस्य फलोक्तिश्च व्यर्थेत्यत आह— **इंद्रियस्येति**।। जात्येकवचनम्। इंद्रियाणां चक्षुरादीनामर्थेषु रूपादिषु इंद्रियाणां रागद्वेषौ अनुकूले रागः प्रतिकूले द्वेषश्चेत्येवं रागद्वेषौ व्यवस्थितौ अवश्यंभाविनौ। लोभमोहमदमत्सराणामुपलक्षणम्। प्राधान्याद्द्वयोरेवोक्तिः। तदनुरूपा च प्राणिनां चेष्टेति निग्रहोऽकिंचित्करो यद्यपि, तथाऽपि तयो रागद्वेषयोः रागादिषड्वर्गवशं न गच्छेत् न प्राप्नुयात्। कुतः। हि यस्मादस्य श्रेयोऽर्थिनः तौ परिपन्थिनौ श्रेयोविघातकौ पापहेतू चात इत्यर्थः। निग्रहात्सद्यः फलाभावेऽप्यतिप्रयत्नवतो भवत्येव फलमिति भावः। उक्तं हि 'संस्कारो बलवानेव' इत्यादि। एतच्च योग्यजनविषयं ध्येयम्।। ३४।।

'ज्यायसी चेत्' इत्यत्रार्जुनेन कर्मैव न कार्यम्। तत्रापि नरकाद्यनर्थहेतुरागद्वेषोपेततया घोरं युद्धाख्यं कर्म तु नैव कार्यमिति कृताक्षेपद्वयमध्ये प्राथमिको 'लोकेऽस्मिन्' इत्यादिनोत्तरितः। द्वितीयस्त्वधुना 'युध्यस्व विगतज्वरः'। 'तयोर्न वशमागच्छेत्' इत्याद्युक्त्या स्मारितः सन्परिह्रियते— **श्रेयानिति**।। स्वधर्मः स्ववर्णाश्रमोचितो धर्मः विगुणः अंगहीनोऽपि स्वनुष्ठितात् सर्वांगसाकल्येन कृतात्परधर्मादन्यवर्णाश्रमोचितधर्मादपि श्रेयानधिकतरः। कुतः स्वधर्मे युद्धादौ निधनमपि श्रेयः श्रेष्ठतरम्। परधर्मः वर्णाश्रमान्तरधर्मस्तु भयावहः। निषिद्धत्वात् अनर्थप्रापको यतोऽत इत्यर्थः।। ३५।।

अर्जुन उवाच-

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः।। ३६।।

'तयोर्न वशमागच्छेत्' इत्यत्रातिप्रयत्नवतः पापहेत्वरिषड्वर्गजयश्शक्य इत्युक्तम्। तेषु को बलवान्? तं महाप्रयत्नेन जेष्यामीति भावेन पृच्छति– **अथेति**। 'मयि संन्यस्य कर्माणि' इत्यादावुक्तसेतिकर्तव्यताककर्मकर्तव्यतारूपप्रकृतप्रमेये पापहेतुप्श्नोऽनुपयुक्तः। तथाऽपि 'तयोर्न वशं' इत्यर्धे कामाद्यरिषड्वर्गस्य पापहेतुत्वोक्त्या स्मारितस्तेषु प्रबलपापहेतुप्रश्नोऽयं प्रासंगिक इति भावेन गीताकृता प्रकृतादर्थादर्थान्तरद्योतकोऽथशब्दः प्रयुक्तः। यद्वा 'प्रकृतेः क्रियमाणानि' इत्यत्रेश्वरस्य सर्वप्रेरकत्वोक्त्या तत्प्रेरकत्वस्य पार्थस्य देवत्वेन देवानां प्रेरकत्वस्य च ज्ञाततया तत्र प्रश्नायोगात्, इन्द्रियस्येत्यत्र रागशब्दितकामाद्यरिषड्वर्गस्य प्रवर्तकत्वोक्त्या परमेश्वरात् देवजाताच्चाथानन्तरं कामादिषट्सु बलवत्प्रश्नोऽयमिति द्योतनादानन्तर्यवाच्ये वाऽयमथशब्दः। तथा चायमर्थः। अथ परमेश्वराद्देवेभ्यश्चानन्तरं अयं पुरुषः पापाचारमनिच्छन्नपि बलान्नियोजित इव पापं चरति। स कामादिषु केन बलवता प्रयुक्तः प्रेरितश्चरति। हे वार्ष्णेय वृष्णिकुलोद्भवेति।। ३६।।

श्रीभगवानुवाच-

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।। ३७।।

काममूलत्वात्सर्वेषां स एव बलवानित्याह– **काम एष इति**।। एष त्वया पृष्टः पुरुषस्य पापेषु बलवान् प्रवर्तक इत्यनूद्य काम इति विधीयते। एष कामः एष क्रोधः। 'कामात्क्रोधोऽभिजायत' (२-६२) इत्युक्तेः कामजत्वात्क्रोधस्य, कार्यकारणयोः, 'गोभिः श्रीणीतमत्सरमि' त्यादाविवाभेदोपचारेणेयमुक्तिः। स च क्रोधो रजोगुणात्समुद्भवतीति स तथा कामनिमित्तको रजोगुणपरिणाम इत्यर्थः। क्रोध इत्युपलक्षणम्। तथा च कामनिवृत्तौ तन्मूलाः क्रोधादयः पापहेतवो निवर्तितुं शक्यन्त इति कामनिवृत्तावेवातिप्रयत्नः कार्य इति भावः। कामस्य यावदपेक्षितं दत्वा जेतव्यः स इत्यतः कामं विशिनष्टि। महाशनः महदशनं भोग्यं विषयो यस्य स तथा। महान् पाप्मा पापं ब्रह्महत्यादिरूपं यस्मात्स तथा। इह ऐहिकामुष्मिकपुरुषार्थविषये। एनं कामं वैरिणं नित्यम् अशुभेष्वेव प्रवर्तकतया मोक्षविरोधित्वात् शत्रुभूतं विद्धि जानीहि। कामाभिमानी कालनेमिर्ज्ञेयः।। ३७।।

धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्।। ३८।।

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौंतेय दुष्पूरेणानलेन च।। ३९।।

अशुभप्रेरकेषु क्रोधाद्यभिमान्यसुरेषु कामः कथं बलवानित्यत आह– **धूमेनेत्यादिश्लोकद्वयेन।।** वह्निर्यथा धूमेनाव्रियते तथा तेन कामेनेदम् उत्तमजीवजातं किंचिदावृतम्। यथा चादर्शो दर्पणो मलेनावृतः तथेदं मध्यमजीवजातं तेन कामेनाधिकमावृतम्। यथा च गर्भः उल्बेन गर्भवेष्टनचर्मणाऽऽव्रियते आच्छाद्यते तथेदमधमजीवजातं तेन कामेनात्यन्तमावृतम्। त्रिविधस्यापि जीवजातस्य यथायोग्यं यथावत्तया परावरतत्त्वज्ञानप्रतिबन्धकः काम इत्यर्थः। यद्वा इदमित्यनेनेश्वरान्तःकरणजीवाख्यं वस्तुत्रयं ग्राह्यम्। वह्निर्यथा धूमेनाव्रियते तथेश्वरो जीवगतकामेनावृतः। प्रकाशरूपोऽप्यग्निर्धूमेनावृतोऽन्यैर्यथा न दृश्यते तथेश्वरः स्वयं सर्वं जानन्नपि नान्यैर्ज्ञायत इत्यर्थः। आदर्शो मलेनेवान्तःकरणं कामेनावृतम्। यथाऽऽदर्शो मलेनावृतो मुखाद्यभिव्यक्तिहेतुर्न भवति, तथा जीवान्तःकरणं कामावृतं सदीश्वरं जीवं वा न प्रकाशयतीत्यर्थः। यथोल्बेनावृतो गर्भः तथा कामेनावृतो जीवः, उल्बेन वेष्टितो गर्भो यथा व्यापाराक्षमस्तथा जीवोऽपि कामेनावृतो नेश्वरादिज्ञाने क्षम इत्यर्थः।। ३८।।

एवं ज्ञेयस्येश्वरादेः ज्ञानकारणस्य मनसः ज्ञातुर्जीवस्य प्रतिबन्धकः काम इत्युक्त्या ज्ञानोत्पत्तिप्रतिबन्धकत्वमुक्तम्। इदानीं शास्त्रतो जातमपि ज्ञानं स्वकार्यापरोक्षज्ञानाय न प्रभवतीत्याह– **आवृतमिति।।** ज्ञानिनः शास्त्रजनितज्ञानिनोऽपि ज्ञानं कामावृतं भगवदपरोक्षज्ञानाय न प्रभवति। किमु गुरूपदेशमात्रजज्ञानवत इति सूचनाय ज्ञानिन इत्युक्तम्। अन्यथा ज्ञानस्य ज्ञानिसम्बन्धाव्यभिचारात् ज्ञानिन इत्युक्तिर्व्यर्था स्यात्। केनावृतं ज्ञानमित्यत उक्तं– **कामरूपेणेति।।** रूप्यते निरूप्यतेऽनेनेति रूपमाख्या, काम इति रूपमाख्या यस्य तेन कामरूपेण कामाख्येन नित्यवैरिणा सदाऽपकारिणा दुष्पूरेण दुःखेन पूरयितव्येन। न केवलं दुष्पूरः किं त्वनलेन न विद्यतेऽलं तृप्तिर्यस्य सोऽनलः। तेन महतो भोगस्य विषयस्य प्राप्तावपि अधिकेच्छयाऽलम्बुद्धिहीनेनेत्यर्थः।। ३९।।

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्।। ४०।।

यदर्थमर्जुनेन पापप्रवर्तकेषु बलवान्पृष्टः उत्तरितश्च तस्य बलवतः कामस्य

शत्रोर्वधार्थमधिष्ठानमाह— **इन्द्रियाणीति**।। अस्य कामाख्यशत्रोरिन्द्रियाणि चक्षुरादीनि मनो बुद्धिश्चाधिष्ठानम्। प्राधान्यज्ञापनाय मनोबुद्ध्योः पृथगुक्तिः। अधिष्ठानतां व्यनक्ति **एतैरिति**।। एतैर्मनोबुद्धीन्द्रियैर्विषयसंसृष्टैरेष कामाख्यशत्रुर्ज्ञानमावृत्य ज्ञानजन्म प्रतिबध्येति वा, जातमपि ज्ञानं कार्याक्षमं कृत्वेति वाऽर्थः। देहिनं जीवं विमोहयति।। ४०।।

तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।। ४१।।

हि यस्मात् हे भरतर्षभ त्वमिन्द्रियाण्यादौ नियम्य विषयसंगतान्यकृत्वा संगतत्वे वा मनोबुद्ध्योर्विषयस्पर्शमकृत्वा तयोर्विषयसंस्पर्शेऽपि क्षोभमप्राप्येति वाऽर्थः। ज्ञानविज्ञानयोर्नाशनं यस्मात् पाप्मानं पापहेतुमेनं कामं प्रजहि हतं कुरु। हताधिष्ठानो हि शत्रुर्नाशयितुं शक्य इति प्रसिद्धिद्योतको हि शब्दः। इन्द्रियजयः कामहननोपाय इति भावः।। ४१।।

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः।। ४२।।

शत्रुहनने आयुधरूपं ज्ञानं 'एवं बुद्धेः' इत्युत्तरश्लोके वक्तुं ज्ञानविषयमाह।। **इन्द्रियाणीति**।। शरीरादिन्द्रियाणि पराणि। उत्कृष्टानीत्यर्थः। इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः इत्यध्याहारेण योजना ध्येया। तथा 'यो बुद्धेः परतस्तु स' इत्यत्र 'बुद्धेरात्मा महान्परः। महतः परमव्यक्तं योऽव्यक्तात्परतस्तु स' इत्यपि ध्येयम्। स परमात्मेत्यर्थः। 'इन्द्रियेभ्यः परा ह्यर्थाः' इत्यादिकाठकश्रुतेः (३-१०)। अस्यार्थस्तु- 'देवेभ्य इन्द्रियात्मभ्यो ज्यायांसोऽर्थाभिमानिनः। सोमवित्तपसूर्याप्पाअश्व्यग्नीन्द्रेन्द्रसूनवः।। यमो दक्षश्चेन्द्रियेशाः सौपर्णी वारुणी तथा। उमेति चार्थमानिन्यस्तिस्रो द्वियेकदेवताः।। मनोऽभिमानिनो रुद्रवीन्द्रशेषास्त्रयोऽपि तु। ते श्रेष्ठा अर्थाभिमानिभ्यस्तेभ्यो बुद्धिः सरस्वती। तस्या ब्रह्मा महानात्मा ततोऽव्यक्ताभिधा रमा। तस्यास्तु पुरुषो विष्णुः पूर्णत्वान्नैव तत्समः।।' इत्यादिकाठकभाष्यात्, तथा 'सर्वेभ्यः प्रवरा देवा' इत्यादितात्पर्यवाक्याच्चावसेयः।। ४२।।

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।
जहि शत्रुं महाबाहो कामरूपं दुरासदम्।। ४३।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः।। ३।।

एवं तारतम्यान्तगतत्वेन ज्ञेयमुक्त्वा तज्ज्ञानमाह— **एवमिति।।** एवमुक्तदिशा बुद्धेर्महतोऽव्यक्ताच्च परं बुद्ध्वा आत्मानं मनः आत्मना बुद्ध्या संस्तभ्य निश्चलं कृत्वा दुरासदं दुःखेनासादनीयं निवर्तनीयमिति यावत्। कामरूपं शत्रुं जहि हतं कुरु हे महाबाहो इति।। ४३।।

।। इति श्रीगीतार्थसङ्ग्रहे राघवेन्द्रयतिकृते तृतीयोऽध्यायः।। ३।।

चतुर्थोऽध्यायः

श्रीभगवानुवाच-

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।। १।।

।। ॐ।। पूर्वाध्याये 'नियतं कुरु कर्म त्वं' (३-८) इत्यादिना किंचिद्विवृतस्य निवृत्तकर्मणः तथा 'यो बुद्धेः परतस्तु स' (३-४२) इत्यादिना तारतम्यान्तगत्वेनोक्त-विष्णोस्तज्ज्ञानस्य च विस्तरेण निरूपणमत्राध्याये क्रियते। "एवं ज्ञात्वा कृतं कर्म" (४-१५) इत्यतः प्राक्तनग्रन्थेन बुद्धेः परस्य विष्णोर्माहात्म्यमुच्यते। 'श्रेयान्द्रव्यमया-द्यज्ञात्' (४-३३) इत्यतः पूर्वेण निवृत्तस्य कर्मणोऽन्यस्माद्भेदः, निवृत्तकर्मण्येवोपा-सनायज्ञादिरूपेण भेद इत्येवं कर्मविस्तारोक्तिः। शेषेण ज्ञानमाहात्म्योक्तिरिति विवे-कः। 'मयि सर्वाणि' (३-३०) इत्युक्तनिवृत्तकर्मलक्षणज्ञानोपायानुष्ठानाननुष्ठानाभ्यां 'ये मे मतं' (३-३१) इत्यादिनाऽर्थानर्थयोरुक्त्या अवश्यमनुष्ठेयमित्युक्तम्। पुनस्तदनु-ष्ठाने रुच्युत्पादनाय पूर्वानुष्ठितश्चायं धर्म इत्याह– **इममित्यादित्रयेण**।। अव्ययफल-त्वादव्ययम्। इमं योगं 'मयि सर्वाणि' (३-३०) इत्यनेनोक्तम्। निवृत्तकर्मलक्षणं ज्ञानोपायं विवस्वते आदित्याय, स च स्वपुत्राय मनवे श्राद्धदेवाय, स च मनुः स्वपु-त्रायेक्ष्वाकवे।। १।।

एवं परंपराप्राप्तमिमं राजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परंतप।। २।।

राजानश्च ऋषयश्चेति वा, राजर्षयो राजश्रेष्ठाः निमिप्रभृतयः स्वपित्रिक्ष्वाकु-प्रभृतिभिर्विदुरिति वा। अत्र प्रवचनवेदनशब्दैः विवस्वदादीनामनुष्ठानमप्युपलक्ष्यम्। अद्यतनानामज्ञाने कारणमाह– **स इति**।। हे परंतप शत्रुतापन स च योगः महता कालेन इह लोके नष्टः अदर्शनं गतः।। २।।

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्।। ३।।

कुतः प्रोक्त इत्यत उक्तम्— **भक्तोऽसीत्यादि**। हि शब्दो हेतौ। भक्तत्वादिहेतुना हि यतस्ते प्रोक्तोऽत एतद्रहस्यं उत्तमं चेति। हि यतो रहस्यं उत्तमं चातो भक्तत्वात्ते प्रोक्तः अवश्यानुष्ठानायेति वा। 'कर्मणैव हि संसिद्धि (३-२०) इत्यत्र गृहस्थधर्मस्त्वया न त्याज्य इत्यत्र जनकादिज्ञान्याचार उक्तः। अत्र तु निवृत्तकर्मानुष्ठाने महदाचारः प्रमाणत्वेनोच्यत इति न तेन गतार्थत्वं शंक्यम्।। ३।।

अर्जुन उवाच-

अपरं भवतो जन्म परं जन्म विवस्वतः।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति।। ४।।

'मयि सर्वाणि' (३-३०) इत्यत्र हरेः पूज्यत्वम् अर्जुनस्य पूजकत्वमित्युक्तम्। तथा तस्यैव स्वतन्त्रकर्तृत्वमन्यस्य तदधीनकर्तृत्वमुक्तम्। एवं च पूज्यपूजकत्वादिना तत्राभिप्रेतं जीवेश्वरभेदं प्रमाणेन ज्ञातुं पृच्छति— **अपरमित्यादिना**।। एवं च 'न त्वेवाहं' (२-१२) इत्यादिना सर्वप्रकारेणोत्पत्तिनाशराहित्यं भगवतः श्रुतवान्कथमेवं अपरं पश्चात्तनं भवतो जन्मेति पृच्छतीति चोद्यानवकाशः।। ४।।

श्रीभगवानुवाच-

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप।। ५।।

अत एव विदितप्रश्नाभिप्रायो भगवान् 'तव चेति' 'न त्वं वेत्थेति' पराक्त्वाज्ञत्वयोरुक्तिं कृतवान्। अन्यथा 'बहूनि मे व्यतीतानि जन्मानि' इत्येतावता प्रश्नपरिहारात्तव चेत्याद्युक्तिर्व्यर्था स्यादिति ज्ञेयम्।। ५।।

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया।। ६।।

जन्मान्यतीतानि चेत्तर्हि न जननमरणराहित्यमीश्वरत्वं वा तव स्यात्। तथा च 'अविनाशि त्विति' (२-१७) उक्ति(क्त)विरोध इत्यत आह— **अजोऽपीति**।। देहतोऽप्युत्पत्तिहीनोऽपि अव्ययोऽविनाशी आत्मा स्वरूपं देहश्च यस्य सोऽव्ययात्मा सन्नपि भूतानामीश्वरः सन्नपि संभवामीत्यन्वयः। स्वरूपतो देहतश्च अनादिनित्यस्य कथं जनिरित्यत उक्तम्— **प्रकृतिमधिष्ठायेति**। प्रकृतिशब्दः प्राकृतपरः। प्राकृतान्प्रकृ-

तिजान्वसुदेवादीनधिष्ठायानुप्रविश्यात्ममायया स्वेच्छया स्वज्ञानेन वा संभवामि प्रादुर्भवामि। अतो जात इति लोकस्य भ्रान्तो व्यवहार इति भावः। यद्वा स्वां स्वकीयां मदधीनां प्रकृतिं तमोरूपामधिष्ठाय आश्रित्य संभवामि संभूतो जात इति भ्रमविषयो भवामि लोकस्येत्यर्थः। स्वाधीनप्रकृत्या वसुदेवादिदेहान्निर्माय तेष्वनुप्रविश्य प्रादुर्भावकरणे किं प्रयोजनमित्यतोऽप्युक्तम्– **स्वां प्रकृतिमधिष्ठायेति।** स्वस्वभावमनुसृत्य संभवामीति देवस्यैष स्वभाव एव न प्रयोजनापेक्षेति भावः। एतेन जीवजन्मविलक्षणजन्मवत्त्वाद्धरेः पूज्यत्वादिना जीवभेद उपपादित इति ज्ञेयम्।। ६।।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्।। ७।।

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे।। ८।।

किं च स्वप्रयोजनाभावेऽपि लोकापेक्षितधर्माधर्मस्थापनोत्सादनाद्यर्थमवतार इति संभवकालोक्तिपूर्वकमाह– **यदेत्यादिश्लोकद्वयेन।।** युगे युग इति धर्महान्यधर्मवृद्धिकाल इत्यर्थः। अवतारं विना साधुपरित्राणादिसंभवेऽपि लीलयैवावतारद्वारा परित्राणादिकं स्वभावादेव तस्येति ज्ञेयम्।। ७।। ८।।

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन।। ९।।

एवं स्वभावादेवावतारादिस्वव्यापारमुक्त्वा तज्ज्ञानफलमाह– **जन्मेति।।** एवमुक्तप्रकारेण दिव्यमलौकिकं मे जन्म कर्म च तत्त्वतो यथावत्तया यो वेत्ति स ज्ञानी देहं त्यक्त्वा पुनर्जन्म नैति न प्राप्नोति। किन्तु मामेति। अत्र जन्मकर्मरूपैकदेशज्ञानेन मुक्त्युक्तिर्योग्यगुणज्ञानोपलक्षणार्था ज्ञेया।। ९।।

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः।
बहवो ज्ञानतपसा पूता मद्भावमागताः।। १०।।

एवं ज्ञात्वा मुक्ताः संति किमत्यतः संतीत्याह– **वीतरागेति।।** तज्ज्ञानस्य मुक्तिहेतुत्वं कुत इत्यतो वाऽऽह– **वीतेति।।** अपगतरागभयक्रोधाः मन्मयाः मत्प्रधानाः। अहमेव प्रधान इति जानंत इति यावत्। यद्वा मन्मया मत्प्रचुरा मामेव सर्वभूतेषु सत्ताप्रतीत्यादिप्रदं जानंत इति यावत्। मामुपाश्रिताः मदेकशरणाः बहवो ज्ञानाख्यतपसा ज्ञानेन तपसा चेति वा, पूताः दग्धकर्माणः मद्भावं मयि सायुज्यलक्षणं भावं स्थितिमागताः प्राप्ताः।। १०।।

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।। ११।।

ननु सामान्यतो विष्णुं सर्वोत्तमं ज्ञात्वा अन्यदेवताः पितॄंश्चेष्ट्वांऽते तत्कर्म विष्णौ समर्पयन्ति ये त्रैविद्याः, तेषामपि मोक्षश्चेत्को विशेषस्त्वामुपाश्रितानामित्यतो न ज्ञानिनां त्रैविद्यानां च फलसाम्यम्। तत्तत्सेवानुसारेणैव मोक्षस्वर्गरूपभिफलदानात्सेवायाश्च वैषम्यादितो न वैषम्यादिदोष इति भावेनाह— **ये यथेति**। ये ज्ञानिनस्त्रैविद्या वा यथा येन प्रकारेण मोक्षेच्छया मद्यजनप्रकारेण, स्वर्गादीच्छया अन्यदेवतायजनप्रकारेण मां प्रपद्यन्ते तांस्तथैव तत्तद्भजनानुसारेणाहं भजामि मोक्षस्वर्गफलदानेन सेवे। न गुणभावेनेत्यर्थः। फलतारतम्यहेतुरयम्। ज्ञानिभ्यस्त्रैविद्यानां सेवायां विशेषः किंप्रकार इत्यत आह— **ममेति**।। हे पार्थ सर्वशः सर्वे ज्ञानिनः त्रैविद्याश्च मनुष्या मम वर्त्मानुवर्तन्ते। मम मत्कर्मकर्तृत्वात्तद्यागीयहविरादिभोक्तृत्वान्मम वर्त्मानुवर्तिन एव सर्व इत्यर्थः।। ११।।

काङ्क्षन्तःकर्मणां सिद्धिं यजंत इह देवताः।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा।। १२।।

एतावान्विशेषः। अहमेव सर्वयज्ञानां भोक्ता प्रेरकश्च। तदेतज्ज्ञात्वा भागवताः निष्कामाः मामेव यजंते। त्रैविद्यास्ते तत्तत्त्वमजानानाः कर्मणां सिद्धिं कांक्षंतः, अन्येदेवता इह यजन्त इति। ननु मम वर्त्मानुवर्तन्त इति यत्सर्वकर्मकर्तृत्वं सर्वकर्मभोक्तृत्वं चोक्तं तत्र सर्वकर्मकर्तृत्वं जीवानामस्वातन्त्र्यदर्शनात् सिद्धम्। यज्ञादि भोक्तृत्वं कुतो मानाज्ज्ञेयमित्यत आह— **क्षिप्रं हीति**।। यस्मान्मानुषे लोके कर्मजा सिद्धिः कर्मजं फलं क्षिप्रं शीघ्रं भवति। तस्मान्मम वर्त्मानुवर्तंते, सर्वयज्ञभोक्तेति यावत्। भगवतः सर्वयज्ञभोक्तृत्वादेव तत्फलमिह यजमानस्य क्षिप्रमुपलभ्यते। नान्यथा। 'तस्मात्ते धनसनयः (छां. १-७-६), 'फलमत उपपत्तेः' (३-२-३९) इति श्रुतिसूत्रादिना हरेरेव फलदातृत्वादिति भावः। यद्वा त्रैविद्यानामन्यदेवतायाजित्वात्कथमुच्यते मां प्रपद्यंत इत्यतः इह लोके अन्यदेवता यजंतः यज्ञकर्मणां सिद्धिं काङ्क्षन्तः सर्वशो मनुष्यास्त्रैविद्या अंते मयि तत्कर्मसमर्पणेन मम वर्त्मानुवर्तंते वैष्णवमार्गमेव अनुसृता भवन्ति। कुत एतत्! हि यस्मात्कर्मजा सिद्धिरिह लोके क्षिप्रं भवति अत इति। अन्यथा तन्न स्यादिति भावः।। १२।।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्।। १३।।

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते।। १४।।

भगवद्भजनं विना कुतो न फलमित्यतो वा, ज्ञानिनामिव त्रैविद्यानामपि कुतो न महाफलमित्यतो वा, तस्य पितृत्वात्पितरं परित्यज्यान्यदेवतायाजिनां फलप्राप्तिरेव नास्ति, कुतो महाफलप्राप्तिरिति भावेनाह– **चातुर्वर्ण्यमिति।।** चत्वारो वर्णाश्चातुर्वर्ण्यम्। 'चतुर्वर्णादिभ्यः स्वार्थ उपसंख्यानं' इत्युक्तेः स्वार्थे ष्यञ्। यद्वा चतुर्णां वर्णानां समूहश्चातुर्वर्ण्यम्। 'विचित्रा हि तद्धितगतिरिति' समूहार्थे ष्यञ् गुणकर्मविभागशः सत्त्वादिगुणविभागेन कर्मविभागेन च चातुर्वर्ण्यं चतुर्वर्णसङ्घो मया सृष्टः। जनाः सात्त्विकसात्त्विकाः राजससात्त्विकास्तामससात्त्विकाश्चेति त्रिविधाः। तत्र राजससात्त्विकानामत्र ग्रहणम्। 'राजसास्तु नरा विप्रा' इत्यष्टादशतात्पर्योक्तेः। 'सात्त्विको ब्राह्मण' इत्याद्येतद्भाष्योक्तेश्च। तथा च अतिसत्त्वाधिकरजोगुणयुक्ताः ब्राह्मणाः। किंचित्सत्त्वाधिकरजोगुणयुक्ताः क्षत्रियाः। तमोऽपेक्षयाऽधिकं समसत्त्वं यद्रजस्तद्युक्ता वैश्याः। रजोऽपेक्षयाऽधिकतमोपेतः, तमोऽपेक्षयाऽधिकसत्त्वोपेतश्च शूद्र इति गुणविभागकृतो ब्राह्मणादिवर्णः। ब्राह्मणादियोग्यकर्मविभागस्तु अष्टादशाध्याये 'शमो दम' (१८-४२) इत्यादिश्लोकत्रयेण वक्ष्यते। ननु यथा भवान्सर्वस्य कर्ता तथा तवाप्यन्यः कर्ताऽस्ति किमित्यत आह– **तस्येति।।** तस्य चातुर्वर्ण्यस्याव्ययं कर्तारं मां विद्धि। तथाऽकर्तारमपि कर्त्रंतरहीनमपि विद्धि। मेऽन्यः कर्ता नास्तीत्यपि विद्धीत्यर्थः। यद्वा यदि त्वया चत्वारो वर्णाः सृष्टाः तर्हि कर्तृत्वाज्जीववत्तवापि कर्मलेपः स्यादित्यतः कर्मलेपाभावं 'न मां' इत्यादिना वक्तुं लेपाभावे हेतुं तावदाह– **तस्येति।।** तस्य कर्तारमपि मां जीवविलक्षणमकर्तृत्वादकर्तारं कर्तृत्वहीनं विद्धीति।। १३।।

ततः किमित्यत आह– **न मामिति।।** जीवविलक्षणक्रियावत्त्वेनाकर्तृत्वान्मां कर्माणि न लिम्पन्ति।। किंच जीवानां कर्मलेपे अभिनिवेशो हेतुः, न च मेऽसावस्तीत्याह– **न मे कर्मफले स्पृहेति।।** फलप्राप्तिपर्यंतं मनोविक्षेपशब्दितोऽभिनिवेशः कर्मफले मे नास्ति। अतोऽपि न लिम्पन्ति कर्माणीत्यर्थः। कैमुत्येनापि स्वस्य कर्मालेपमाह– **इतीति।।** कर्मलेपो मे नास्ति तत्फले स्पृहाऽपि नेत्येवं मां योऽभिजानाति सोऽपि कर्मभिर्न बध्यते। किम्वहमिति इति योऽभिजानातीति वाच्ये 'मामि' ति पुनर्वचनं स्वस्य ईश्वराभेदाभिप्रायेण। स्वात्मानमुद्दिश्य 'न मां कर्माणि लिंपंती' त्यादि यो जानातीति जीवाभेदप्रतीतिनिरासाय। मां योऽभिजानाति न स्वात्मानमिति।। १४।।

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्।। १५।।

यदि ज्ञानी कर्मभिर्न बध्यते तर्हि ममापि ज्ञानित्वात्कर्मबन्धाभावरूपमुक्तिसत्त्वात्कथं कर्मविधानमित्यतो ज्ञानिनामप्यधिकमोक्षाकांक्षया कर्मकरणे आचारोऽप्यस्तीत्याह– **एवमिति।** प्राक् जनकादीनां विवस्वदादीनां च विद्यमानमपि ज्ञानित्वं भगवतो न विवक्षितम्। अत्र तु विवक्षितमिति न तेन पौनरुक्त्यं शंक्यं। पूर्वैर्मुमुक्षुभिः। 'आक्केः तच्छीलतद्धर्मतत्साधुकारिष्वि' ति तत्साधुकारिण्युप्रत्ययः। अधिकमोक्षेच्छावद्भिः एवं उक्तप्रकारेण हरिं ज्ञात्वाऽपि कर्म कृतम्। तस्मात्त्वमपि पूर्वैः कृतं पूर्वतरं ततोऽपि पूर्वभावि कर्म कुर्विति।। १५।।

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।। १६।।

कुर्विति कर्तव्यतयोक्तकर्मस्वरूपं वक्तुं तत्र जिज्ञासाजननाय कर्मणो दुर्ज्ञेयत्वमाह– **किमिति।।** अकर्मपदेन कर्माभावो विरुद्धकर्म च ग्राह्यम्। अत्र कर्मविषये कवयोऽपि मोहिताः विभ्रमवंतः, तर्हि किं तत्स्वरूपं ब्रूहीत्यत आह– **तदिति।।** तस्मात्कवीनामपि मोहविषयत्वादिति वा यत्कर्तव्यत्वादिनोक्तं तत्कर्मेति वा ते जिज्ञासवे प्रवक्ष्यामि। यज्ज्ञात्वाऽशुभात्कर्मबंधान्मोक्ष्यसे तत्कर्मेति वा कर्म प्रवक्ष्यामीत्यकर्मविकर्मणोरप्युपलक्षणम्। अनुष्ठेयतया प्राधान्यात्कर्मेत्येवोक्तम्। यद्वा ते कर्मेत्यत्राकारप्रश्लेषेणाकर्मेत्यपि पदच्छेदो ज्ञेयः।। १६।।

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः।। १७।।

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्।। १८।।

कर्मादिस्वरूपज्ञानमावश्यकमिति भावेनाह– **कर्मणो हीति।।** पूर्वस्मात्कर्माकर्मपदयोरनुवृत्तिः। कर्मणः सकाशादकर्म कर्माकरणं विरुद्धकर्म च विविच्य बोद्धव्यम्। विकर्मणो निषिद्धकर्मणश्च कर्माकर्म च विविच्य बोद्धव्यम्। अकर्मणश्च कर्म विकर्म च विविच्य बोद्धव्यम्। कुत इत्यत आह– **गहनेति।।** पूर्वत्र दुर्ज्ञेयत्वोक्तावपि तच्छापादिप्रबलनिमित्तं न भवति। किंतु स्वभावत एवेति वक्तुं 'गहना कर्मणो गति' रिति पुनर्वचनम्। यद्वा "कर्म प्रवक्ष्यामी" ति प्रतिज्ञातं कर्मादिस्वरूपमाह– **कर्मणो**

हीति। अत्र कर्म न इति विकर्म न इति अकर्म न इति पदविभागः। 'ब्रह्माण इन्द्रोपयाहि विद्वान्' इत्यत्र ब्रह्माण इत्यस्येव भिन्नपदस्यापि न इत्यस्य रेफोत्तरस्य णत्वं ध्येयम्। तेन "रषाभ्यां नो णः समानपद" इत्युक्तावपि छांदसं णत्वमत्र ध्येयम्। कर्म नो मत्तो भवतीति। विकर्म अकर्म च नो मत्तो भवतीत्येवं योजना। कर्मादिस्वरूपं न स्वतंत्रं किंतु भगवदधीनं बोद्धव्यमित्यर्थः। न इति बहुवचनं बहुरूपत्वात्। एवंरूपेण कर्मस्वरूपज्ञानं दुःशकमित्याह– **गहनेति**।। एतच्च श्रोतुरधिकादरजननायोक्तम्।। १७।

कर्मादिस्वरूपं प्रपञ्चयंस्तद्बोधं स्तौति– **कर्मणीति**।। वर्णाश्रमोचितकर्मणि क्रियमाणे सति अकर्म कर्माभावं स्वस्य यः पश्येत्। भगवानेव कर्ता नाहं स्वतंत्रः किंतु तदधीनकर्तृशक्तिकः सन् करोमीति यः पश्येदित्यर्थः। अकर्मणि जीवकर्तृककर्मकरणहीने सुप्त्यादौ जीवस्य कर्माकरणावस्थायामिति यावत्। कर्म यः पश्येत्। जीवव्यापारस्य भावे अभावे च सदा भगवानेव महदादि स्वप्नादौ गजादि करोतीति पश्येदित्यर्थः। अनेन हरेः परानपेक्षया कर्तृत्वं स्वस्य तदधीनकर्तृत्वं ज्ञात्वा वर्णाश्रमविहितानुष्ठानं कर्मेत्युक्तं भवति। एतेन कर्माकरणमकर्म, निषिद्धं कर्म विकर्मेत्युक्तप्रायम्। कर्मादिबोधं स्तौति– **स इति**।। य एवं पश्येत्स बुद्धिमान् ज्ञानी। प्रशंसायां मतुप्। स एव युक्तः ज्ञानोपायवान्। स एव कृत्स्नकर्मकृत्। स्वयोग्यकृत्स्नकर्मफलस्य ज्ञानस्य मोक्षस्य प्राप्तप्रायत्वादिति भावः। यद्वा करश्शब्दः सकारांतः कर्मविधिवाची, तेन मीयते विषयीक्रियते इति कर्म। उपपदस्य टिलोपो मातेः कनिन्प्रत्ययः। 'करोऽस्मिन्मीयत इति कर्म जीव उदाहृतः' (नारदीये) इति निर्वचनात्। विधिबद्धत्वात्कर्मशब्दार्थो जीवः। कर्मविधेस्तत्फलस्य चाभावादकर्मपदेनेश्वरो ग्राह्यः। तथा च कर्मणि विधिबद्धे जीवे अस्वातन्त्र्याद्धेतोरकर्म कर्माभावं यः पश्येत्। तथाऽकर्मणि विष्णौ कर्म यः पश्येत् सर्वकर्मकर्तृत्वात्तदीयमेव सर्वकर्मेति पश्येत् स बुद्धिमान् ज्ञानीत्येवं प्राग्वदेव स्तुतिपरताऽर्ध (र्थ) स्य ध्येया।। १८।।

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः।। १९।।

न केवलं कर्तृत्वाभिमानत्यागेन वर्णाश्रमोचितकृत्स्नकर्मकृत्त्वम्। किंतु कामादिपरित्यागेनापि भाव्यमिति भावेन कर्मस्वरूपमेव प्रपञ्चयति– **यस्येत्यादिश्लोकपञ्चकेन**।। यस्य पुंसः सर्वे समारंभाः। सर्वे कर्मोपक्रमाः कामसङ्कल्पवर्जिताः। कामः फलेच्छा। अनेनेदं स्वर्गादि साधयिष्यामीति सङ्कल्पः। ताभ्यां हीनाः। तं ज्ञानाग्निद-

ग्धकर्माणं हरेरेव स्वतन्त्रकर्तृत्वं ज्ञात्वा पश्चात्स्वस्य स्वातन्त्र्येण कर्माभावज्ञानित्वं ज्ञानाग्निदग्धकर्मत्वं तादृशं बुधाः ज्ञानिनः पण्डितं तत्त्वज्ञानिनमाहुः।। १९।।

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः।। २०।।

कामसंकल्पवर्जिततत्वमात्रेण न कर्मस्वरूपं पूर्णम्। किंतु कर्मफलस्नेहत्यागेनापि भाव्यमित्याह– **त्यक्त्वेति।।** कर्मणि फले चासंगं स्नेहं च त्यक्त्वा नित्यतृप्तो निराश्रयः नित्यतृप्तनिराश्रयभगवत्सरूपोऽस्मीति ज्ञानवान्। कर्मण्यभिप्रवृत्तोऽपि स नैव किंचित्करोति स्वातन्त्र्याभावात्। अनिराश्रय इति वा पदविभागः। भगवदाश्रयत्वादनिराश्रय इत्यर्थः।। २०।।

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्।। २१।।

कामसंकल्पादित्यागोपायमाह– **निराशीरिति।।** आत्मा मनः। यतौ नियतौ चित्तात्मानौ यस्य स यतचित्तात्मा भूत्वा निराशीः निष्कामः त्यक्तसर्वपरिग्रहश्च भवतीत्यर्थः। मनोनिग्रहेणैव कामादित्याग इति भावः। परिग्रहत्यागो नाम देहेन्द्रियादिपरिग्रहे अभिमानत्यागो ज्ञेयः। केवलं शारीरं शरीरयात्रार्थम्। यद्वा केवलं कामादिरहितं शारीरं शरीरेन्द्रियादिकरणकं कर्म कुर्वन् किल्बिषं कर्मबन्धं नाप्नोति। 'नैव किंचित्करोतीति' प्रागुक्तस्य कर्मणां मिथ्यात्वादिति विपरीतभ्रमस्य निरासाय "नाप्नोति किल्बिषमि" ति तदभिप्रायोऽत्र गौण्या वृत्त्या वर्णितः।। २१।।

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः।
समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते।। २२।।

यतचित्तात्मा कीदृश इत्यतस्तस्य लक्षणमाह– **यदृच्छेति।** अप्रयत्नलब्धेन तृप्तिमान्। सुखदुःखलाभालाभादिद्वन्द्वान्यतीतो द्वंद्वातीतः। विमत्सरः स्वानधीनत्वनिमित्तमनःखेदहीनः। द्वन्द्वातीतत्वं किंप्रकारमिति जिज्ञासायां तद्विवृणोति– **सम इत्यादिना।।** सिद्ध्यसिद्ध्योरुत्सेकानुत्सेकहीनत्वरूपसमत्वमेव द्वन्द्वातीतत्वमित्यर्थः। एवंविधः कर्म कृत्वाऽपि तेन न निबध्यत इति। यदृच्छालाभसन्तुष्टत्वादिकं यतचित्तात्मनो लक्षणमित्युक्तं भवति।। २२।।

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते।। २३।।

विक्षिप्य प्रागुक्तं पिण्डीकृत्य दर्शयति— **गतसङ्गस्येति**।। गतसङ्गस्य फलस्नेहरहितस्य। मुक्तस्य देहाद्यभिमानहीनस्य। स्वातंत्र्याभिमानहीनस्येति वा। ज्ञानावस्थितचेतसः विष्णुज्ञानेऽभिनिविष्टचित्तस्य। यज्ञाय विष्णवे तत्प्रीत्यर्थं कर्माचरतः कुर्वतः कर्म प्रविलीयते बन्धकं न भवतीत्यर्थः। 'यस्येत्यादिना' यत्कामादिवर्जनमुक्तं 'तद्गतसङ्गस्ये' त्यनेन 'त्यक्तसर्वपरिग्रह' इत्यतत् 'मुक्त' स्येत्यनेन 'कर्मण्यकर्मेति' 'नित्यतृप्त' इति च 'ज्ञानावस्थितचेतस' इत्यनेन पिण्डीकृत्य प्रदर्शितं ध्येयम्।। २३।।

ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना।। २४।।

एवं 'तत्ते कर्म प्रवक्ष्यामीति' प्रतिज्ञातं कर्मस्वरूपं सङ्क्षेपविस्ताराभ्यां प्रतिपाद्य 'गतसंगस्य' इत्यनेनोपसंहृत्याधुना ज्ञानावस्थितचेतस्त्वं स्पष्टयति— **ब्रह्मेति**।। अर्प्यते समर्प्यतेऽनेनेत्यर्पणं दर्वीपिठरादि। अर्पणहविरग्नीनां ब्रह्माभेद उच्यते ब्रह्म च तदर्पणं चेत्यादिव्युत्पत्तेः। तथा समाधिना सह सहितं कर्म चाग्निहोत्रादि ब्रह्मेति कर्मसमाध्योरपि। तथा ब्रह्मणा हुतमित्यत्रापि प्रायपाठाद्ब्रह्मैव हुतमिति होमस्यापि ब्रह्माभेदः। स तु अर्पणादिसत्ताप्रतीत्यादेर्ब्रह्माधीनत्वाभिप्रायेण। 'त्वदधीनं यतस्सर्वमतः सर्वो मतो भवान्' (पाद्मे) इत्यादेः। 'इति मां योऽभिजानातीति' श्लोकांते शेषः। तेनैव ब्रह्म गन्तव्यमित्यन्वयः। एतेन ज्ञानावस्थितचेतःपदोक्तं परमेश्वरज्ञानमेवंरूपमिति स्पष्टीकृतं भवति। यद्वा ब्रह्मणा हुतमिति असामानाधिकरण्यनिर्देशप्रायपाठात्। ब्रह्मण्यर्पणं ब्रह्मणो हविः ब्रह्मणोऽग्नौ ब्रह्मणः कर्म ब्रह्मकर्म न केवलं कर्ममात्रं ब्रह्मणः किंतु समाधिना सहितं कर्म ब्रह्मण इत्यर्थः। अर्पणादिकं सर्वं तत्स्वामिकमिति यो जानाति तेन ब्रह्म गन्तव्यमिति योजना। एतेन प्राङ्मुक्तपदेनोक्तस्वातंत्र्याभिमानत्यागः कर्माङ्गमुक्तः स कुत्र कार्यः। त्यक्तस्वातन्त्र्याभिमानं च वस्तु किमधीनं ज्ञेयम्। यज्ञायेत्युक्तयज्ञार्थत्वं च किमिति शंकात्रयं निरस्तम्। हविरादौ स्वातन्त्र्याभिमानत्यागब्रह्माधीनत्वयोः विष्ण्वर्पणमेव यज्ञार्थत्वमित्यस्य चात्र प्रतीतेरिति।। २४।।

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति।। २५।।

पूर्वं भगवदधीनकर्तृत्वानुसंधानपूर्वं तत्प्रीत्युद्देशेन वर्णाश्रमविहितानुष्ठानं कर्मेति समान्यतः कर्मस्वरूपमुक्तं तद्यज्ञादिभेदभिन्नमित्याह— **दैवमिति**।। दैवं विष्णुं यज्ञं यथा भवति तथाऽपरे केचन योगिनो यतयः पर्युपासते। यज्ञपदमत्रोपासनरूप-

क्रियाविशेषणम्। दैवमेवेत्येवकारोऽपि क्रिययैवान्वेति। भगवदुपासनमेव यज्ञतयाऽनुतिष्ठंति केचिद्यतय इत्यर्थः। एतेनायज्ञस्येत्यादिना यज्ञादिहीनस्य 'नायं लोकोऽस्तीति' वक्ष्यमाणतया यत्याश्रमविलोपप्रसङ्ग इति शङ्का निरस्ता। तेषामपि भगवदुपासनारूपयज्ञसत्त्वादिति। यद्वा दैवं यज्ञमिति सामानाधिकरण्यम्। यज्ञरूपं भगवन्तं योगिनः पर्युपासते यज्ञत्वेनोपासते। तेषां तथोपासनमेव यज्ञ इति भावः। भगवतः स्वानन्दरूपहविर्भोक्तृत्वात्स्वस्यैवाग्निरूपत्वाच्चेति ज्ञेयम्। ब्रह्माग्नौ ब्रह्माख्याग्नौ यज्ञेनाग्निहोत्रादियज्ञेन यज्ञं भगवन्तं प्रति जुह्वति। यद्वा ब्रह्माग्नौ यज्ञमग्निहोत्रादिकं यज्ञेनैव यज्ञनामकेन भगवता निमित्तेन जुह्वति समर्पयन्ति। सर्वं यज्ञनामकविष्ण्वधीनं ज्ञात्वा स्वस्य स्वातंत्र्याभिमानत्यागेन कृतं कर्म विष्णौ समर्पयंतीति यावत्। यज्ञेनैवेत्यग्रे सर्वत्रान्वेति।। २५।।

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन्विषयानन्ये इन्द्रियाग्निषु जुह्वति।। २६।।

अन्ये योगिनः श्रोत्रादीनि ज्ञानेन्द्रियाणि संयमाग्निषु जुह्वति। भगवत्पूजात्वेनेन्द्रियनियमनं कुर्वन्ति। प्रत्याहारादिना सर्वं यज्ञाख्यहर्यधीनं, न क्वचिदपि स्वातंत्र्यमिति ज्ञात्वेत्यर्थः। एतदपि ब्रह्मार्पणरूपमेव विवक्षितम्। एवमग्रेऽपि। अत एव वक्ष्यति "एवं बहुविधा यज्ञा" इति ज्ञेयम्। अन्ये योगिनः शब्दादीन् शब्दस्पर्शरूपरसगन्धान्विषयान् श्रोत्रादीन्द्रियाख्याग्निषु जुह्वति। यज्ञेनैव यज्ञाधीनं ज्ञात्वा स्वस्वातंत्र्याभिमानत्यागेन भगवत्पूजात्वेन विषयान्भुञ्जत इत्यर्थः।। २६।।

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते।। २७।।

अपरे योगिनः सर्वाणीन्द्रियकर्माणि वाक्पाणिपादपायूपस्थरूपकर्मेन्द्रियव्यापारान् तथा प्राणकर्माणि प्राणापानादिव्यापारांश्च आत्मसंयमयोगाग्नौ जुह्वति। आत्मनो मनसो यः संयमः स एव योग उपायः। स एवाग्निः ज्ञानदीपिते तत्र जुह्वति यज्ञेनैव भगवदधीनताज्ञानपूर्वं स्वातंत्र्याभिमानत्यागेन मनो निगृह्य कर्मेन्द्रियादिव्यापारान् भगवत्पूजात्वेन नियच्छन्तीत्यर्थः।। २७।।

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः।। २८।।

अपरे द्रव्ययज्ञाः द्रव्यस्य याजकाः। कर्त्रर्थोऽयं यज्ञशब्दः। तपोयज्ञाः कृच्छ्रचांद्रायणादितपो हर्यर्पणबुद्ध्या हरौ जुह्वतीति तपोयज्ञाः। भगवत्पूजात्वेन ध्यानं कुर्वन्-

तीति योगयज्ञाः। विष्णुपूजात्वेन स्वाध्यायमधीयत इति स्वाध्याययज्ञाः। यज्ञेनैवेति सर्वत्रान्वेतीत्युक्तं, तदर्थः प्राग्वत्। ज्ञानयज्ञाः भगवत्पूजात्वेन श्रवणादि कुर्वन्तीति। संशितव्रताः तीक्ष्णव्रताः यतयो यत्नशीलाः।। २८।।

अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः।। २९।।

अपरे प्राणायामपरायणाः प्राणापानगती रुद्ध्वा निरुद्ध्य अपाने प्राणं जुह्वति तत्र प्रवेशयन्ति प्राणे चापानं जुह्वति कुम्भकस्था एवेत्यर्थः।। २९।।

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः।। ३०।।

अपरे नियताहाराः संतः प्राणानिन्द्रियाणि श्रोत्रादींद्रियवृत्तीः प्राणेष्विन्द्रियेषु जुह्वति संकुचितवृत्तीन्प्राणान्कुर्वन्ति। नियताहारत्वेनेन्द्रियाणां शक्तिह्रासादिति भावः। यद्वा प्राणान्वागादीन्द्रियदेवान् मनःप्रभृत्युत्तमदेवाधीनान्ध्यायन्तीत्यर्थः। अस्मिन्पक्षे भगवत्पूजात्वेन नियताहारः पृथग्यज्ञो ज्ञातव्यः। तान्स्तौति– **सर्वेऽप्येत इति।** यज्ञविदो यज्ञज्ञाः यज्ञक्षपितकल्मषाः यज्ञानुष्ठाननाशितपापाः।। ३०।।

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम।। ३१।।

एवं यज्ञभेदान् ज्ञात्वाताननुतिष्ठतामननुतिष्ठतां च फलभेदमाह– **यज्ञेति।।** यज्ञे देवतायै दत्तहविः शेषोऽमृतमुच्यते। तद्भुजः यज्ञानुष्ठातार इति यावत्। सनातनमनादिनित्यं ब्रह्म यान्ति प्राप्नुवन्ति। अयज्ञस्य तु अयं लोकः अल्पसुखोऽपि मानुषो लोको नास्ति। कुतोऽन्यः स्वर्गादिः। अतो यज्ञाः सर्वथा कार्या इति भावः।। ३१।।

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे।। ३२।।

उक्तान्कर्मभेदानुपसंहरति– **एवमिति।।** एवं 'दैवमेवेत्यादिना' श्लोकषट्केनोक्तदिशा मानसिकवाचिककायिकभेदेन बहुप्रकाराः यज्ञाः ब्रह्मणो हरेर्मुखे वितता विस्तृताः तस्य सर्वयज्ञभोक्तृत्वात्। 'अहं हि सर्वयज्ञानां भोक्ता' (९-२४) इत्यादेः। 'श्रोत्रादि' इत्यादिनोक्तेंद्रियनियमनादिरूपयज्ञेषु तदाराध्यस्यानुक्तेर्ब्रह्मणोऽन्यस्तदाराध्य इति शंकानिरासाय ब्रह्मणो मुखे वितता इत्युक्तम्। ननु यज्ञानां बहुविधत्वे ज्ञानयज्ञादिनैवालं किं कर्मात्मकेन युद्धेनेत्यत आह– **कर्मजानिति।।** तान्प्रागुक्तान्सर्वान्यज्ञा-

न्कर्मजान्कर्मरूपान्विद्धि जानीहि। मानसिकवाचिककायिककर्मजान्विद्धीति वाऽर्थः। ततः किमित्यत आह– **एवमिति**।। मानसिकवाचिकादिसर्वयज्ञाः कर्मात्मका इति जानासि चेत् तर्हि युद्धादिस्वविहितकर्माणि कृत्वैव विमोक्ष्यसे। संसारादात्मानं मोक्तु (मोचयितु) मिच्छसि। सर्वेषां कर्मजत्वज्ञाने सति मोक्षार्थं युद्धादिकं कर्मव्यमिति तवैवेच्छा भविष्यतीत्यर्थः। सर्वेषां यज्ञत्वे ज्ञानोपासनस्वाध्यायाद्यकर्मरूपयज्ञेनैव भगवत्प्रीतिसिद्धेः किं कर्मात्मकयुद्धेनेति पार्थाभिप्रायस्येदमुत्तरं– **ज्ञात्वेति**।। (ज्ञात्वेत्यादि)।। तस्यायं भावः– युद्धं हित्वा मोक्षार्थं यदुपासनादिकं करिष्यसि तदपि कर्मात्मकमेव। तथा च युद्धत्यागे विहितधर्मत्याग एव कृतः स्यात्। न तु कर्मत्यागः। अत एवं जानतः तव विहितं युद्धादिकं न त्याज्यमिति। एवमभिप्राया-भावे कर्मजानित्यर्थस्य प्रकृतानुपयोगः स्यात्। ननु सत्यमेवमथाऽप्ययमर्थो ऌडंतश-ब्देन कथं लभ्यते इति चेत्। नायं ऌडंतः किंतु मुच्ऌ मोक्षण इत्यतः सन्नन्तात्कर्मक-र्तरि लट्प्रत्यये सति विमोक्ष्यस इति रूपम्। यद्यपि धातोः कर्मण इति सन्प्रत्यये सन् यङोरिति द्विर्वचने हलान्ताच्चेति सनः कित्वेन गुणाभावे च मुमुक्ष्येति भाव्यम्। तथाऽपि गुणाभ्यासलोपौ छान्दसावित्युपेत्य सन्नंतान्मोक्षशब्दाद्वर्तमाने लडिति लट्प्र-त्यये तस्य सिबादेशे "कर्मवत्कर्मणा तुल्यक्रिय" इति सूत्रेण कर्तुः कर्मवद्भावे कर्म-कारकनिमित्तयगात्मनेपद चिण्वद्भावादिकार्याणि लभत इत्युक्तेर्यकि सत्यतो लोपे मोक्ष्यस इति रूपसिद्धिर्ज्ञेया। ऌडन्तत्वपक्षे त्वयमर्थः। सर्वेषां कर्मजत्वं ज्ञात्वा तान्य-नुष्ठाय मुक्तो भविष्यसीति।। ३२।।

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।। ३३।।

उक्तयज्ञेषु को यज्ञः श्रेष्ठ इति जिज्ञासायामाह– **श्रेयानिति**।। द्रव्यमयादिति प्रागुक्तयज्ञांतराणामुपलक्षणम्। देवतोद्देशेन द्रव्यत्यागादिरूपाद्यज्ञाद्भगवज्ज्ञान- संपाद-नरूपो यज्ञः श्रेयान् श्रेष्ठः। कुत इत्यत उक्तं– **सर्वमिति**।। अखिलं खिलं सशेषं न भवतीत्यखिलम्। समुद्रं मनसा ध्यायीतेत्यादिकर्मसमृद्ध्यर्थोपासनाद्यङ्गसहितं सर्वं कर्म ज्ञाने परिसमाप्यते पूर्यते। ज्ञाने जाते ज्ञानलक्षणफलेन सफलं भवतीत्यर्थः। यद्वा आखिलमिति विभागः। आ समन्तात् खिलमल्पमत्यल्पमपि सर्वं कर्म ज्ञाने जाते परिसमाप्यते। फलवद्भवतीत्यर्थः।। ३३।।

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।। ३४।।

कर्मणो ज्ञानमधिकमित्युक्त्वा तत्संपादयेत्याह— **तदिति**।। तस्माज्ज्ञानस्याधिकत्वात्कर्मणां ज्ञानेनैव फलवत्त्वादिति वा। तत्त्वदर्शिनो ज्ञानिनः प्रणिपातेन त्वत्कृतवन्दनेन त्वत्कृतपरिप्रश्नेन च ते तुभ्यं ज्ञानं ज्ञानजनकं शास्त्रमुपदेक्ष्यन्ति। तेभ्यः तज्ज्ञातव्यमर्थं विद्धि जानीहि। तदित्यस्यावृत्तिः। अर्जुनस्य ज्ञानित्वेऽपि ज्ञानतिरोभावनिवृत्त्यर्थं विद्धीत्युक्तिः। पार्थं प्रति ज्ञानोपदेशार्थमेव कृष्णस्य प्रवृत्तत्वात्। 'न त्वेवाहं' (२-१२) इत्यादिना संक्षेपेणोपदिष्टत्वात्। 'ज्ञानं तेऽहं सविज्ञानं' (७-२) इत्यादिना विस्तरेणोपदेक्ष्यमाणत्वात् तदविरोधायोपदेक्ष्यन्तीत्यस्योपदेक्ष्याम इत्यर्थो ज्ञेयः।। ३४।।

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि।। ३५।।

स्वेनोपदेक्ष्यमाणं ज्ञानं स्तौति भगवान्— **यज्ज्ञात्वेति**।। यत् मया वक्ष्यमाणं ज्ञात्वा पुनः एवमाद्याध्यायोक्तदिशा बंधुविषयमोहं न यास्यसि। हे पांडव, येन ज्ञानेन अथो मोहनाशाद्धेतोरात्मनि सर्वान्तर्यामिणि मयि भूतान्यशेषेण द्रक्ष्यसि मदाधारत्वेन सर्वभूतानि तिष्ठन्तीति द्रक्ष्यसीत्यर्थः। यद्वा आत्मनि सर्वत्र व्याप्ते मयि अथो व्याप्तत्वादेव सर्वभूतान्यशेषेण द्रक्ष्यसि। येन ज्ञानेन तद्विद्धि तज्ज्ञानविषयं जानीहीति। विद्धि प्राप्नुहीति वाऽन्वयः।। ३५।।

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि।। ३६।।

येनेति करणतया निर्दिष्टं ज्ञानमेव स्तौति पुनः— **अपि चेदसीत्यादित्रयेण**। सर्वेभ्यः पापेभ्यः पापकृद्भ्योऽपि पापकृत्तमश्चेदसि अतिशयेन पापकारी चेदसीति यावत्। तथाऽपि सर्वं वृजिनं ज्ञानप्लवेनैव ज्ञानाख्यनावा सन्तरिष्यसि। पापादतिक्रान्तो भविष्यसीत्यर्थः।। ३६।।

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।। ३७।।

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति।। ३८।।

यथा एधांसि दारूणि समिद्धः प्रदीप्तः अग्निः भस्मसात्कुरुते। तथा ज्ञानाख्योऽग्निः सर्वकर्माण्यप्रारब्धानि भस्मसात्कुरुते। अतः प्रशस्तं ज्ञानमिति।।३७।।

इह लोके ज्ञानेन सदृशं पवित्रं न हि विद्यते। तज्ज्ञानं स्वयं योगसंसिद्धः

योगविषये सम्यक् सिद्धिमान्संसिद्ध(द्धि)ज्ञानोपायः सन् कालेन बहुना आत्मनि विन्दति प्राप्नोति।। ३८।।

श्रद्धावाँल्लभते ज्ञानं मत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति।। ३९।।

एवं ज्ञानं प्रशस्य तस्यान्तरङ्गसाधनं फलं चाह— **श्रद्धावानिति।।** आस्तिक्य-बुद्धिमान्मत्परो मदेकनिष्ठः संयतेन्द्रियो जितेन्द्रियश्च ज्ञानं लभते। ज्ञानं लब्ध्वा परां शान्ति मोक्षमचिरेणाविलम्बेनाधिगच्छति प्राप्नोति असति प्रारब्धे। सति तु तस्मिन् तद्भोगानन्तरमिति।। ३९।।

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः।। ४०।।

ज्ञानतत्साधनयोरभावे तद्विरोधिविपरीतज्ञानादौ चानिष्टमाह— **अज्ञश्चेति।।** नञोऽभावविरोधरूपार्थद्वयं ध्येयम्। तत्त्वविषयसंशयात्मा च विनश्यति। नरकं प्रतिपद्यते। किं च संशयात्मनो अयं मानुषो लोकः परः स्वर्गादिर्वा नास्ति। किं बहुना सुखं नास्तीत्यर्थः।। ४०।।

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम्।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय।। ४१।।

ज्ञानसाधनमनुवदन्ज्ञानफलं प्रपंचयति— **योगेति।।** भगवति मनोयोगेन तस्मिन् सन्यस्तं समर्पितं कर्म येन तं योगसंन्यस्तकर्माणम्। ज्ञानेन छिन्नसंशयं आत्मवन्तं परमात्मभक्तम्। हे धनंजय, कर्माणि न निबध्नन्ति मुक्तो भवतीत्यर्थः।। ४१।।

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः।
छित्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत।। ४२।।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानयोगो नाम चतुर्थोऽध्यायः।। ४।।

उपपादितं कर्मणः कर्तव्यत्वमुपसंहरति— **तस्मादिति।।** ज्ञानोपायानुष्ठानान-नुष्ठानयोरर्थानर्थवत्त्वादज्ञानसंभूतं हृद्गतमात्मनः संशयं ज्ञानासिना ज्ञानाख्यखड्गेन छित्वा योगं ज्ञानोपायं कर्मा(नु)तिष्ठ कुरु हे भारत, उत्तिष्ठ उद्युक्तो भवेति।। ४२।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते चतुर्थोऽध्यायः।।

पञ्चमोऽध्यायः

अर्जुन उवाच-

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्।। १।।

ॐ 'योगस्थः कुरु कर्माणि संगं त्यक्त्वा' (२-४८) इत्यादिना द्वितीये सङ्क्षेपेणोक्तस्य तृतीयादौ विशेषतः स्पष्टीकृतस्य फलकामनादित्यागेनेश्वरार्पणबुद्ध्या वर्णाश्रमविहितकर्मानुष्ठानरूपस्य कर्मयोगस्य यदंशद्वयं कामादिवर्जनरूपं उक्तरूपकर्मानुष्ठानाख्यं चेति तदंशद्वयरूपं तृतीयोक्तमत्राध्याये प्रपञ्च्यते— **संन्यासमिति**।। पूर्वाध्याये 'यदृच्छालाभसन्तुष्ट' (४-२२) इत्यादिना कामादिवर्जनरूपं संन्यासं 'कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं' इत्यादिना (४-१५) वर्णाश्रमविहितकर्मणां योगमी ईश्वरार्पणबुद्ध्यानुष्ठानरूपं कर्मयोगं च हे कृष्ण शंससि कथयसि। एतयोरुक्तलक्षणयोः संन्यासकर्मयोगयोः यच्छ्रेयः अधिकं भवति तदेकं मे मम सुनिश्चितं ब्रूहि। संन्यासस्याधिकत्वे तमेव ग्रही(हि)ष्यामि किं तद्विरोधिना कामद्वेषादियुतेन युद्धाख्यकर्मयोगेनेति भावः। यद्वा पूर्वत्र 'योग्संन्यस्तकर्माणं' (४-४१) इत्यादौ पठितः संन्यासशब्दो यत्याश्रमविषयः, 'योगमातिष्ठ' (४-४२) इत्यादौ श्रुतो योगशब्दो गृहिविषय इति प्रकल्प्यतीनां सर्वकर्मत्यागेन ज्ञानमात्राधिकारित्वात्, गृहिणां च ज्ञानत्यागेन कर्ममात्राधिकारित्वात्, तयोरेकपुन्निष्ठत्वं न युक्तमिति भावेन योगसंन्यासयोर्मध्ये यच्छ्रेयस्तदेकं ग्रहीष्यामीति भावेन तयोर्मध्ये श्रेयः पृच्छति— **संन्यासमिति**।। कर्मणां संन्यासं यत्याश्रमं 'संन्यस्तकर्माणं' (४-४१) इत्यनेन शंससि। पुनः कर्मणां योगमनुष्ठानलक्षणं गृहस्थाश्रमं च 'योगमातिष्ठोत्तिष्ठ' (४-४२) इत्यनेन शंससि। एतयोर्यत्याश्रमगृहस्थाश्रमयोः। शिष्टं प्राग्वत्। एतेनास्याध्यायस्य तृतीयोक्तकर्मयोगप्रपञ्चनपरत्वे (अस्याध्यायस्य) तदानंतर्यं स्यादिति निरस्तम्। योजनाद्वयेऽपि पूर्वाध्यायोक्तोपजीवनेनैव प्रश्नस्योत्थानेन चतुर्थानंतर्यस्योचितत्वादिति।। १।।

श्रीभगवानुवाच-

संन्यासः कर्मयोगश्च निश्श्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते।। २।।

संन्यासयोगशब्दौ न सर्वकर्मत्यागतदनुष्ठानलक्षणयतिगृहिपरौ। तथा च तयोरन्यतरश्रेयःप्रश्नो न युक्तः। किंतु कामादिवर्जनकर्मानुष्ठानार्थकौ तयोश्चैकपुंयोग्यत्वान्निःश्रेयसकरत्वाच्चानुष्ठेयत्वादन्यतरश्रेष्ठत्वप्रश्नो व्यर्थ एव। अथ स्वरूपज्ञानमात्रार्थं प्रश्नश्चेद्योग एव श्रेष्ठ इति भावेन परिहारमाह- **संन्यास इति**।। संन्यासः कामादिवर्जनरूपः कर्मयोगो भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपश्च उभौ समुच्चितौ संतौ निःश्रेयसकरौ। तयोस्तु मध्ये कर्मसंन्यासात्कर्मणि संन्यासः कर्मसंन्यासः कर्मानुष्ठानविषये यः कामक्रोधद्वेषादिवर्जनरूपसंन्यासः तस्माद्भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपो यः कर्मयोगः स तु विशिष्यते श्रेष्ठो भवति। "द्वन्द्वत्यागात्तु संन्यासान्मत्पूजैव गरीयसी" इत्युक्तेः।। २।।

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते।। ३।।

संन्यासशब्दो न यत्याश्रमपर इति भावेन तदर्थमाह- **ज्ञेय इति**।। यद्यपि 'यदृच्छालाभे' त्यादिनोक्तं कामादित्यागरूपं संन्यासं 'संन्यासं कर्मणां' इत्यनूद्यार्जुनेन प्रश्नस्य कृतत्वात् अस्त्येव तस्य संन्यासशब्दार्थज्ञानं, अतोऽसौ तं प्रति न वाच्यः। तथाऽपि संन्यासस्योक्तं निःश्रेयसकरत्वमुपपादयितुं ज्ञानमपि तदर्थं स्मारयत्यनेनेत्यदोषः। हे महाबाहो यो द्वेषाकाङ्क्षादिहीनः। काम्यकर्मत्यागी चेत्युपलक्ष्यते। स नित्यसंन्यासी ज्ञेयः स्मर्तव्य इत्यर्थ। स एव सुखं यथा भवति तथा अनायासेन बंधात्प्रमुच्यते। हि प्रसिद्धमिति युद्धकर्म त्वया न त्याज्यमिति।। ३।।

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।। ४।।

ननु 'न तस्य तत्त्वग्रहणाय साक्षादिति' पंचमस्कंधस्थश्लोके विषयवैराग्याभावे ज्ञानानुत्पत्त्युक्त्या तत एव तदुत्पत्तिरिति लाभेन वैराग्यशब्दित कामादिसर्ववर्जनरूपसंन्यासो ज्ञानोत्पत्तौ आवश्यकत्वेनोक्त इति प्रतीयते। कर्मयोगस्तु ज्ञानविरोधित्वेनोक्तः 'अग्निमुग्धा धूमतान्ता स्वं लोकं न विदन्ति ते' इत्येकादशस्कन्धे एकविंशत्यध्याये, 'अग्निमुग्धो ह वै धूमतान्तः स्व(स्वं)लोकं न प्रतिजानाति' इति तैत्तिरीये

संज्ञानाख्यः प्रश्नः कश्चिदनुवाके, अग्न्युपलक्षिते कर्मणि मुग्धः श्रेयस्करमेतदिति भ्रान्तः धूमतान्तो होमधूमेन ग्लानः स्वलोकं स्वीयमाश्रयं (परमाश्रयं) परमात्मानं न प्रतिजानाती (त्यर्थः) ति। तथा च कथं कर्मयोगात्संन्यासो वर इत्युच्यत इत्यतः संन्यास इव कर्मयोगोऽपि ज्ञानोत्पत्तावावश्यक एवेत्याह कृष्णः— **सांख्येति।।** सांख्यं ज्ञानं योगो भगवदर्पणबुद्ध्या कर्मानुष्ठानं तावुभौ बालाः अविवेकिनः पृथक् साध्यसाधनभावहीनौ प्रवदन्ति। न पण्डिताः। योगस्य ज्ञानहेतुत्वं कुत इत्यत उच्यते।। **एकमपीति।।** एकमपि ज्ञानमार्गं कर्ममार्गं वा एकमपि सम्यगास्थितोऽनुतिष्ठन् उभयोर्ज्ञानकर्मणोरुभयोरपि फलं विन्दत इत्यर्थः।। ४।।

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति।। ५।।

नन्वेतावता द्वयं किंचित्फलं प्रति स्वतंत्रसाधनमित्युच्यते। योगस्य ज्ञानहेतुत्वं न प्राप्तमित्यतः तदभिप्रायं स्वयमेव व्यनक्ति— **यत्सांख्यैरिति।** सांख्यैर्ज्ञानिभिर्यत्स्थानं भगवत्स्वरूपलक्षणं तद्योगैः। अर्शआद्यच्प्रत्ययांतावत्र सांख्ययोगशब्दौ। कर्मयोगवद्भिरपि ज्ञानद्वारा गम्यत इत्यर्थः। तथा च सांख्यं च योगं च एकं साध्यसाधनभाववत् यः पश्यति स पश्यति स एव ज्ञानीत्यर्थः। संन्यासयोगयोर्द्वयोरपि ज्ञानहेतुत्वान्न कोऽपि विरोधः। 'अग्निमुग्ध' इत्यादि तु काम्यकर्मविषयमिति भावः। यद्वा संन्यासयोगशब्दयोः यतिगृहिपरत्वमुपेत्य तयोरधिकारिभेदादेकत्र संन्यासयोगयोः समावेशायोगश्चोदितोऽसौ संन्यासयोगशब्दयोस्तदर्थत्वानंगीकारेण पूर्वश्लोके परिहृतः। अधुना संन्यासयोगयोरधिकारिभेदोऽपि न युज्यत इत्याह— **सांख्येति।।** बालाः अविवेकिनः सांख्ययोगौ ज्ञानकर्मयोगौ पृथक् भिन्नाधिकारिकौ नैकत्र समाविष्टौ यत्याश्रमिणां सांख्यपदोक्तज्ञानाधिकार एव न कर्मणि, गृहिणां तु योगपदोक्तकर्माधिकार एव न ज्ञान इति प्रवदन्ति। ज्ञानमार्गं सम्यगास्थित एव ज्ञानफलं प्राप्नोति। कर्ममार्गं सम्यगास्थित एव कर्मफलं प्राप्नोतीति प्रवदन्तीति यावत् न पण्डिताः, कुतः ज्ञानकर्ममार्गयोरेकमपि सम्यगास्थितः उभयोः फलं विन्दते यतः अतो न पण्डिता बाला इव प्रवदन्तीत्यर्थः। अत्र मार्गद्वयस्य सम्यक्त्वविशेषणात्कर्मणो ज्ञानसाहित्यम्। तेन विना सम्यगनुष्ठानासिद्धेः। कर्मणा विना सम्पूर्णानन्दहेतुत्वरूपसम्यक्त्वस्य ज्ञानेऽनुपपत्तेः तदर्थं तस्य कर्मसाहित्यमिति सूचितम्। ज्ञानैकगम्ययतिप्राप्यस्थानप्राप्तिसद्भावाच्च गृहिणां ज्ञानाधिकारोऽस्तीति स्पष्टं वदन्नुक्तमुपसंहरति— **यदित्यादिना।।** यतः सांख्यैर्ज्ञानिभिर्यतिभिः प्राप्यं स्थानं योगैर्योगवद्भिर्गृहिभिर्गम्यते तस्मात्सांख्यं योगं चैकम्

एकाधिकरणकम्। कर्मिण्यपि गृहिणि ज्ञानम्। ज्ञानिन्यपि कर्मेत्येवमेकत्र तयोः समावेशं यः पश्यति स पश्यति ज्ञानीत्यर्थः।। ५।।

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति।। ६।।

पूर्वं ज्ञेय इत्यत्र स्वाभिमतसंन्यासशब्दार्थं स्मारयित्वा तस्य योगादवरत्वे ज्ञानान्तरङ्गत्वरूपं बाधकं यत्सांख्येति श्लोकाभ्यां परिहृत्येदानीं तस्य योगादवरत्वे साधकमाह— **संन्यासस्त्विति**।। अयोगतः भगवदर्पणबुद्ध्या कर्मानुष्ठानयोगाभावे कामादिवर्जनरूपसंन्यासस्तु दुःखमाप्तुमेव परमपुमर्थाहेतुत्वात्। स्वोचितकर्माननुष्ठानेन नरकप्राप्तेश्चेति भावः। तात्कालिकापमानादिकृतदुःखाभावस्त्वल्पत्वान्न फलमिति भावः। मुनिः संन्यासी। 'स हि लोके मुनिर्नाम यः कामक्रोधवर्जित' इत्युक्तेः। योगयुक्तो न चिरेण शीघ्रं ब्रह्माधिगच्छतीत्यर्थः। एतेन योगाभावे पुमर्थहेतुत्वाभावः। सति तु तस्मिंस्तद्धेतुत्वं संन्यासस्येति योगस्य वरत्वे व्यतिरेकान्वयरूपं साधकमुक्तं भवति। यद्वा योगसंन्यासयोः समुच्चितयोरेव निःश्रेयसकरत्वमुभावित्यनेनोक्तम्। इदानीमसमुच्चये बाधकमाह— **संन्यासस्त्विति**।। कामादिवर्जनरूपसंन्यासस्तु अयोगतः। भावप्रधानम्। योगरूपत्वाभावे केवलसंन्यासस्तु दुःखमाप्तुमेव विष्ण्वर्पितत्वादियोगरूपत्वं विना केवलकर्मत्यागो नरकफल एवेति भावः। योगरूपत्वं विना संन्यासस्यानर्थहेतुत्वमुक्त्वा योगरूपसंन्यासस्य मुक्तिहेतुत्वमाह— **योगयुक्त इति**।। मुनिः संन्यासी। संन्यासस्य योगावान्तरभेदत्वाद्योगरूपत्वोक्तिः। 'यं संन्यासमिति प्राहुर्योगं तं विद्धि' (६-२) इति वक्ष्यमाणगीतोक्तिरप्येतदभिप्राया। अतः संन्यासः कर्मयोगश्चेति भेदोक्तिः कुरुपाण्डववन्न विरुद्धेति ज्ञेयम्।। ६।।

योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते।। ७।।

योगयुक्तसंन्यासस्य महाफलहेतुत्वं प्रपञ्चयति— **योगेति**।। प्रपञ्चनं च 'यो न द्वेष्टीत्यत्र' उक्तद्वेषादिवर्जनरूपसंन्यासस्य पूर्वार्धे कारणोपन्यासेन ब्रह्माधिगच्छतीति प्रागुक्तमुक्तिफलं प्रति उत्तरार्धे ब्रह्मज्ञानरूपावान्तरफलोक्त्या चेति ध्येयम्। योगयुक्तः कर्मयोगयुक्तः विशुद्धात्मा विशुद्धस्वभावः अत एव विजितमनस्को जितेन्द्रियः सर्वभूतात्मा सर्वभूतानामादानादिकर्ता स्वामीति यावत्। सर्वभूतात्मभूतः सर्वप्राणिनां स्वामिभूतः स एव स्वस्यात्मा आदानादिकर्ता स्वामी यस्य स सर्वभूतात्मभूतात्मा। ज्ञानोपल-

क्षणमेतत्। सर्वभूतात्मभूतात्मेति ज्ञानीत्यर्थः। कुर्वन्नपि न लिप्यते मुक्तो भवतीत्यर्थः। जितेन्द्रियत्वादिद्वेषादिवर्जनकारणं सर्वस्वामी मम स्वामीति ज्ञानं ब्रह्माधिगताववान्तर-फलमित्युक्तं भवति। यद्वा 'योगयुक्त' इत्यत्र भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपो योग उक्तः। 'सर्वेत्यादिना' तु सर्वभूतात्मनि हरौ भूतमनाः स्थितमना इत्यर्थः।। ७।।

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यन् शृण्वन्स्पृशन् जिघ्रन्नश्नन्गच्छन्स्वपन् श्वसन्।। ८।।

प्रलपन्विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि।
इन्द्रियाणींद्रियार्थेषु वर्तंत इति धारयन्।। ९।।

'ज्ञेय' इत्यादिना 'विशुद्धात्मेत्यादिना' च स्पष्टीकृतमपि संन्यासं संकल्पत्या-गोक्त्या पुनः स्पष्टयति— **नैवेत्यादिश्लोकद्वयेन**।। युक्तः कर्मयोगानुष्ठाता तत्त्वज्ञानी। दर्शनश्रवणस्पर्शनादिज्ञानेन्द्रितत्त्ववित् यकर्मेन्द्रियव्यापारं कुर्वन्नपि इन्द्रियाणीन्द्रियार्थेषु हरीच्छया वर्तन्त इति धारयन् मनसाऽवमृशन् स्वस्य स्वातन्त्र्याभावात्, नैव किंचि-त्करोमीति मन्येतेत्यर्थः। संकल्पत्यागोऽपि संन्यास' शब्दार्थ इति भावः। संन्यासो योगरूपः सन्परमपुमर्थहेतुरित्युक्तम्। कथं तस्य योगरूपतेत्यतो वाऽऽह— **नैवेति**।। सर्वव्यापारं कुर्वन्नपीन्द्रियाणीशप्रेरितानीन्द्रियार्थेषु वर्तन्ते स एव स्वतन्त्रः नैव किंचि-दहं करोमीत्यनुसन्धानमेव द्वेषादिवर्जनरूपसंन्यासस्य योगरूपत्वं नामेति श्लोकद्वय-तात्पर्यार्थः।। ८।। ९।।

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवांभसा।। १०।।

योगमपि किंचिद्विवृण्वन् संन्यासयोगाभ्यां युक्त एव कर्मणा न लिप्यत इति साधननियममाह— **ब्रह्मणीति**।। यद्यपि 'संन्यासस्त्वित्यनेनैव' संन्यासयोगौ मिलिता-वेव फलं साधयत इति नियमो लब्ध एव 'कुर्वन्नपि न लिप्यत' इति फलं चोक्तमेव। तथाऽपि संन्यासयोगौ मिलितावेव फलसाधनमिति नियमोक्तेरुपचारस्त्वनिवृत्त्यर्थं 'लिप्यते न स पापेनेति' पुनः फलोक्त्या नियमस्य फलसाधनताऽत्रोच्यत इत्यदोषः। सङ्गं फलकामनां त्यक्त्वा ब्रह्मण्याधाय मम शुभार्थं स्वपूजात्मकानि मया कारितानी-त्यनुसन्धाय कर्माणि यः करोति भगवदधीनकर्तृशक्तिकः सन्करोति सोऽम्भसा पद्मप-त्रमिव पापेन न लिप्यते ज्ञानद्वारा मुक्तो भवतीत्यर्थः।। १०।।

कायेन मनसा बुध्या केवलैरिन्द्रियैरपि।

योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये।। ११।।

संन्यासयोगौ मिलितावेव फलहेतुरित्यत्राचारोऽस्तीत्याह— **कायेनेति।।** देहेन मनसा 'मनोबुद्धी तु द्वादशे' त्युक्तेर्बुद्धिरूपेन्द्रियेण केवलैः कामाहंभावहीनैः स्वातंत्र्याभिमानरहितैर्वा इन्द्रियैर्योगिनोऽपि सङ्गं त्यक्त्वाऽऽत्मनो मनसः शुद्धये तत्र ज्ञानोत्पत्त्यर्थं पापालेपायेति वा कर्म कुर्वन्तीत्यर्थः। पूर्वार्धेन संन्यासः उत्तरार्धेन योगः आत्मशुद्धय इति फलोक्तिः।। ११।।

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते।। १२।।

प्राक् 'संन्यासस्त्वित्यादिना' संन्यासयोगौ मिलितावेव फलं साधयतः नान्यतरपरित्यागेनान्यतर इति नियमज्ञापनार्थं तयोः फलमुक्तं ब्रह्माधिगच्छति, कुर्वन्न लिप्यत इत्यादिना। इदानीं तु तावेव मोक्षसाधनं न तु तदुभयत्यागेनान्यदिति नियमज्ञापनाय योगसंन्यासवतस्तदुभयाभाववतश्च मुक्तिसंसारविस्तारलक्षणं फलमाह— **युक्त इति।।** "कर्मफलं त्यक्त्वेत्यनेन" प्रागुक्तकामादिवर्जनरूपसंन्यासी ज्ञेयः। युक्तः भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपयोगयुक्तः नैष्ठिकीं स्वाभाविकीं शान्तिं स्वरूपानंदाविर्भावलक्षणां मुक्तिमाप्नोति। अयुक्तः योगहीनः कामकारेण फलकामादिना कर्मानुष्ठानेन संन्यासाभावेनेति यावत्। फले क्षुद्रफले सक्तो निबध्यते नितरां संसारमनुभवतीत्यर्थः।। १२।।

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन्।। १३।।

पूर्वं 'नैव किंचित्करोमी'त्यादिना कर्तृत्वाभिमानत्यागेन संन्यासः विवृतोऽधुना कारयितृत्वाभिमानत्यागेन संन्यासशब्दार्थं स्पष्टयति— **सर्वकर्माणीति।।** यद्वा प्राक्कर्माणि ब्रह्मण्याधाय यः करोतीत्यत्र कर्मणां ब्रह्मण्याधानं नाम न कर्मणां स्वरूपेण त्यागोऽपि तु सर्वकर्माणि मनसा संन्यस्य भगवानेन स्वपूजात्मकानि मच्छुभार्थं मया कारयति मम कर्तृताशक्तिरपीशाधीनैवेत्यनुसंधायेत्येवंरूपमित्यर्थः। स्वरूपेण कर्माणि परित्यज्येत्यर्थपक्षे मनसेति व्यर्थमिति भावः। वशी जितेंद्रियः स्वातंत्र्येण नैव कुर्वन्न कारयंश्च नवद्वारे चक्षुः श्रोत्रघ्राणानां षड्द्वाराणि मुखं पायूपस्थेचेत्येवं नवद्वारवति पुरे देहे सुखं यथा तथा आस्ते। कर्मलेपहीनो वर्तत इत्यर्थः।। १३।।

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते।। १४।।

ननु दर्शनादि कुर्वन्नैव करोमीति मन्येतेत्युक्तिरयुक्ता। तथात्वे मिथ्याज्ञानित्वप्रसंगादित्यतः स्वाभिप्रायमाह— **नेति**।। जडमपेक्ष्य प्रभुः समर्थो जीवः लोकस्य कर्तृत्वं लोकेन कर्म न सृजति न कारयति। स्वातंत्र्येणेत्यर्थः। स्वयं च कर्माणि न सृजति न करोति। कर्मण्यस्वातंत्र्ये फले सुतरां तदित्याह— **न कर्मेति**।। सृजतीत्यनुषंगः। कर्मफलप्राप्तिं लोकस्य न सृजति। लोकस्य फलप्राप्तिसंपादने स्वस्य वा फलसम्पादने न स्वतंत्र इत्यर्थः। स्वातंत्र्याभावापेक्षया न करोमीति मन्येतेत्युक्तिरितिभावः। यद्वा जीवस्य स्वतंत्रकर्तृत्वाभावेऽपीश्वरदत्तं कियायां क्रियाजन्यादृष्टे कर्मफलप्राप्तौ चास्त्येव स्वातंत्र्यमतः कथं 'ब्रह्मण्याधाय कर्माणी, ति 'सर्वाणि कर्माणि संन्यस्येति' चोक्तिरित्यत आह— **नेति**।। प्रभुरीश्वरः जीवस्य कर्तृत्वं अग्निहोत्रादिक्रियायां स्वातंत्र्यं न सृजति। न प्रयच्छति। कर्माणि क्रियाजन्यादृष्टानि लोकस्य न सृजति। तेषु स्वातंत्र्यं न प्रयच्छति। कर्मफलसंयोगं च लोकस्य न सृजति। फलप्राप्तावपि लोकस्य स्वातंत्र्यं न प्रयच्छतीत्यर्थः। ननु क्रियायामदृष्टेषु फलसंयोगे च जीवस्य स्वातंत्र्याभावे कथं क्रियादिनिष्पत्तिरित्यत आह— **स्वभावस्त्विति**।। स्वं स्वयमेव भवति। परानपेक्षं तिष्ठति। तथा स्वयमेव भावयति जगदुत्पादयतीति स्वभावः। स्वेति पदे उपपदे भवतेर्ण्यंतात्कप्रत्ययः। स्वस्थितावन्यकरणे च परानपेक्षः स्वतंत्रो भगवान्स्वभावशब्दार्थः। स एव च प्रवर्तते क्रियाकर्तृत्वे कर्मशब्दितादृष्टेषु फलसंयोगे चेति ध्येयम्। कदाऽपि कुत्रापि नान्यस्य स्वातंत्र्यं ददाति। किन्तु सर्वत्र स्वयमेव प्रवर्तत इति भावः।। १४।।

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।। १५।।

फलसंयोगे स्वातंत्र्याभावं जीवस्य व्यनक्ति— **नादत्त इति**।। विभुः जडापेक्षया समर्थो जीवः कस्यचिद्दुराचारस्य सकाशात्तज्जन्यं पापं स्वातंत्र्येण नादत्ते। सुकृतं पुण्यं च स्वातंत्र्येण नैवादत्ते। एवं क्रियायामदृष्टे च ज्ञेयम्। यद्वा भगवत एव कर्तृत्वे कर्मलेपः स्यादित्यत आह— **नादत्त इति**।। विभुः स्वतंत्र ईश्वरः विभुत्वादेव कस्यचित्कर्मणः सकाशात्पापं सुकृतं वा नादत्त इत्यर्थः। न पुण्यपापलेपवान्भवतीत्यर्थः। नन्वेवं सर्वत्र स्थित्वा स्वातंत्र्येण कर्ता ईश्वरोऽस्ति चेत् कथं न दृश्यत इत्यत आह— **अज्ञानेनेति**।। तेनाज्ञानेनावृतबुद्धित्वेन मुह्यन्ति भगवन्तं न जानन्ति।। १५।।

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्।। १६।।

ननु ज्ञानस्याज्ञानावृतत्वे तेनाज्ञाननाशायोगात् विनाशकान्तरस्य चाभावत्, ज्ञानार्थयोर्योगसंन्यासयोर्वैयर्थ्यमित्यत आह– **ज्ञानेनेति**।। द्विविधं हि ज्ञानं स्वरूपं वृत्तिरूपं चेति। यद्यपि स्वरूपज्ञानमज्ञानावृतं नाज्ञाननाशकं तथाऽप्यात्मनो भगवतो ज्ञानेन परोक्षवृत्तिज्ञानेन येषामज्ञानं नाशितं शिथि(लितं)लं तेषामेव ज्ञानं भगवदपरोक्षज्ञानम्। तत् परं ब्रह्म आदित्यवत्प्रकाशयतीत्यर्थः।। १६।।

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः।। १७।।

अपरोक्षज्ञानाव्यवहितसाधनमाह– **तद्बुद्धय इति**।। न सकृत्परोक्षज्ञानेनालं किंतु 'आवृत्तिरसकृदुपदेशात्' (४-१-१) इत्युक्तदिशा पुनः पुनस्तत्र हरौ बुद्धिर्येषां ते तद्बुद्धयः स एव आत्मा अदानादिकर्ता स्वामी येषां ते तदात्मानः। तन्निष्ठास्तस्मिन्नचंचलाः। स एव परमयनं येषां ते तत्परायणाः। तथा ज्ञानिनः सन्तः अत एव च ज्ञाननिर्धूतकल्मषाः भगवदपरोक्षज्ञानेन निर्धूतपाप्मानोऽपुनरावृत्तिं मुक्तिं गच्छन्ति।। १७।।

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।। १८।।

परमेश्वररूपाणां सर्वत्र साम्यदर्शनं चापरोक्षज्ञानसाधनमित्याशयवानाह– **विद्येति**।। पण्डिताः परोक्षज्ञानिनः विद्याविनयसंपन्नब्राह्मणादिषु विषमेषु स्थितं हरिं समं गुणेषु दोषाभावे च समं तारतम्याभावं च पश्यंतीति समदर्शिन इत्यर्थः। अस्य श्लोकस्य भगवद्विषयतानिर्दोषं ही, त्युत्तरवाक्यगम्या, अपरोक्षज्ञानहेतुता च प्रकरणगम्येति ज्ञेयम्।। १८।।

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः।। १९।।

समदर्शिनं स्तौति– **इहैवेति**।। येषां साम्ये मनः स्थितं तैरिहैवास्मिन्नेव जन्मनि सर्गो जन्मादिरूपः संसारः जितः। दृश्यत्वेनोक्तं समं वस्तु किं केन साम्यमित्यत आह– **निर्दोषमिति**।। समं वस्तु ब्रह्म, निर्दोषत्वेन च साम्यमित्युक्तं भवति। तस्मात्समतया सर्वत्र स्थितस्य ब्रह्मत्वात्ते समदर्शिनो ब्रह्मणि स्थिता एवेत्यर्थः। ब्रह्मज्ञानिन इति यावत्।। १९।।

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः।। २०।।

पुनः संन्यासं प्रपञ्चयति— **न प्रहृष्येदिति**।। प्रियं सुखसाधनं प्राप्य न प्रहृष्येत् हर्षं न प्राप्नुयात्। अप्रियं च प्राप्य नोद्विजेत्, दुःखहेतुप्राप्तावपि उद्वेगरूपमनोऽधैर्यं न प्राप्नुयात्। तत्रोपायमाह— **स्थिरबुद्धिरिति**।। बुद्धेः स्थैर्ये हेतुरसंमूढ इति। प्रियाप्रियप्रापणे लौकिको जन एव स्वतन्त्र इति मिथ्याज्ञानहीनः, तत्र हेतुर्ब्रह्मविदिति। ब्रह्मैव स्वतन्त्रमिति विद्वान्, नैतावतालं किंतु ब्रह्मणि स्थितः। नित्यं ब्रह्मस्मृतिमानित्यर्थः। 'संन्यासस्त्वित्यादिना' संन्यासाद्योगस्याधिक्योक्त्यर्थं योगहीन- संन्यासस्य व्यर्थत्वं यदुक्तं तदयुक्तम्। कामाद्युपद्रवक्षये स्वरूपसुखाविर्भावसत्त्वादित्यतः सत्यं तदेव सुखं भगवद्ध्यानरूपयोगे सत्यक्षयं भवतीति।। २०।।

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते।। २१।।

संन्यासाद्योगस्य पुनराधिक्यमाह— **बाह्येति**।। स्पृश्यंत इति स्पर्शाः शब्दाद्याः तेषां बाह्यत्वं श्रोत्राद्यविषयत्वसंपादनं तथाकृतविषयेषु असक्तमनस्कः संन्यासीति यावत्। आत्मनि स्वरूपे यत्सुखं विंदत्यनुभवति। आत्मस्वरूपस्यापि न निर्विशेषत्वमिति ज्ञापनाय यत्सुखमित्येव वाच्ये आत्मनीत्यप्युक्तिः। यदित्युक्तेस्तदिति लभ्यते। स संन्यासी ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगो ब्रह्मयोगः ध्यानं तद्युक्तात्मा तत्सुखं कामाद्युपद्रवक्षयरूपसंन्यासादाविर्भूतं सुखं अक्षयं पुनस्तिरोभावहीनमश्नुते प्राप्नोतीत्यर्थः। यद्वा 'योगयुक्तो मुनिर्ब्रह्मेत्यादिना' योगरूपसंन्यासस्य यन्निश्श्रेयस- करत्वमुक्तं तदुपपाद्यते— **बाह्येति**।। संसारेऽप्यात्मस्मरणरूपाल्पयोगयुक्तः संन्यासी सुखं विन्दति यदा तदा ध्यानादिमहायोगादियुक्तो मोक्षादिनिश्श्रेयसं विन्दतीति किमु वाच्यमित्यर्थः।। २१।।

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौंतेय न तेषु रमते बुधः।। २२।।

कामादिवर्जनरूपसंन्यासार्थं कामभोगं निंदति— **ये हीति**।। ये हि संस्पर्शजाः विषयसंबंधसंभूताः भोगाः सुखानुभवाः ते दुःखयोनय एव। कुत इत्यत उक्तम्— **आद्यंतवंत इति**।। उत्पत्तिविनाशवत्त्वादित्यर्थः। बुधो ज्ञानी तेषु विषयभोगेषु न रमते सक्तिं न करोतीत्यर्थः।। २२।।

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः।। २३।।

उक्तरूपसंन्यासार्थं कामभोगत्यागं प्रशंसति— **शक्नोतीति**।। यः इहैव मानुषे देहे

शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं मनसोऽनवस्थानं सोढुं शक्नोति। स नरः युक्तः ज्ञानोपायवान् सुखी च भवति। मानुषदेह एव कामादिजवेगः सोढुं सुकरो नान्यदेह इति ज्ञापनाय इहैवेत्युक्तिः। अतोऽत्रैव तत्सहनाय प्रयतितव्यमिति भावः।। २३।।

योऽन्तःसुखोऽन्तरारामस्तथाऽन्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति।। २४।।

ज्ञानिलक्षणं प्रपंचयत्युत्तरैः श्लोकैः। योऽन्तःसुखः कामाद्युपद्रवक्षयाभिव्यक्तस्व रूपसुखः अतंरारामः भगवद्दर्शनजन्यसुखवान्। उक्तज्ञानिलक्षणद्वये हेतुमाह। अंतर्ज्योतिरन्तरभिव्यक्तभगवत्स्वरूपः यत इति। एतेनांतर्ज्योतिष्ट्वमेव ज्ञानित्वमेतत्कथं ज्ञानिलक्षणमिति निरस्तम्। तत्र हेतुसमर्पकत्वादस्येति। असंप्रज्ञातसमाधिस्थस्य बाह्यादर्शनादेव शब्दः। संप्रज्ञातसमाधावन्यदर्शनसत्वेऽपि तस्य विक्षेपाहेतुत्वाददर्शनकल्पमेव तदिति भावः। एवं चास्यान्यव्यवच्छेदप्रधानत्वादन्यदर्शन हीनांतर्ज्योतिष्ट्वमित्येवं लक्षणोक्तिपरत्वेऽपि न दोषः। अन्तःसुखत्वादौ हेतुस्तु स योगी ब्रह्मभूतो ब्रह्मणि स्थितो निर्वाणमशरीरं ब्रह्माधिगच्छति। यतोऽतोऽन्तःसुखादिरित्येवमुत्तरार्धोक्तो ज्ञेयः। नन्वेवं ब्रह्मभूतो बह्माधिगच्छतीत्युक्त्याऽर्थाद्ब्रह्मभूतत्वस्य ब्रह्माधिगतिरूपब्रह्मज्ञानहेतुत्वमुक्तम्। तच्च "तद्बुद्धय" इत्यादिनोक्तमेव ब्रह्मभूतत्वस्य तद्बुद्धित्वादिरूपत्वात्। सत्यमयमप्यनुवाद एव योऽन्तःसुखो योऽन्तरारामो योऽन्तर्ज्योतिरेव यश्च तद्बुद्धित्वादिरूपब्रह्मभूतः निर्वाणं ब्रह्माधिगच्छति स योगी ज्ञानीत्येव ब्रह्मभूतपदं प्रागुक्ततद्बुद्धित्वादिरूपज्ञानसाधनानुवादः। यस्य ज्ञानस्य तद्बुद्धित्वादिरूपं ब्रह्मभूतत्वं साधनं तादृशज्ञानवानंतःसुखत्वादिलक्षणक इति तात्पर्यार्थः। अत्र य इति पुनरुक्तिः सर्वत्रान्वयार्था।। २४।।

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः।
छिन्नद्वैधाऽऽयतात्मानः सर्वभूतहिते रताः।। २५।।

अन्तःसुखत्वादिलक्षणसंपादको ब्रह्माधिगमो न ब्रह्माभूतत्वमात्राद्भवति। किंतु पापक्षयाच्चेत्याह— **लभन्त इति**।। द्वैधशब्दोऽत्र द्वेधाभावो द्वैधमिति विषयापेक्षयाऽन्यप्रकारत्वरूपायथार्थत्वपरः सन्नयाथार्थ्योपेतज्ञानलक्षको भूत्वा संशयविपर्ययपरः। ऋषयो ज्ञानिनः क्षीणकल्मषाः निवृत्तपाप्मानो भूत्वा छिन्नद्वैधाऽऽयतात्मानः सर्वभूतहिते रताश्च भवन्तीति शेषः। छिन्नौ द्वैधौ संशयविपर्ययौ येषां ते छिन्नद्वैधाः ते च ते आयतात्मानश्च दीर्घमनस्काः। श्रवणादिना विदितसर्ववेद्या इति यावत्। छिन्नद्वैधाऽऽयतात्मानः छिन्नद्वैधत्वे क्षीणकल्मषत्वमिवायतात्मत्वमपि बुद्ध्या विविच्य हेतुत्वेन

योज्यम्। यतात्मानो वशीकृतमनस्का इति भिन्नं पदम्। ततश्च निर्वाणमशरीरं ब्रह्म लभंते। उपशब्दोऽत्र योज्यः। उपलभन्ते पश्यंतीत्यर्थः। अत्र ज्ञानस्य प्रतिबन्धकपापक्षयाख्यकारणोक्तावपि 'असाधारणं कारणं कार्य(रूप)स्य लक्षणं भवतीत्यस्य' लक्षणप्रपञ्चनपरत्वमविरुद्धं ध्येयम्।। २५।।

कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्।। २६।।

न केवलमन्तःसुखत्वादिकमेव ज्ञानिलक्षणं किं तु सर्वदेशकालेषु सुखेन ब्रह्मलब्धिमत्त्वमपीत्याह— **कामक्रोधेति**।। यतीनां प्रयत्नवतां यतचेतसां वशीकृतमनस्कानां अभितः सर्वदेशकालेषु वर्तते। रक्षकत्वेन ज्ञानविषयत्वेन वेत्यर्थः। विदितात्मनां ब्रह्मज्ञानिनाम्। शिष्टं व्यक्तम्।। २६।।

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ।। २७।।

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः।। २८।।

स ब्रह्मयोगयुक्तात्मेत्यादौ ब्रह्मयोगादिपदेन प्रकृतध्यानप्रकारमाह— **स्पर्शानित्यादिद्वयेन**।। स्पृश्यंत इति स्पर्शाः शब्दाद्याः श्रोत्रादींद्रियविषयाः तेषां बाह्यत्वं दुःसंपादकत्वं बाह्यान् स्पर्शान् शब्दादीन्बहिः श्रोत्राद्यविषयान् कृत्वा प्रत्याहारेणेंद्रियाणि नियम्येति यावत्। भ्रुवोरंतरे मध्ये चक्षुश्च कृत्वा भ्रुवोर्मध्यमवलोकयन्नित्यर्थः। संप्रेक्ष्य नासिकाग्रं स्वमित्यादेर्वक्ष्यमाणस्योपलक्षणम्। प्राणापानौ समौ समानौ निर्विकारौ नासाभ्यंतरचारिणौ कृत्वा कुंभके स्थित्वेति यावत्।। २७।।

यतेन्द्रियमनोबुद्धिः मुनिः मननशीलः। एवंभूतो यः स मुक्त एवेति स्तुतिः। यद्वा अभिमानादिपरित्यागेन मुक्तसादृश्यान्मुक्त एवेति गौणप्रयोगः।। २८।।

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति।। २९।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो नाम पंचमोऽध्यायः।। ५।।

ध्यानमुक्त्वा ध्येयमाह– **भोक्तारमिति**।। यज्ञो ज्योतिष्टोमादिः। तपः कृच्छ्रचांद्रायणादिः। महांश्चासावीश्वरश्च महेश्वरस्तम्। सुहृदमुपकारिणम्। शान्ति शान्तिसाधनम्। मुक्तिहेतुमिति ईश्वरविशेषणम्। ज्ञात्वा ध्यात्वेत्यर्थः। ऋच्छति साक्षात्करोतीत्यर्थः।। २९।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते पञ्चमोऽध्यायः।। ५।।

षष्ठोऽध्यायः

श्रीभगवानुवाच-

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः।। १।।

।। ॐ।। 'बुद्धिर्योगे त्विमां शृणु' (२-३९) इति योगवचनं प्रतिज्ञातं द्वितीये। स च योग उत्तरषट्के वक्ष्यमाणभगवज्ज्ञानं प्रति उपायः। स च द्विविधः। कर्मयोगो ध्यानयोगश्चेति। तत्र कर्मयोगो ज्ञानं प्रति बहिरंगोपायत्वात् 'त्रैगुण्यविषया वेदा' (२-४५) इत्यादिना द्वितीये संक्षेपेण तृतीयाध्यायादावतीतग्रन्थे विस्तरेण च पूर्वं निरूपितोऽधुना कर्मयोगसाध्यत्वाद्वक्ष्यमाणज्ञानांतरंगसाधनत्वाच्चावसरप्राप्तं समाधियोगं 'स्पर्शान्' (५-२७) इत्यादिना पूर्वाध्यायान्ते सङ्क्षेपेण प्रकृतं विस्तरेणास्मिन्नध्याये वक्ति। आसनादीनामङ्गानां वक्ष्यमाणत्वेऽपि तेषां ध्यानार्थत्वेन ध्यानस्यैव प्राधान्यात्। 'उद्धरेदात्मनात्मानमित्यादिना' ध्यानयोगं विधातुं तत्र ध्याने संन्यासयोगयुक्त एवाधिकारीति ज्ञापनाय कामादिवर्जनरूपसंन्यासं ईश्वराराधनरूपस्वकर्मानुष्ठानलक्षणयोगं चाह— **अनाश्रित इति**।। यः कर्मफलमनाश्रितः कार्यं स्वस्ववर्णाश्रमोचिततया कर्तव्यं कर्म करोति। स संन्यासी योगी च स एव च ध्यानाधिकारीति भावः। आहवनीयाद्यग्नित्यागेन अग्निहोत्रादिक्रियात्यागेन च निःसंगतया वर्तमान एव ध्यानाधिकारीति सांख्यमतमपाकरोति— **नेति**।। निरग्निरक्रियश्च संन्यासी योगी च नेत्यर्थः। यतेरपि 'दैवमेवापरे यज्ञं' (४-२५) इत्यादिनाऽग्निक्रिययोरुक्तत्वात्संन्यासाश्रमस्वीकारकाले पूर्वाश्रमस्वीकृताग्नेरात्मनि समारोपणाच्च सोऽपि संन्यासी योगी च भवत्येवेति भावः।। १।।

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।
न ह्यसन्यस्तसङ्कल्पो योगी भवति कश्चन।। २।।

'स संन्यासी च योगी चे' त्युक्त्या प्राप्तां तयोरत्यन्तभेदशंकां निरसितुम् अमुख्ययोगापेक्षया पृथगुक्तोऽपि संन्यासो मुख्ययोगान्तर्भूत इत्याह— **यमिति**।। 'ज्ञेयः स नित्यसंन्यासी' त्यादिनोक्तप्रकारेण यं कामक्रोधादिवर्जनरूपं संन्यासं योगं मुख्ययोगं ज्ञानोपायभूतकामादिवर्जनविशिष्टनिवृत्तकर्मानुष्ठानरूपयोगान्तर्भूतं विद्धि जानीहि। हे पाण्डव, कुतः कश्चन कोऽपि। असन्न्यस्तसंकल्पः अत्यक्तसंकल्पादिः, संन्यासहीनकर्मानुष्ठानमात्रवानिति यावत्। योगी ज्ञानोपायवान्न भवति। न हि सामग्र्येकदेशः कार्यजनको भवति। क्वचित्पृथगुक्तिस्तु ज्ञानभक्त्योः पृथगुक्तिरिवैकदेशापेक्षयेति भावः।। २।।

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शमः कारणमुच्यते।। ३।।

ध्यानाधिकारत्वेनोक्तो मुख्यः कर्मयोगः किं सकृदनुष्ठेय उत फलप्राप्ति पर्यन्तमित्यतः फलपर्यंतमित्याह— **आरुरुक्षोरिति**।। योगं ज्ञानोपायं आरुरुक्षोः संपूर्णं कामयमानस्य मुनेः परोक्षज्ञानिनः कर्म कारणमुच्यते। योगारोहरूपसाक्षात्कारस्येति योज्यम्। अपरोक्षरूपफलोदयपर्यन्तं कार्यमिति भावः। तस्यैव मुनेर्योगारूढस्य संपूर्णज्ञानोपायस्यापरोक्षज्ञानिनः शमः उपलक्षणं भगवन्निष्ठबुद्धित्वरूपध्यानव्याख्यानार्चनादिकं कर्म कारणं मुक्तिगतसुखातिशयस्येति योज्यम्। यद्यप्ययं प्रश्नो 'यदा ते मोहकलिलं' (२-५२) इत्यनेन द्वितीये परिहृतः। तथापि तत्र परोक्षज्ञानार्थिनोऽत्र तु योगारोहशब्दितसंपूर्णोपायशब्दितापरोक्षाज्ञानार्थिन इति भेद इति भावः। यद्वा योगारूढस्येत्युत्तरार्धे अपरोक्षज्ञानिनो ध्यानादिकं कर्म वक्तुं 'यदा त' इति श्लोकोक्तस्यैव प्रश्नोत्तरस्य पूर्वार्धेनानुवाद इति ज्ञेयम्। यद्वा, कर्मयोगमध्ये ज्ञानार्थिना कीदृशो योगोऽवश्यापेक्षित इत्यत आह— **आरुरुक्षोरिति**।। पूर्वार्धेन ज्ञानार्थिनः उत्तमाधममध्यमरूपनानाजनशुश्रूषाख्यमेव कर्मावश्यापेक्षितमित्युच्यते। (ज्ञानार्थिनो यथाशक्ति त्रिविधप्राणिनां शुश्रूषयोपकारकृतः हरिस्तुष्टः स्वापरोक्षं ददाति। तेन तदवश्यं कार्यमित्युच्यते) चरमार्धेन तु ज्ञानिनो नानाजनशुश्रूषाख्यकर्मोपशम एव शमपदेनोच्यते। न तु ध्यानाद्युपशमः तत्तु कार्यमेवेत्युच्यते। शमपदस्योभयार्थत्वात् (तस्य स्वोत्तमसेवयैवेष्टसिद्धौ अन्यशुश्रूषया कृत्याभावात्) एवं चात्र श्लोके पूर्वार्धे ज्ञानार्थिनः कर्मापेक्षितमित्युक्त्वोत्तरार्धे ज्ञानिनः शमपदेन कर्मोपशमोऽपेक्षित इत्युच्यते। तथा च 'न निरग्निर्नचाक्रियो योगी' त्याद्युक्तिविरोध इति प्रत्युक्तं ध्येयम्। कर्मशमशब्दाभ्यां नानाजनशुश्रूषाख्यकर्मतदुपशमयोरेवात्र विवक्षितत्वादिति।। ३।।

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
सर्वसङ्कल्पसंन्यासी योगारुढस्तदोच्यते।। ४।।

योगारूढशब्दितसंपूर्णोपायसिद्धिमतो लक्षणमाह– **यदेति।।** यदा हींद्रियार्थेषु शब्दादिविषयेषु कर्मसु च प्रयत्नं विनाऽपि नानुषज्जते। ननु कर्माननुषंगो नाम कर्मस्वरूपत्याग एव तथा न 'न चाक्रियो योगी' ति प्रागुक्तविरोध इत्यतः कर्माननुषंगं स्वयमेव व्याख्याति– **सर्वेति।।** ज्ञानिनः कर्माननुषंगो नाम सर्वकर्म (सु) संकल्पन्यास एव। सर्वेषु कर्मसु संकल्पत्यागी सन् कर्मसु नानुषज्जते यदा तदा योगारूढ उच्यते इति योजना। कर्मसु संकल्पत्यागो नाम ममतात्याग एव। सङ्कल्प(ल्पाख्य)क्रियादिकं सर्वं भगवदधीनमिति ज्ञानमेव। एवं च सङ्कल्पादेर्भगवदधीनताज्ञानेन हेतुना कर्मस्वनासक्तत्वे सत्यप्रयत्नेन शब्दादिविषयेषु अनासक्तत्वं योगारूढस्य लक्षणमित्युक्तं भवति। अप्रयत्नेनेति विशेषणाद्योगमारुरुक्षौ नातिव्याप्तिः। तस्यानासक्तेः प्रयत्नसाध्यत्वात्।। ४।।

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।। ५।।

यस्य ध्यानयोगस्य कामादिवर्जनरूपसंन्यासयुक्तस्ववर्णाश्रमोचितकर्मानुष्ठानवानधिकारी उक्तः। उपरोक्षाख्यफलपर्यंतं कर्मानुष्ठानं चोक्तम्। स एव ध्यानयोगोऽभियोगेन कार्य इत्याह– **उद्धरेदिति।** आत्मना मनसा आत्मानं जीवमुद्धरेत्। पुमर्थभाजनं कुर्यात्। आत्मानं जीवं नावसादयेत्। न क्लेशभाजनं कुर्यात्। कुतः हि यस्मादात्मनो जीवस्यात्मैव मन एव मुख्यसाधनमित्याह– **उद्धरेदिति।।** आत्मना परमात्मना। तत्प्रसादेनेति यावत्। आत्मानं जीवं प्राग्वदेव योजना। आत्मनो जीवस्यात्मैव परमात्मैव बन्धुः रिपुश्च हि यतः।। ५।।

बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्।। ६।।

जितात्मनः प्रशान्तस्य परमात्मा समाहितः।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः।। ७।।

कीदृशस्यात्मनः कीदृशं मनो बन्धुः रिपुश्चेत्यत आह– **बन्धुरिति।।** येनात्मना येन जीवेनेति समानाधिकरणं वा। येन जीवेन कर्त्रा आत्मना बुद्ध्या करणेनेति व्यधिकरणं वा। आत्मा मनः जितं वशीकृतं तस्यात्मनो जीवस्यात्मा मनः बन्धुरेवो-

पकार्येव भगवद्ध्यानोपयोगीति यावत्। अनात्मनस्तु अजितमनस्कस्य तु जीवस्य आत्मैव मन एव शुत्रुवत्प्रसिद्धशत्रुरिव शत्रुत्वे अनुपकारित्वे वर्ततेति मनोजयेन ध्यानयोगः कार्य इत्युक्तं भवति।। ६।।

(यद्वा) कीदृशस्य हरिर्बन्धुः रिपुश्चेत्यत आह– **बन्धुरिति।।** पूर्ववदेवार्थो योजना च, परंतु प्रथमांतात्मशब्दोऽत्र परमात्मपरः। आत्मना बुद्ध्येत्यत्र बुद्ध्युपलक्षितभक्त्येत्यर्थः। अनात्मनस्त्वित्यस्य भक्तिबलेनावशीकृत भगवत्स्वरूपस्य पुंस इत्यर्थः।। ६।।

ननु मनसो भगवतश्च वशीकरणे तावस्य बन्धू भवत इत्युक्तम्। केनोपकारेण तावस्य बन्धू। "आत्मना आत्मानमुद्धरेदि" ति आत्मोद्धारं कुरुत इत्युक्तमिति चेत्स एव क इत्यत आह– **जितेति।।** जितात्मनः वशीकृतमनस्कस्य भक्त्या वशीकृत भगवत्स्वरूपस्य प्रशान्तिर्भवति। स्वत एव मनसो विषयेष्वप्रवृत्तिर्भवतीत्यर्थः। संपूर्णयोगसिद्धिमद्रूपो योगारूढो भवतीति यावत्।। ७।।

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः।। ८।।

'यदा हि नेन्द्रियार्थेष्वि' त्यत्रापरोक्षिणो लक्षणोक्तावपीह लक्षणं स्पष्टयति– **शीतोष्णेत्यादिसार्धश्लोकद्वयेन।।** शीतोष्णादिद्वन्द्वधर्मेषु कूटस्थः कूटमाकाशं तद्वत्तिष्ठतीति कूटस्थः उत्सेकानुत्सेकरूपविकारहीन इत्यर्थः। तत्र हेतुर्ज्ञानेत्यादि। वेदादौ सर्वत्र विष्णोरुत्कर्षज्ञानं ज्ञानमित्युच्यते। तदवांतरमाहात्म्यविशेषज्ञानं विज्ञानमित्युच्यते। यद्वा परोक्षापरोक्षज्ञाने ज्ञानविज्ञानशब्दाभ्यां वाच्ये ताभ्यां तृप्तो विषयेष्वलंबुद्धिमान्विजितेन्द्रियश्च यतोऽतः कूटस्थः समलोष्टाश्मकाञ्चनः योगी योगं कुर्वन् युक्तः योगसंपूर्ण इत्युच्यते।। ८।।

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते।। ९।।

स एव च सुहृदादिषु समा भगवद्विषयिणी बुद्धिर्यस्य स समबुद्धिर्योगारुढः योगिवर्गात्सर्वस्माद्विशिष्यत इति। सुहृदादिषु सर्वत्रस्थितहरिरूपाणां गुणादिषु तारतम्यं नेति बुद्धिर्वा सुहृदि सुहृत्त्वमेव मित्रादिषु मित्रत्वादिकमेव ददाति न तु सुहृदि मित्रत्वं मित्रादौ सुहृत्वादिकमिति वैषम्येणातः सुहृदादौ सुहृत्त्वादिकमीशकृतमेव न स्वतंत्रमिति वा भगवद्विषये समबुद्धिः। यद्वा सुहृदादिजीवविषये समा बुद्धिर्यस्येत्यर्थः, तेषु

समबुद्धित्वं नाम यत्सुहृत्त्वमित्रत्वादिकमस्ति तन्न स्वरूपांतर्गतं किं त्वंतः रणोपाधिकमेव देवदानवमानवभेदेन स्वतो विषमाणां चैतन्यस्वभावत्वमेकमेव सममिति बुद्धिमत्त्वमेवेति ज्ञेयम्। अथवा सुहृदादिषु विषये शास्त्रेषु यथा यथा वृत्तिर्विहिता तथा तथा वर्तनं वर्तनज्ञानं वा सुहृदादिजीवेषु समबुद्धिर्ध्येया। प्रत्युकारनिरपेक्षोपकारकृत् सुहृत्। क्लेशस्थानं विज्ञाप्य ततो रक्षाकृन्मित्रम्। वधादिकर्ता अरिः। कर्तव्ये उपकारे अपकारे च य उदास्ते स उदासीनः। उपकारापकारोभयकृन्मध्यस्थः। अवाञ्छितकृद् द्वेष्यः। बन्धुरुपकर्ता।। ९।।

योगी युञ्जीत सततमात्मानं रहसि स्थितः।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः।। १०।।

उद्धरेदित्यादिना विहितं ध्यानयोगमनूद्य तत्प्रकारमाह– **योगीति।।** योगी ज्ञानोपायमनुतिष्ठन्नात्मानं मनः युञ्जीत भगवन्निष्ठं कुर्यात्। समाधियुक्तं कुर्यादिति यावत्। सततं निरन्तरं रहसि स्थित एकाकी संगशून्यः यतं नियमितं चित्तं मनः आत्मा देहश्च यस्य स यतचित्तात्मा, निराशीः कामनाहीनः परिग्रहोज्झश्च भूत्वा कुर्यादिति।। १०।।

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम्।। ११।।

पुनर्ध्यानप्रकारमेवाह– **शुचावित्याद्यनेकश्लोकैः।।** शुचौ देशे मनःप्रसादहेतुभूतदेशोपलक्षणमेतत्। चेलं वस्त्रम् अजिनं व्याघ्रादिचर्म कुशो दर्भ उत्तरं उपरि यस्य तत्तथा नात्युच्छ्रितं नातिनीचं नसमासः एवंभूतमासनं स्थिरं यथा भवति यथाऽऽत्मनः प्रतिष्ठाप्य।। ११।।

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये।। १२।।

तत्रासने उपविश्य। तदाह सूत्रे 'ॐ आसीनः संभवात् ॐ' (४-१-७) इति। यतचित्तेन्द्रियक्रियः सन् एकाग्रं मनः कृत्वा आत्मनो मनसो विशुद्धये सर्वमलदाहाय स्वस्य संसारमलनिवृत्तये वा योगं ध्यानयोगं युञ्ज्यात् कुर्यादिति विध्यनुवादेन प्रकारोक्तिरियम्।। १२।।

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्।। १३।।

कायशिरोग्रीवं कायो मध्यदेहः स च शिरश्च ग्रीवा च प्राण्यंगत्वाद्द्वन्द्वैकवद्भा-वः। समं ऋजु धारयन् अचलं यथा तथा, स्थिरो दृढः, स्वं नासिकाग्रं संप्रेक्ष्य दिशश्चानवलोकयन् युञ्ज्यादिति पूर्वेण वा युक्त आसीतेत्युत्तरेण वाऽन्वयः।। १३।।

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः।। १४।।

प्रशान्तात्मा स्वतो विषयेषु अप्रवृत्तमनस्कः विगतभीः व्याघ्रचोरादिभयहीनः, ब्रह्मचारिव्रते स्थितः मनः सम्यक् प्रत्याहृत्य मच्चित्तो मद्ध्यानवान्मत्परः अहमेव परः सर्वोत्तमः यस्य स मत्परः, युक्तः समाधिसंपन्न आसीतेत्यर्थः।। १४।।

युंजन्नेवं (एवं युञ्जन्) सदाऽऽत्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति।। १५।।

समाधेः फलमाह— **युञ्जन्निति**।। नियतमानसो यतचित्तः। योगी योगानुष्ठाता। एवमुक्तप्रकारेण सदाऽऽत्मानं युञ्जन् ध्यायन् आत्मानं मनो भगवति युक्तं कुर्वन्निति वा निर्वाणपरमां शरीरत्यागोत्तरकालीनां मत्संस्थां मयि स्थितिरूपां शान्तिमधिगच्छति प्राप्नोति। न जीवन्मुक्तिमात्रमाप्नोतीत्यर्थः।। १५।।

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन।। १६।।
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।। १७।।

ध्यानयोगनिष्ठस्याहारादिनियममाह— **नात्यश्नत इत्यादिद्वाभ्यां**।। अति अधिकं भुञ्जानस्य एकान्तं सर्वथैवाभुञ्जानस्य चातिनिद्राशीलस्यातिजाग्रतश्च योगो नैवास्तीत्यर्थः। अत्राशनजागरणनिषेधोऽशक्तस्य शक्तस्य त्वनशनादावपि न योगक्षतिरिति ज्ञेयम्।। १६।।

कथंभूतस्य योगो भवतीत्यत आह— **युक्तेति**।। युक्तौ योगोपेतौ आहारविहारौ भोजनसञ्चारौ यस्य स तथा तस्य, यावता श्रमादिर्न भवति तावदाहारव्यापारवत इत्यर्थः। कर्मसु कार्येषु युक्तचेष्टस्य श्रमानापादकचेष्टायुक्तस्य युक्तस्वप्नावबोधस्य यावन्निद्राऽवबोधौ योगाविघातकौ तावन्निद्रावबोधोपेतस्य योगो ध्यानयोगः समाधिरितियावत्। दुःखहा भवंतीत्यर्थः।। १७।।

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा।। १८।।

योगसंपूर्तिस्वरूपमाह— **यदेत्याद्यनेकश्लोकैः**।। यदा विशेषेण नियतं विषयेभ्यः प्रत्याहृतं चित्तमात्मन्येवावतिष्ठते सर्वकामेभ्यः निस्पृहश्च यदा तदा युक्तो योगसंपूर्तिमानित्युच्यत इत्यर्थः।। १८।।

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः।। १९।।

योगसंपन्नः कथं तिष्ठतीत्यत आह— **यथेति**।। वायुशून्यदेशस्थो दीपो यथा नेङ्गते न चलति। सा उपमा दृष्टान्तः कस्येत्यत उक्तम्— **योगिन इति**।। आत्मनो योगं भगवद्विषयसमाधिं युञ्जतः कुर्वतः योगिनः यतचित्तस्येति।। १९।।

यत्रोपरमते चित्तं निरुद्धं योगसेवया।
यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति।। २०।।

योगसेवया निरुद्धं चित्तं यत्र समाधावुपरमते बाह्यव्यापारहीनं भवति। यत्र चैव यस्मिन्नेव समाधियोगे आत्मना मनसा आत्मानं भगवंतं पश्यन्नात्मनात्मनि देहे तुष्यति तोषमाप्नोतीत्यर्थः। यच्छब्दयोस्तमित्यग्रेऽन्वयः एवमुत्तरत्रापि।। २०।।

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतींद्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः।। २१।।

यत्र समाधौ स्थितः बुद्धिग्राह्यं अनुभवेन वेद्यं अतीन्द्रियमिन्द्रियाग्राह्यं आत्यन्तिकमतिशयितं सुखं वेत्ति अनुभवति। यत्र योगे स्थितोऽयं तत्त्वतो भगवद्रूपान्न चलति तमित्यन्वयः।। २१।।

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते।। २२।।

यं योगं लब्ध्वा च ततोऽपरं लाभमधिकं न मन्यते यस्मिन् स्थितो गुरुणाऽपि दुःखेन दुःखहेतुना न विचाल्यते।। २२।।

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्।
स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा।। २३।।

तं दुःखसंयोगवियोगं दुःखसंयोगेन वियुज्यमानम्। दुःखसंयोगस्य वियोगो

यस्मादिति वा। वियुज्यतेऽनेनेति वियोगः। करणे घञ्। दुःखसंयोगो यस्य वियोग इति वा। योगसंज्ञितं विद्यात्। संयोगपदेन न केवलमुत्पन्नदुःखं नाशयति किं तूत्पत्तिमेव निवारयतीति सूचयति। स योगः समाधिः निर्विण्णचेतसा विषयविरक्तमनसा निश्चयेन योक्तव्योऽवश्यं कर्तव्य एव मुमुक्षुणेत्यर्थः। मुमुक्षोर्ध्यानायोगव्यवच्छेदार्थोऽयं निश्चयशब्दः। अयोगव्यवच्छेदविधानार्थमेव उद्धरेदित्यत्र विहितस्यात्र पुनर्विधानम्।। २३।।

सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः।। २४।।

किंच संकल्पेन एतदर्थमिदं कुर्यामिति संकल्पपूर्वकानुष्ठानेन प्रभवो जन्म येषां तान्कामान् विषयभोगान् सर्वानशेषतो निःशेषतः त्यक्त्वा इन्द्रियग्रामं इन्द्रियसमूहं समन्ततः सर्वतः मनसैव विनियम्य, इन्द्रियनियमनं न मनसोऽन्येनेति ज्ञापनायैवकारः।। २४।।

शनैःशनैरुपरमेद्बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिंतयेत्।। २५।।

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।। २६।।

मनश्च धृतिगृहीतया धैर्योपेतया धारणया गृहीतया वशीकृतयेति वा, बुद्ध्या शनैः शनैरुपरमेत्। विषयेभ्यो व्यावर्तयेत्। भगवति रमेतेति वाऽर्थः। किंचात्मसंस्थं भगवन्निष्ठं मनः कृत्वा बुद्ध्येत्यनुषंगः। भगवतोऽन्यत्र किंचिदपि न चिंतयेत्।। २५।।

ध्यानेन मनोऽनवस्थितं चेत्प्रत्याहारेण वशीकुर्यादित्याह— **यतो यत इति।।** "आद्यादिभ्य उपसंख्यानमि" ति सप्तम्यर्थे तसिः। यत्र यत्र विषये स्वतश्चञ्चलं मनोऽस्थिरं सत् निश्चरति प्रवर्तते ततस्तत एतन्मनो नियम्य प्रत्याहृत्य तदात्मन्येव भगवत्येव वशं तन्निष्ठमेव नयेत्। कुर्यादित्यर्थः।। २६।।

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्।। २७।।

एवं युञ्जन् सदाऽऽत्मानं योगी विगतकल्मषः।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते।। २८।।

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।। २९।।

एवं साङ्ख्योगमभिधाय तदनुष्ठातुः फलं प्रपञ्चयति— **प्रशान्तेति।।** प्रशान्तमनसं स्वतो विषयेष्वप्रवृत्तमनसं शांतरजसं विगतरजोगुणमत एवाकल्मषं कामक्रोधादिदोषहीनं रजोजन्यत्वात्तेषां ब्रह्मभूतं "तद्बुद्धय" इत्युक्तदिशा ब्रह्मणि स्थितिमन्तमेनं योगिनं समाधियोगवन्तमुत्तमं सुखं कर्तृ, उपैति प्राप्नोति। हि प्रसिद्धं श्रुत्यादावित्यर्थः।। २७।।

सुखमुपैतीत्युक्तसुखं किमायासेन प्राप्नोति कीदृशं च तदित्यतो व्यनक्ति— **एवमिति।।** विगतकल्मषो विगतरागादिदोषो योगी एवमुक्तदिशाऽऽत्मानं भगवन्तं युञ्जन् ध्यायन् (धारयन्) सुखेनाक्लेशेन ब्रह्मसंस्पर्शं भगवत्संसर्गाभिव्यक्तं अत्यन्तमतिशयितं सुखमश्नुते प्राप्नोति।। २८।।

एवं युञ्जन्निति ध्यानप्रकरणस्य फलकथनेनोपसंहृत्येदानीं ध्येयमाह— **सर्वेति।।** 'भोक्तारमिति' (५-२९) पञ्चमान्ते 'मच्चित्तो युक्त आसीत' इत्यत्रैवाध्याये (६-१४) ध्येयोक्तावपीहोत्तमाधिकारिणां ध्येयस्योक्तिरिति ज्ञेयम्। आत्मानं परमात्मानं ब्रह्मादिसर्वप्राणिगतम् आत्मनि परमात्मनि सर्वत्र ब्रह्मादितृणांतेषु भगवन्तं ऐश्वर्यादिना साम्येन पश्यन्समदर्शनो योगयुक्तात्मा समाधियुक्तमनस्कः। ईक्षते पश्यतीत्यर्थः।। २९।।

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।। ३०।।

सर्वभूतस्थात्माध्यानविशेषस्य फलमाह— **यो मामिति।** सर्वत्र ब्रह्मादितृणांतेषु स्थितं मां यः पश्यति सर्वं च ब्रह्मादिजगत् मयि मदधीनं पश्यति। तस्याहं न प्रणश्यामि सर्वदा योगक्षेमवहः स्यामित्यर्थः। स च मे न प्रणश्यति सदा मद्भक्तो भवतीत्यर्थः।। ३०।।

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते।। ३१।।

'यो मामिति' श्लोकोक्तमेव स्पष्टयति— **सर्वेति।** य एकत्वमास्थितः सर्वत्र परमेश्वर एवेत्यास्थितो ज्ञानी सर्वभूतस्थं मां भजति सेवते। स योगी सर्वप्रकारेण न्यायेनान्यायेन वा वर्तमानोऽपि मयि वर्तते। अन्यायप्रवृत्तावपि ज्ञानिनो मोक्षो नियत एवेति भावः। तदाह सूत्रे 'ॐ कामकारेण चैक ॐ' (३-४-१५) इति। आनन्दह्रासस्त्वस्त्येवेति ज्ञेयम्।। ३१।।

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः।। ३२।।

समदर्शन इत्युक्ते गोगवयादिवद्भवति किं साम्यदर्शनमित्याकांक्षायामेकत्वमास्थित इति साम्यदर्शनं स्वयमेव व्याख्यातमिदानीं भगवदनुवर्तिविषयतया साम्यदर्शनं स्वयमेव व्याचष्टे– **आत्मेति**।। यथा सुखं स्वस्य प्रियं दुःखं चाप्रियं तथाऽन्येषामपि भगवद्भक्तानामित्येवमात्मौपम्येन स्वसादृश्येन सर्वत्र भगवदनुवर्तिषु समं यः पश्यति सुखमेव सर्वभक्तेषु यो वांछति स्वात्मन इवेति यावत् स योगी परमो मत इति विष्ण्वनुवर्तिषु स्वात्मनीव स्नेहं कुर्वन् श्रेष्ठो मत इति फलितार्थः।। ३२।।

अर्जुन उवाच-

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम्।। ३३।।

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।। ३४।।

भगवदुक्तयोगस्याननुष्ठानलक्षणमप्रामाण्यमाशंकते– **योऽयमिति**।। हे मधुसूदन, साम्येन भगवतः साम्येन सर्वत्रैक्येन तथा भगवदनुवर्तिषु चात्मौपम्यरूपसाम्येनेति वा। मनस एकाग्रत्वेनेति वा। योऽयं ध्यानयोगस्त्वया प्रोक्तः एतस्य योगस्य चञ्चलत्वात्स्थिरां स्थितिं मनसः चञ्चलत्वात् न पश्यामि।। ३३।।

चञ्चलत्वादित्यत्र कस्येति शंकां निरस्यन्मनोनिग्रहेणास्तु योगस्य स्थिरतेति शंकां निराह– **चञ्चलमिति**।। मनश्चंचलं हि प्रसिद्धम्। प्रमाथि प्रमथनशीलं देहेंद्रियक्षोभकरं किंच बलवत्। विवेकेनापि जेतुमशक्यं। दृढम् विषयवासनानुविद्धतया दुर्भेदं साधुविषये नेतुमशक्यम्। अत आकाशे दोधूयमानस्य वायोः वस्त्रेण कुम्भादिना वा निरोधनमशक्यं यथा तथा तस्य मनसो निग्रहं निरोधन दुष्करमहं मन्ये जानामि।। ३४।।

श्रीभगवानुवाच-

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।। ३५।।

असंयतात्मना योगो दुष्प्राप इति मे मतिः।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः।। ३६।।

अर्जुनोक्तं मनश्चाञ्चल्यादिकमङ्गीकृत्य मनोनिग्रहोपायं भगवानाह।। **असंशय-मिति।।** हे महाबाहो! स्वभावतश्चञ्चलं मनोऽसंशयं यथा भवति तथा दुर्निग्रहं दुःखेन निरोध्यं तथाऽभ्यासवैराग्याभ्यां तु निगृह्यते।। ३५।।

ननु यथा मत्तमातङ्गः स्वयमेव श्रान्तः सन् शान्तो भवति। तथा विषयैस्तृप्तं मनः कदाचित्स्वयमेव नियतं भवति किमभ्यासादिनेत्यत आह— **असंयेति।।** अभ्या-सादितोऽवशीकृतचित्तेन योगो दुष्प्रापोऽसाध्यः इति मे मतिः। अभ्यासादिना वश्या-त्मना वशीकृतमनस्केन तु पुंसा यतता पुनरनेनोपायेन यत्नं कुर्वता योगोऽवाप्तुं शक्य इत्यर्थः।। ३६।।

अर्जुन उवाच-

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति।। ३७।।

अभ्यासादिहीनस्य फलं पृच्छति—**अयतिरिति।।** अयतिरप्रयत्नः श्रद्धया आस्ति-क्यबुद्ध्या उपेतो युक्तः योगात् ध्यानरूपोपायात् चलितमानसः योगसंसिद्धिं ध्यानसंपूर्तिं ध्यानफलं ज्ञानमिति यावत्। अप्राप्य हे कृष्ण कां गतिं गच्छतीति।। ३७।।

कच्चिन्नोभयविभ्रष्टः छिन्नाभ्रमिव नश्यति।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि।। ३८।।

कच्चित्किमित्यर्थः। उभयविभ्रष्टः उभयस्मात्स्वर्गापवर्गरूपाद्विभ्रष्टः प्रच्युतः ऐहि-कामुष्मिकपुमर्थाद्विभ्रष्ट इति वा। यद्वा स्वर्गाद्युपायात् काम्यकर्मानुष्ठानादपवर्गोपाया-द्ध्यानाच्च विभ्रष्टः अप्रतिष्ठो निराश्रयः अत एव ब्रह्मणः पथि परब्रह्मप्राप्त्युपाये विमूढः वायुना द्वेधाकृतमेघ इव किं नश्यति नरकाद्यनर्थं प्राप्नोत्युत न नश्यति।। ३८।।

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते।। ३९।।

एतन्मे संशयं एतं संशयं। व्यक्तोऽर्थः।। ३९।।

श्रीभगवानुवाच-

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते।
नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति।। ४०।।

प्राप्य पुण्यकृतान्लोकानुषित्वा शाश्वतीः समाः।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।। ४१।।

प्रश्नस्योत्तरमाह **सार्धैश्चतुर्भिः**। हे पार्थ, इह लोके अमुत्र परलोके च नाशस्तस्य नास्ति। इह नाशस्तिर्यगादिदुर्गतिप्राप्तिः। परत्र नाशो नरकप्राप्तिः। तद्द्वयं तस्य योगभ्रष्टस्य नेत्यर्थः। नञ्द्वयमादरार्थम्। कुत इत्यत उक्तम्– **न हीति**।। कल्याणकृत् श्रद्धया किंचित्कालं ध्यानादिकृदित्यर्थः।। ४०।।

तर्हि किं प्राप्नोतीत्यत आह– **प्राप्येति**।। पुण्यकृतान् पुण्यसंपाद्यान्लोकान्प्राप्य तेषु शाश्वतीः समाः अनेकसंवत्सरानुषित्वा शुचीनां श्रीमतां धनिनां गेहे अभिजायते।। ४१।।

अथवा योगिनामेव कुले भवति धीमताम्।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्।। ४२।।

धीमतां ज्ञानिनां योगिनां कुले वंशे वा भवति। यत् ईदृक् जन्म उक्तं द्विविधं जन्म एतत् दुर्लभं (कष्टलभ्यं) न सुलभसाध्यं हि प्रसिद्धम्।। ४२।।

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम्।
यतते च ततो भूयः संसिद्धौ कुरुनंदन।। ४३।।

तत्र द्विप्रकारेऽपि जन्मनि पौर्वदैहिकं पूर्वदेहे भवंतं बुद्धिसंयोगं मनोयोगं ध्यानमितियावत्। लभते। ततो भूयः पौर्वदैहिकादधिकं संसिद्धौ ध्यानसंपूर्तौ यतते यत्नं करोति हे कुरुनन्दन।। ४३।।

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते।। ४४।।

तेनैव पूर्वाभ्यासेनावशोऽपि सन् ह्रियते ध्यानादौ बुद्धिपूर्वं स्वरसत्तया प्रवृत्तिहीनोऽपि पूर्वाभ्यासवशात् ध्यानादिकर्मणि प्रवर्तत इत्यर्थः। योगभ्रष्टस्य पुण्यलोकादिकमित्येतत्कैमुत्येनाप्याह– **जिज्ञासुरपीति**।। योगस्य ध्यानयोगस्य जिज्ञा-

सुरपि केवलं योगज्ञानेच्छुरपि। "न लोकाव्यये" ति नञा निर्दिष्टस्य अनित्यत्वाद्योगस्येति साधु। मुक्तो भवतीति यावत्। किमु किंचित्कालं योगानुष्ठातेति भावः।। ४४।।

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्।। ४५।।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन।। ४६।।

योगजिज्ञासामात्रेण मुक्तिश्चेत्तदनुष्ठानं व्यर्थमित्यतो न तावन्मात्रेण मुक्तिरपि त्वनेकजन्मनीत्याह– **प्रयत्नादिति।।** योगजिज्ञासुरपीत्यनुषङ्गः। योगं ज्ञात्वेति शेषः। यतमानः प्रयत्नं कुर्वन् ततः प्रयत्नाद्योगी ध्यानयोगवान्सन्संशुद्धकिल्बिषः निर्धूतपापः अनेकजन्मभिः संसिद्धोऽपरोक्षज्ञानी अनेकजन्मसंसिद्धः ततः अपरोक्षज्ञानात्। परां गतिं यातीति।। ४५।।

योगं स्तौति– **तपस्विभ्य इति।।** कृच्छ्रचांद्रायणादितपोयुक्तेभ्योऽयोगिज्ञानिभ्योऽपि योगी ध्यानानुष्ठाताऽधिको मतः। यस्मात् (तस्मात्) सर्वाधिको मतः तस्मात्सर्वाधिकत्वाद्योगस्येत्यर्थः।। ४६।।

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः।। ४७।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्मसंयमयोगो नाम षष्ठोऽध्यायः।। ६।।

ध्यानवत्स्वपि तारतम्यमाहः– **योगिनामिति।** सर्वेषामपि योगिनां मध्ये श्रद्धाशब्दोदितभक्तिमान्यः स युक्तो मतः। तत्रापि भक्तिमत्स्वपि यो मां भजते सेवते स युक्ततरः। तत्रापि मद्गतेनान्तरात्मना मद्गतांतःकरणेन फलकामनां विना भजते स युक्ततमो मत इति। योगिष्वप्युत्तम इति मे मतः।। ४७।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते षष्ठोऽध्यायः।। ६।।

सप्तमोऽध्यायः

श्रीभगवानुवाच-

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु।। १।।

।। ॐ।। 'बुद्धियोगे शृण्विति' (२-३९) भगवज्ज्ञानोपायं प्रतिज्ञाय कामादिवर्जनयुक्तनिवृत्तकर्मानुष्ठानरूपकर्मयोगं ज्ञानस्य बहिरङ्गोपायमापंचमाध्यायान्तं ज्ञानान्तरङ्गसाधनं ध्यानरूपं योगं च षष्ठे निरूप्याधुना पूर्वोक्तं ध्यानं भक्तिपूर्वकमेवानुष्ठितं ज्ञानसाधनं, न चैद्यादेरिव द्वेषपूर्वकम्। अतो भक्त्यर्थं भगवन्माहात्म्यं 'मयि' इत्यादिनाऽध्यायषट्केनोच्यते। 'न त्वेवाहं' (२-१२) इत्यादिना पूर्वषट्के(ऽपि) भगवन्माहात्म्योक्तावपि साधनस्यैव प्राचुर्येणोक्तिः। उत्तरषट्के क्वचित् क्वचित्साधनस्योक्तावपि प्राचुर्येणैव भगवन्महिम्नो वर्णनान्न पूर्वोत्तरषट्कयोः सांकर्यम्। तयोः पौर्वापर्यबीजं तु यदर्थं साधनं निरूपितं तज्ज्ञानाय ज्ञातव्यमाहात्म्यनिरूपणात्कार्यकारणभावरूपम्। 'योगं युंजन्समग्रं मां यथा ज्ञास्यसि तच्छृणु' इति प्रतिज्ञान्तरकरणादेव व्यक्तमिति श्रोतारमभिमुखीकुर्वन्भगवन्माहात्म्यं वक्तुं प्रतिजानीते– **मयीति**।। मयि श्रीकृष्णे आ अत्यंतं सक्तमनाः अतीवस्नेहयुक्तमनाः योगं द्विरूपं ज्ञानोपायं युंजन्ननुतिष्ठन्मदाश्रयः भगवानेव मया सर्वं कारयति स एव मे शरणं तस्मिन्नेवाहं स्थित इति जानन्नित्यर्थः। असंशयं समग्रमिति क्रियाविशेषणम्। तव असंशयं समग्रं च यथा भवति तथा मां यथा येन प्रकारेण ज्ञास्यसि तच्छृणु तत्प्रकारकमज्ज्ञानजनकवचनं श्रुत्वा तत्र निष्ठां कुर्वित्यर्थः। तदित्यस्य तथेति वाऽर्थः।। १।।

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते।। २।।

श्रवणं प्रवचनाधीनमित्याह– **ज्ञानमिति**।। ज्ञानविज्ञानशब्दौ कर्मार्थल्युडन्तौ।

हे पार्थ, ते तुभ्यं इदं मदीयं विज्ञानसहितं ज्ञानं विशेषेण ज्ञातव्यसहितं ज्ञातव्यं माहात्म्यं सामान्यं विशेषमाहात्म्यं च वक्ष्यामीत्यर्थः। अशेषत इत्यस्य यावदर्जुनयोग्यं तावन्मध्ये शिष्यमाणमकृत्वेत्यर्थः। वक्ष्यमाणं स्तौति— **यदिति**।। यन्माहात्म्यं ज्ञात्वा भूयः पुनरन्यज्ज्ञातव्यमिह मदुक्तेऽर्थे नावशिष्यते अवशिष्टं नास्तीति।। २।।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।। ३।।

प्रतिज्ञाते ज्ञाने आदरजननाय तस्य दौर्लभ्यमाह— **मनुष्याणामिति**।। कश्चिदेव पुण्यवान्पुरुषः सिद्धये ज्ञानाय यतति यतते। यततां ज्ञानार्थं यतमानानामपि मध्ये कश्चिदेव सिद्धिमान्भवतीति योज्यम्। सिद्धानां ज्ञानिनामपि मध्ये कश्चिदेव तत्त्वतो मां वेत्ति यथावज्जानाति।। ३।।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा।। ४।।

एवमुपोद्घातमुक्त्वाऽधुना प्रथमप्रतिज्ञातं ज्ञानपदोक्तं ज्ञातव्यं तावदाह— **भूमिरित्यादिश्लोकचतुष्टयेन**।। भूम्यादिपञ्चमहाभूतानि मनस्तत्त्वबुद्धितत्त्वे च। अहंकारपदेन महत्तत्त्वमुपलक्षणीयम्। अहंकारश्चेति चशब्दान्वयः। इत्येवं मदधीना प्रकृतिरष्टधा भिन्ना। उद्दिष्टापेक्षया अष्टधेत्युक्तिः। उपलक्षितापेक्षया तु नवधेति ज्ञेयम्। मत्प्रेरिता प्रकृतिः पृथिव्यादिकार्यरूपेणैव भिन्नेत्यर्थः।। ४।।

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्।। ५।।

न केवलं जडप्रकृतिरेव स्वकार्येण सह मद्वशा किंतु ब्रह्मादि जगन्माता चित्पकृतिरपीत्याह— **अपरेति**।। यद्वा हरेः परत्वं वक्तुं तदुपयोगितया परावरवस्तुनी आह— **अपरेति**।। इयं प्रागुक्ता जडप्रकृतिः। जीवा अप्युपलक्ष्यन्ते। जडप्रकृतिः जीवाश्चापराः अधमाः। इतस्तु जडप्रकृत्यादितस्तु। अन्यां जीवभूतां सर्वजीवदेहेषु स्थित्वा तदीयान्प्राणान् तद्देहेषु धारयतीति जीवेत्युक्ता। जीव् प्राणधारण इति धातोः। सा च सा भूता च सर्वदा विद्यमाना च जीवभूता ताम्। भू सत्तायामिति धातोः। प्राणधारकत्वेन सर्वदा विद्यमानामित्यर्थः। मे मदधीनां प्रकृतिं चित्प्रकृतिम्। मुक्ता अप्युपलक्ष्यंते। श्रियं मुक्तांश्च परां परानुत्तमान्विद्धि। परत्वे हेतुः। ययेति श्रियेत्यर्थः। मुक्तानां पराभासत्वात् ययेत्येवोक्तम्। इदं ब्रह्मादिजगद्धार्यत इति।। ५।।

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।। ६।।

ननु देहेंद्रियादेरपि सत्वेन प्रकृत्योरेवेशाधीनत्वमहिमोक्तिः कथमित्यतो देहादिसर्वकार्यजातस्य प्रकृत्योरेवांतर्भाव इति दर्शयितुमाह– **एतदिति।।** शरीरेन्द्रियविषयलक्षणकार्यसहितानि जीवजातरूपभूतानि सर्वाण्येतद्योनीनि जडाजडप्रकृतिकारणकानि यथासंभवं तदुत्पन्नानीत्युपधारय जानीहि। पूर्वं प्रकृत्योरवरत्वं परत्वं च वाक्यभेदेनोक्त्वा 'म' इति स्ववशत्वं चोक्त्वा 'ययेदं धार्यते जगत्' इति 'एतद्योनीनि' इति जगद्धारकत्वकारणत्वे कथिते। तत्र प्रकृती एव भगवद्वशे। जगज्जन्मस्थितिलयास्तु प्रकृत्यधीना एव नेशाधीना इति प्रतीतिनिरासार्थमाह– **अहमिति।।** प्रभवप्रलययोः सत्ताप्रतीतिकारणत्वादहं प्रभवः प्रलयश्चेत्युक्तिः। प्रभवप्रलयभोक्तृत्वाच्च तथोक्तिः। जगत्प्रभवादिभोक्तृत्वं च यथा पुत्रादिप्रभवो रिपुप्रलयश्चोपलब्धः सुखहेतुरित्युपलब्धः। पित्रादेस्तद्भोक्तृत्वं तथा हरेरिति ज्ञेयम्। प्रभवाद्युपलब्धेर्भगवत्सुखहेतुत्वं च 'आगमिष्यत्सुखं चापि तच्चास्त्येव सदाऽपि तु। तथाऽप्यचिन्त्यशक्तित्वाज्जातं सुख(मितीर्यते)मतीव च' (नारदीये) इति स्मृत्युक्तदिशा ज्ञेयम्। प्रकृतिद्वारा कृत्स्नजगत्कर्ताऽहमेवेति भावः।। ६।।

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।। ७।।

ननु परावरप्रकृत्योः स्वाधीनत्वोक्त्यैव स्वस्यावरत्वस्य परत्वस्य चायोगात् (अवरत्वस्य बाधादुत्तरवाक्यविरोधायोगात्) परतरत्वशब्दितं सर्वोत्तमत्वं तव प्राप्तमित्यस्तु जगत्पितृत्वम्। तद्वत्सर्वोत्तमान्तरस्यापि जगत्पितृत्वाद्युपपत्तेः कथमहमेव कृत्स्नस्येत्याद्युक्तिरुपद्यत इत्यत आह– **मत्त इति।।** मत्तोऽन्यत्परतरशब्दितं सर्वोत्तमं किंचिन्नास्ति। येनाहमेवेत्युक्तिरयुक्ता स्यात्। यद्वा अन्यत्परतरं नेत्युक्त्या अर्थात् तात्पर्यगत्या लब्धमहमेव परतर इत्यादौ योजयित्वा पश्चान्मत्त इत्यादि योज्यम्। तथा चावतारिकायां उक्तदिशा लब्धस्यापि परतरत्वस्यात्रोक्तिः अपरतत्त्वं यथा भूम्यादिभेदेनानेकविधं यथा चापरतत्त्वं श्रीदेवीमुक्तभेदेनानेकं तथा परतरमप्यनेकविधमुतैकमेवेति जिज्ञासायामहमेक एवेति ज्ञापयितुमिति ध्ये(ज्ञे)यम्। न केवलं जगतः प्रभवप्रलयौ मदधीनौ। किंतु स्थितिरपि मदधीनेत्याह– **मयीति।।** इदं सर्वं प्रकृत्यादिजगत्।। ७।।

रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः।
प्रणवः सर्ववेदेषु शब्दः स्वे पौरुषं नृषु।। ८।।

'ज्ञानं तेऽहं' इति ज्ञानपदेन प्रतिज्ञातं ज्ञातव्यं 'भूमिराप' इत्यादिश्लोकचतुष्टयेनोक्त्वाऽधुना विज्ञानपदेन प्राक् प्रतिज्ञातं विशेषेण ज्ञातव्यं हरेरलौकिकमाहात्म्यमाह— **रस इति।।** अप्सु सारभूतो यो रसः तस्य अपामनागन्तुकधर्मस्वभावत्वे अब्धर्मेषु संख्यादिषु सारत्वे रसत्वे विशेषतो हरेः कारणत्वात्तद्भोक्तृत्वाच्च रसोऽहमित्यभेदोक्तिः। शशिसूर्ययोर्या प्रभा तस्याः शशिसूर्ययोरनागन्तुकधर्मत्वे चन्द्रसूर्यधर्मेषु सारत्वे प्रभात्वे विशेषतः कारणत्वात्प्रभाऽहमस्मीत्यभेदोक्तिः। सर्ववेदेषु सारभूतो यः प्रणवः तस्य वेदसारत्वं प्रणवत्वं चेशाधीनमित्यभेदोक्तिः। खे आकाशे यः शब्दः ध्वन्यात्मकः तस्याकाशानागंतुकधर्मत्वं संख्याद्याकाशधर्मेषु सारत्वं शब्दत्वं चेशायत्तं तद्भोग्यश्च शब्द इति शब्दोऽहमस्मीत्युच्यते। नृषु यत्पौरुषं स्त्रीव्यावृत्तः प्रागल्भ्यविशेषः तस्य सत्ताप्रतीतिकारणत्वात्पौरुषमहमस्मीत्युच्यते।। ८।।

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु।। ९।।

पृथिव्यां यः पुण्यो गन्धः शुभगन्धः तस्य भूम्यनागन्तुकधर्मत्वे स्वभावत्वे पृथिवीधर्मेषु सारत्वे गन्धत्वे हरिः कारणं गन्धभोक्ता चेति गन्धोऽहमस्मीत्युच्यते। अहमस्मीति सर्वत्रानुषङ्गः। विभावसौ यत्तेजोदाहसामर्थ्यं तदुक्तहेतुबलादहमस्मीत्युच्यते। सर्वभूतानां सारभूतं यज्जीवनं तन्नियन्तृत्वात्तदहमस्मीत्युच्यते। तपस्विषु सारभूतं यत्तपः कृच्छ्रादि तदप्यहमस्मि तन्नियामकत्वहेतुनेति भावः।। ९।।

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्।। १०।।

सर्वभूतानां बीजं व्यंजकत्वाद्बीजमिव बीजं मां विद्धि न परिणामिकारणम्। बुद्धिमतां ज्ञानिनां या बुद्धिः साऽप्यहमस्मि। बुद्धिमद्धर्मेषु सारत्वे बुद्धित्वे बुद्धिमद्धर्मत्वे नियामकोऽहमिति बुद्धिरहमस्मीत्युच्यते। एवं तेज इत्यपि ध्येयम्। अप्शशिसूर्यादेरवधितयोक्तस्य सर्वस्योक्तदिशा रसादेरिवेशायत्तत्त्वाविशेषेऽपि रसोऽहमस्मीत्यादिरूपेण निष्कृष्योक्तिः लोके कुविन्दादिः पटादिद्रव्येष्वेव व्यापारवाननुभूयते। न तु तदीयगन्धरसादिगुणेषु तन्निष्ठगन्धत्वादिधर्मेषु च पृथग्व्यापारवान्। किंतु पटादिजन्मानुषङ्गिकजन्मान एव ते न तथा भगवान्। अपि तु अबादिधर्मेषु रसादिषु तद्धर्मेषु रस-

त्वादिषु पृथक् प्रयत्नवान्। न त्वबादिनियमानुषंगिकसत्तादिका इति दर्शयितुं अबादिभोगादप्यतिशयेन रसादिभोगः परमेश्वरस्येति दर्शयितुं च। किंच रसादयो ह्यत्र हरेरुपासने प्रतिमात्वेन विवक्षिताः रसोऽहमस्मीत्युपासीतेत्यादिरूपेण प्रतिमायां चाभेदोक्तिः 'नाम ब्रह्मेत्युपासीत' (छां. ७-१-५) इत्यादौ प्रसिद्धा। तथा चाबादिषु भगवदुपासनापेक्षया रसादिषु तदुपास्तेरतिशयाच्च विशिष्योक्तिः। अपि च ज्ञानार्थिनो हि रसाद्यभिमानिदेहेषु भगवान्सर्वत्र तिष्ठति। अबादिमानिनस्तु तत्पार्षदा इत्युपासते। ततोऽपि विशिष्योक्तिः। यद्वा 'सर्वत्र विष्णोरुत्कर्षज्ञानं ज्ञानमितीर्यते। तद्विशेषपरिज्ञानं विज्ञानमिति गीयते' इति स्मृत्या सर्वत्र सामान्यतो विष्णोरुत्कर्षज्ञानं ज्ञानपदेन विवक्षितम्। 'अपरेयं' इत्यादिनोक्तदिशा जडप्रकृतिब्रह्मादिजीवाश्चावराः आसुरजना अवरतराः श्रीर्मुक्तजनाश्च पराः। तत्रापि श्रीर्मुख्यपरा। कदाऽपि दुःखासंबन्धात्। मुक्तास्तु पराभासाः कदाचिद्दुःखसंबंधात्। ते सर्वे हर्यधीनाः। हरिस्तु परतरः। अत्र तरशब्दस्तमबर्थश्च भवति। हरेरन्यस्य परतमस्याभावादयमेव परतम इति वक्तव्यत्वात् परत्वेनोक्तश्रीमुक्तानां हरेश्च मध्ये कस्यचित्परतरस्याभावेनायमेव परतरश्चेति वाच्यत्वात्। हरिरेव परतरः परतमश्च ततोऽन्यत्परतरं परतमं वा किंचिन्नास्ति। न च मुक्ताः पराः श्रीः परतरेति शंक्यम्। 'मुक्तस्तु स्यात्पराभास' इति तात्पर्योक्त्या तेषां परत्वाभावात्। 'अभ वादंतरान्यस्य त्विहैकार्थौ तरप्तमौ' इति स्मृतेश्चेत्येवं परापरत्वविवेचनपूर्वं हरेः सर्वोत्तमत्वं 'ज्ञानं तेऽहं सविज्ञानं' इति प्रतिज्ञातं ज्ञानं विज्ञानं च द्वयमपि 'भूमिः' इत्यादिश्लोकचतुष्टयेनोक्तम्। तद्विज्ञानमेव सर्वस्य तदधीनत्वप्रदर्शनेनाह– **रस इत्यादिना।।** अत्र रसादिशब्दास्तद्भोक्तृत्वतन्नियंतृत्वहेतुना भगवन्नामानः। तथाहि। अप्स्वित्यादिसप्तम्योऽधिकरणसप्तम्यः। अप्सु स्थित्वा रसमाददामीति तं प्रेरयामि चेति रसनामाऽहमस्मि। शशिसूर्ययोः स्थित्वा स्वयं प्रभासमानत्वात् प्रभाहमस्मि। सर्वदेवेषु स्थित्वा स्वात्मानं प्रणौति स्तावकं प्रेरयति इति प्रणवनामाऽस्मि। खे स्थित्वा शब्दं प्रेरयतीति शब्दनामास्मि। स्वयं पुण्यः पुण्यगन्धः सन्पृथिव्यां स्थित्वा सुरभ्यसुरभितया गन्धं प्रेरयतीति गन्धनामा। विभावसावग्नौ स्थित्वा तेजःप्रेरकत्वात्तेजोनामा। भूतेषु जीवनदत्वाज्जीवननामा। तपस्विषु स्थित्वा तपः कुरुते तपः प्रेरयति चेति तपोनामा। बीजप्रेरकत्वाद्बीजनामा। बुद्धिमताम्। सप्तम्यर्थे षष्ठी। बुद्धिमत्सु स्थित्वा बोद्धृत्वाद्बुद्धिप्रेरकत्वाद्बुद्धिनामा। तेजस्विषु स्थित्वा तेजः प्रेरयतीति तेजोनामा। अबादिसर्ववस्तूनां रसगन्धप्रभादिधर्मान्व्यवस्थया ददातीति रसादिनामा (हं) हरिरित्यर्थः।। १०।।

बलं बलवतां चाहं कामरागविवर्जितम्।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ।। ११।।

बलवतां बलवत्सु स्थित्वा कामरागविवर्जितं बलमस्मि। विषयभोगनिरपेक्षया नित्यपूर्णबलवत्त्वात्कामवर्जितबलात्मास्मि। अस्थाने अप्रयुज्यमानत्वाद्रागविवर्जितबलात्माऽस्मीत्यर्थः। रागिणो ह्यस्थानेऽपि बलं प्रयुञ्जते। भूतेषु धर्माविरुद्धो यः कामः सोऽस्मीत्यर्थः। अत्र पुण्यो गंध इति कामरागविवर्जितमिति गन्धबलादेः पुण्यत्वादिविशेषणोपादानं तु गंधबलकामादिषु विशिष्टेष्वेव भगवानुपास्यः। न त्वशुचिषु धर्मविरुद्धेष्विति ज्ञापनायेति ध्येयम्।। ११।।

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि।। १२।।

न केवलं रसादिधर्मप्रेरकः किन्नामाऽबादिसर्वप्रेरकश्चेत्याह– **ये चेति।** ये च भावाः पदार्थाः सात्त्विकाः सत्त्वगुणविकाराः राजसास्तामसाश्च तान्सर्वान्पदार्थान्मत्त एवोत्पन्नान् विद्धि। तथा ते मयोत्पन्नाः पदार्थाः मयि मदाधारतया मदुपजीवनेनेति यावत्। वर्तन्त इति विद्धि। यथेदं जगत् त्वदधीनं तथा त्वमपि किमेतदधीन इत्यतो नेत्याह– **न त्वहं तेष्विति।।** तदुपजीवनेनाहं नैव तिष्ठामीत्यर्थः। ये च ये चेति पृथगुक्तिः सर्वेषां त्रिगुणविकारत्वेऽपि सत्वादिप्राचुर्याभिप्रायेणेति ज्ञेयम्।। १२।।

त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्।। १३।।

ननु विज्ञानोक्त्युपसंहारपरपूर्वश्लोके सत्त्वादिगुणनिष्पन्नानां सर्वपदार्थानां भगवानेव कारणं तदाश्रयश्चेत्युक्तम्। तेनैव गुणातीत इति चोक्तप्रायम्। तदेतदयुक्तम्। तथात्वेन गुणातीतत्वेन अज्ञायमानत्वस्य सगुणत्वेन ज्ञायमानत्वस्य च तवायोगादित्यत आह– **त्रिभिरिति।।** त्रित्वं योग्यतया गुणविशेषणम्। सत्त्वरजस्तमोरूपत्रिगुणमयैः गुणत्रयात्मकैरित्यर्थः। तादात्म्यार्थोऽयं मयट्। भावैः पदार्थैः। उपादानोपादेययोरभेदात् त्रिगुणतत्कार्यरूपैः एभिर्भावैः पदार्थैरित्यर्थः। यद्वा गुणमयैस्त्रिभिः प्रागुक्तरीत्या सात्त्विकादिभेदभिन्नैरेभिः प्रमितैर्भावैः पदार्थैः मोहितं सत् इदं ज्ञानिभिन्नं जगदेभ्यो गुणतद्विकारेभ्यः परं व्यतिरिक्तं अत एव देहतोऽप्यव्ययं मां नाभिजानाति। विपरीतं च जानातीत्यर्थः। अत एभिरिति सर्वपदार्थानां गुणमयत्वप्रदर्शनाय प्रमितसर्वपरामर्शित्वात्तस्य। न च भगवद्विषय(क) सगुणत्वादिमोहस्य कथं गुणमयात्मकाः पदार्थाः कारणम्। येन गुणमयैर्भावैर्मोहितमित्युक्तिर्युक्ता स्यादिति शंक्यम्। लोके गुणमयदेहादिकं दृष्ट्वा ईश्वरदेहादिरप्येतादृशः देहत्वादिति हेतुना गुणमयमिति मोहितमिति तात्पर्यात्। ज्ञानिनो यथावत्तया जानन्तीति तद्व्यावृत्त्यर्थमिदमिति जगद्विशेषणम्।

उपायाभावादज्ञजनस्य गुणातीतत्वेन भगवतोऽनुपलम्भः। देहादित्वानुमानाभासेन सगुणतया विपरीतोपलम्भश्चेत्युक्तं भवति।। १३।।

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यंते मायामेतां तरंति ते।। १४।।

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः।
माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः।। १५।।

ननु ब्रह्मादिदेहेन्द्रियादिदृष्टान्तेन देहादित्वहेतुना भगवान् गुणमयदेह इति धीः कथं मोहः— **बाधकाभावात्।।** ज्ञानिनां धीर्बाधिकेति चेत्। बहुतरपामरधीविरोधेन तस्या एवाल्पीयस्या अयथार्थत्वोपपत्तेः। न च तेषामेव कालान्तरे बाधधीः सेत्स्यतीति शंक्यम्। अनादिकालेऽप्यजातस्योत्तरत्राप्यसंभवादित्यतो यथावज्ज्ञानाभावविपरीतज्ञानयोर्गुणाभिमानिनी दुर्गैव कारणम्। देहत्वाद्यनुमानं तु निमित्तमात्रमिति भावेनाह— **दैवीति।।** सृष्ट्यादिरूपक्रीडादिगुणविशिष्टस्य देवस्येयं दैवी। देवसम्बन्धिनी। को देव इत्यतो दैवीत्युक्तं विवृणोति— **ममेति।।** मदीया ममातिप्रियेति यावत्। एषा प्रमाणप्रमिता गुणमयी सत्त्वादिगुणात्मिका गुणाभिमानिनीति यावत्। माया दुर्गा मोहिकेति शेषः। कालान्तरे तत्कृतो मोहो निवर्ततामित्यत आह— **दुरत्ययेति।।** अत्येतुमशक्या तत्कृतं मोहं कोऽपि नात्येतुं शक्नोतीत्यर्थः। अतो न कस्यापि बाधकप्रत्ययो भवतीति भावः। मम मायेत्येव पूर्तौ दैवीत्युक्तिः मदीयतामात्रेण कथं दुरत्ययेत्यतः सृष्टिस्थितिलयादिगुणविशिष्टतयातिसमर्थ(स्य मे अति)मदतिप्रियत्वेन तस्या अप्यतिशयशक्तित्वादिति ज्ञापयितुम्। गुणमयीत्युक्तिस्तु गुणाभिमानित्वात्तमोगुणेनैवंविधं मोहं जनयतीति सूचयितुमिति ज्ञेयम्। ननु यदि न केवलमनुमानम्। किंतु भगवतोपोद्वलिता माया मोहहेतुः तर्हि न कथंचिदत्येतुं शक्येति कस्यापि ज्ञानं न स्यादित्यत आह— **मामिति।** एवशब्दोऽत्र भगवत्प्रतिपत्तावित्थंभावसूचकः। अन्यत्परित्यज्य गुर्वादिवन्दनादिकमपि भगवद्भक्तत्वेनैव कुर्वन्तो मां ये प्रपद्यन्ते शरणं प्राप्नुवन्ति ते एतां मायां मायाकृतमोहं तरन्ति। अतिक्रामन्तीत्यर्थः।। १४।।

ननु यदि त्वत्प्रतिपत्तिर्मायातरणोपायस्तर्हि त्वां प्रपद्य सर्वे किमिति मायां नात्यायन्नित्यत आह— **न मामिति।।** दुष्कृतिनः पापशीलाः अत एव मूढाः विवेकहीनाः अत एव नराधमाः मायया (हरीच्छया स्वभावेन च) अभिभूताधिष्ठानयाथा-

त्म्यज्ञानाः अतश्च मूढाः मिथ्याज्ञानिनः अत एवासुरं भावमासुरत्वमाश्रिताः। अतो मां न प्रतिपन्द्यते इति। असुष्विन्द्रियेषु रता असुरास्तदीयं भावमाश्रिता इत्यर्थः।। १५।।

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।। १६।।

सुकृतिनो मां भजन्तः प्रपद्यन्ते तत्राप्यस्ति तारतम्यमित्याह— **चतुर्विधा इति।** ये सुकृतिनः पूर्वजन्मकृतपुण्यवन्तो जनाः मां भजन्ते सेवन्ते च ते चतुर्विधाः। आर्तः— रोगाद्युपद्रुतः। जिज्ञासुः— आत्मज्ञानेच्छुः। अर्थार्थी— धनेच्छावान्। ज्ञानी— चात्मतत्त्वविज्ञेति इतिशब्दोऽत्र ध्येयः। द्विः सम्बोधनमादरार्थम्।। १६।।

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः।। १७।।

नित्ययुक्तः सदा भगवत्समाधिमान्। एकस्मिन् मय्येव प्राधान्येन भक्तिर्यस्यासौ एकभक्तिः विशिष्यते। अतिशयितो भवति। कुत इत्यतो ममातिप्रियत्वादित्याह— प्रियो हीति।। १७।।

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्।। १८।।

एकप्रशंसया प्राप्तेतरनिन्दां निराह— **उदारा इति।।** एते चत्वारो जनाः। ज्ञानी मे आत्मैव स्वरूपमेव, अतिप्रियत्वात् मदधीनसत्तादिरिति ज्ञानवत्त्वाद्वा अभेदोपचारः। यद्वा आप्नोतीत्यात्मा मत्प्राप्तिमानित्यर्थः। इति मे मतं सिद्धान्तः। स हि ज्ञानी। अनुत्तमां गतिमुद्दिश्य युक्तात्मा समाधियुक्तमनाः मामास्थितः प्राप्त इति योजना।।१८।।

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः।। १९।।

एवंविधज्ञानी दुर्लभ इत्याह— **बहूनामिति।।** बहूनां जन्मनामंते। वासुदेवः सर्वं, सर्वं वासुदेवाधीनसत्तादिमदिति ज्ञानवान्। सर्वं संपूर्णं वस्तु वासुदेव एवेति ज्ञानवानिति वाऽर्थः। एतेन भगवज्ज्ञानिनामेव मोक्ष इति कुत इति शंका निरस्ता। भगवत एव पूर्णत्वेन ज्ञानादिदानसमर्थत्वादिति। स मां प्रपद्यते। स महात्मा तादृशज्ञानवान्सुदुर्लभः। एतेन वासुदेवज्ञानेन यदि मोक्षस्तर्हि सर्वेषां स स्यादिति शंका निरस्ता। वासुदेवज्ञानेन मोक्षसत्त्वेऽपि न तज्ज्ञानिनः सर्वे। अतो न सर्वेषां मोक्ष इति तात्पर्यात्।। १९।।

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया।। २०।।

यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्।। २१।।

लोके भगवज्ज्ञानिनां बहूनां दृश्यमानत्वात्कथं दौर्लभ्यमित्यत आह— **कामैरिति।।** तैस्तैः कामैः स्वस्वाभिमतकामैरिच्छाभिरपहृतज्ञानाः तं तं नियमं तत्तदागमोक्तनियममाश्रित्य स्वया प्रकृत्या। प्रकृतिः स्वभावः। स्वकीयस्वभावेन नियताः वशीकृताः सन्तोऽन्यदेवताः ब्रह्मादिदेवताः प्रपद्यंते। ज्ञानितया दृश्यमानाः नानाविधकामापहृतभगवदुत्तमत्वज्ञानाः सन्तोऽन्यदेवतायाजिनो अन्यदेवता एव प्रपद्यन्ते। (ततः) शुद्धो भागवतो दुर्लभ इति भावः।। २०।।

ननु मिश्रयाज्यपि क्रमेण भागवतो भवति किमित्यतः स किं नित्यत्रैविद्यरूपः उत शुद्धभागवतो निर्णायकाभावादिनिमित्तेनान्यदेवतायाजी। आद्ये आह— **यो य इति।।** शुद्धभागवततमोयोग्याभ्यामन्यो विष्णुवत्त्वज्ञानविपरीतज्ञानाभ्यां हीनो यो यः कारणविशेषवशाद्यां यां ब्रह्मरुद्रादितनुं भक्तस्तद्भक्तिमान् श्रद्धया आस्तिक्यबुद्ध्याऽर्चितुमिच्छति। तस्य तस्य तामेव श्रद्धाम् अचलाम् अहं विदधामि।। २१।।

स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान्मयैव विहितान् हि तान्।। २२।।

स च तया श्रद्धया युक्तस्तस्य देवस्याराधनमीहते करोति। ततस्तदाराधनात्तद्देवस्थेन मयैव विहितान् तान्स्वाभिप्रेतान्कामान्लभते च। मदितरस्य फलदाने सामर्थ्याभावात्। द्वितीयेऽप्याह— **यो य इति।।** भक्तः स्वतो विष्णुभक्त एव यो यः ज्ञात्वाऽपि विष्णुं कारणांतरवशादेव यां यां ब्रह्मादितनुम्। प्राग्वदेवेहते इत्थं तस्यार्थः। ततः क्रमेणेशानुग्रहप्राप्तगुरूपदेशद्वारा तस्य विष्णोराराधनमीहते। ततो भगवदाराधनान्मयैव विहितान्मोक्षादिकामान्लभते चेति।। २२।।

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।
देवान् देवयजो यांति मद्भक्ता यांति मामपि।। २३।।

अन्यदेवतायाजिनामपि त्वत्त एव फलं चेत्कुतस्तत्त्यागेन त्वदाराधनमेव कार्यमित्यत आह— **अन्तवत्त्विति।।** विष्णो रमाब्रह्मादिभ्यः परत्वं ज्ञात्वा अन्यदेवताया-

जिनां तेषां फलमन्तवदेव। कुतः, अल्पमेधसां अल्पफल एव बुद्धिमत्त्वमि (त्वादि)त्यर्थः। कथमन्तवत्त्वमित्यत उक्तं— **देवानिति**।। विष्णूत्कर्षं ज्ञात्वा ब्रह्मादिदेव(ता)याजिनो ब्रह्मादिदेवान्यांति न तु माम् अतोऽन्तवत्फलम्। मद्भक्तास्तु मामपि देवान्प्राप्यांते मामपि यान्ति। अतोऽनन्तं तेषां फलम्। तस्मान्मदाराधनं प्राधान्येन अन्यदेवताराधनं च परिवारतया कार्यमिति।। २३।।

अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः।
परं भावमजानंतो ममाव्ययमनुत्तमम्।। २४।।

ननु को विशेषस्तवान्येभ्यो ब्रह्मादिभ्यः येन त्वां प्राप्तानामनन्तफलम्। देवान्प्राप्तानामंतवत्फलमित्यत आह— **अव्यक्तमिति**।। अबुद्धयोऽज्ञानिनः परमितरविलक्षणं अनुत्तमम् उत्तमरहितम् अव्ययं मम भावं प्रमाणाव्यभिचरितत्वरूपं याथार्थ्यमजानंतः। अव्यक्तं कार्यदेहादिहीनं मां व्यक्तिमापन्नं कार्यदेहादियुक्तं मन्यन्ते। कार्यदेहादिराहित्यं तद्युक्तान्यदेवेभ्यो मम विशेष इति भावः। यद्वा यथा देवयाजिनो मद्याजिनश्च त्रैविद्याः भागवताश्च वर्तंत तथा मद्द्वेषिणश्च केचन संतीत्याह— **अव्यक्तमिति**।। सर्वात्मनाऽज्ञेयत्वहेतुना अव्यक्तपदार्थं मामीश्वरं व्यक्तिं सर्वात्मना ज्ञेयत्वमापन्नं प्राप्तं जीवमिति यावत्। मम परं भावमजानंतोऽल्पबुद्धयो मन्यंते। जीवैक्यं मन्यंत इत्यर्थः। यद्वा 'मयि सर्वमिदं प्रोतं' इत्यादावुक्तदिशा प्रेरकत्वादिमहामहिमवांश्चेद्भवान् तत्कथं भवतः केचिज्जीवाभेदं मन्यंत इत्यत आह— **अव्यक्तमिति**।। प्रागुक्तदिशाऽव्यक्तं मामीश्वरं व्यक्तिमापन्नं जीवं जीवाभेदेन मां मन्यंते ये, ते मम परं भावमजानंतो अल्पबुद्धयस्तमोयोग्या इत्यर्थः।। २४।।

नाहं प्रकाशः सर्वस्य योगमायासमावृतः।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम्।। २५।।

ननु तेषां त्वद्विषयविपरीतज्ञानकृतनिंदया तव खेदोऽस्ति किमित्यतः परं भावमजानंतोऽन्यथा मन्यंत इत्युक्तविपरीतज्ञानहेतुभूतमज्ञानं न स्वतंत्रम्। किंतु मदायत्तमेव। अतः कुतो मम खेद इति भावेनास्य स्वाधीनतामाह— **नाहमिति**।। योगेन सामर्थ्यलक्षणोपायेन मायया देव्या च। योगसहिता माया योगमायेति विग्रहः। समावृतोऽहं न सर्वस्य प्रकाशः। कर्मणि घञ्। प्रकाशविषयो न भवामि। अतो मयैव मूढोऽयं लोको मामजमव्ययं जन्मव्ययहीनं नाभिजानातीति।। २५।।

वेदाहं समतीतानि वर्तमानानि चार्जुन।
भविष्याणि च भूतानि मां तु वेद न कश्चन।। २६।।

ननु यवनिकाद्युभयभागवर्तिनोः परस्पराज्ञानवत् तवापि भूतविषयाज्ञानं स्यादित्यतो यवनिकास्थानीयाऽपि माया न मां बध्नातीत्याह— **वेदेति**।। मायाकृतबंधहीनत्वादहं भूतभविष्यद्वर्तमानभूतानि प्राणिनो वेद जानामि। मां तु कश्चन कोऽपि यथावत्त्वेन न वेद। मायाकृतबंधसत्वाल्लोकस्येति। ब्रह्मादिरतिशक्तोऽपि किंचिदेव वेत्ति न सर्वथेति भावः।। २६।।

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत।
सर्वभूतानि संमोहं सर्गे यांति परंतप।। २७।।

पूर्वं "दैवी ह्येषा गुणमयी" इति "नाहं प्रकाश" इति च गुणमयी माया भगवांश्च जीवाभेदादिविषयमोहे मुख्यं कारणमुक्तम्। इदानीमिच्छाद्वेषप्रवृद्धिजनितसुखदुःखादिद्वंद्वविषयमोहोऽप्यवांतरकारणमस्तीत्याह— **इच्छेति**।। इच्छाद्वेषाभिवृद्धि- जातेन द्वंद्वमोहेन। द्वंद्वानि सुखदुःखलाभालाभादीनि। तद्विषयमोहः। दुःखादिर्यथा हेयस्तथा वैषयिकसुखादिरपि हेयः। तथाऽप्युपादेयत्वेन तस्य यज्ज्ञानं तद्रूपमिथ्याज्ञानेनेत्यर्थः। सर्वभूतानि सर्गे सर्गकाले। सर्गकालमारभ्यैवेति यावत्। संमोहं भगवद्विषयजीवाभेदादिमिथ्याज्ञानं यांतीत्यर्थः। यद्वा यत्केषांचिदद्वैतज्ञानं मदिच्छाधीनमिति यदुक्तं भगवता तदयुक्तम्। 'ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः। कामक्रोधाभिभूतत्वादहंकारवशं गताः' इत्यादाविच्छाद्वेषादेरेवाद्वैतज्ञानहेतुत्वोक्तेरित्यतः तदवांतरकारणम्। सर्गात्पूर्वमभावेन सर्गमारभ्यैवोत्पत्तेरिति भावेनाह— **इच्छेति**।। इच्छाद्वेषोत्पन्नद्वंद्वमोहेन जीवेश्वरौ तद्धर्मभूतानि सर्वज्ञत्वाल्पज्ञत्वस्वातंत्र्यपारतंत्र्यसर्वशक्त्यल्पशक्त्यादिरूपाणि च द्वंद्वानि तद्विषयमिथ्याज्ञानेन सर्वभूतानि सर्गकालमारभ्यैव संमोहं उक्तद्वंद्वमोहदार्ढ्यं यांतीति। द्विः संबोधनमादरार्थम्।। २७।।

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।
ते द्वंद्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः।। २८।।

सर्वभूतानि संमोहं यांति चेल्लुप्तो मुक्तिमार्ग इत्यतो द्वंद्वमोहरहिताश्च केचित्संतीत्याह— **येषामिति**।। येषां पुण्यकर्मणां जनानां पापमन्तं गतं नष्टं ते द्वंद्वमोहनिर्मुक्ताः प्रागुक्तद्विविधद्वंद्वविषयमिथ्याज्ञानहीनाः दृढव्रताः संतो मां भजन्ति इत्यर्थः।। २८।।

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्।। २९।।

भगवद्भजने किं फलं भवतीत्यतः प्रागुक्तभजनानुवादेन तस्य ब्रह्मज्ञानरूपं फलमाह– **जरेति**।। ये साधुप्रकृतयः जरामरणमोक्षाय लक्षणया स्वर्गादिकामनिवृत्तये मामाश्रित्य यतन्ति (यतंते) भजन्त इत्यनुवादः। ते तद्ब्रह्म विदुः कृत्स्नमध्यात्मं विदुः जानंति। अखिलं कर्म च विदुः। जरामरणमोक्षायेत्येतत् मोक्षासक्तिरन्यासक्तितः प्रशस्तेति मोक्षासक्तिस्तुत्यर्थं वा प्रागुक्तदिशाऽन्यकामनिवृत्त्यर्थं वा। न सर्वथा तदुद्देशेन भजनविधिः। एकान्तभक्तानां मोक्षापेक्षाऽभावात्। 'मामेव ये प्रपद्यंते मायामेतां तरन्ति त' इति भगवद्भजनफलस्योक्तावपीह तदुक्तिः भगवद्भजनमेव ज्ञानद्वारा मायातरणोपायो नान्य इति ज्ञापनायेति।। २९।।

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः।। ३०।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः।। ७।।

तद्ब्रह्मेत्युक्त्या ब्रह्म भगवतोऽन्यदिति शंकानिरासायाह– **साधिभूतेति**।। अधिभूताधिदैवसहितं साधियज्ञम् अधियज्ञसहितं च मां ये विदुः। अपि च प्रयाणकालेऽपि च मां विदुः ते युक्तचेतसः समाधियुक्तमनस्का इत्यर्थः। यद्वा प्रयाणकालेऽपि च मां विदुः स्मरन्ति युक्तचेतसो मामाश्रयन्ति। ये जनाः ते तत् ब्रह्म विदुरिति।। ३०।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते सप्तमोऽध्यायः।। ७।।

अष्टमोऽध्यायः

अर्जुन उवाच-

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते।। १।।

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः।। २।।

।। ॐ ।। 'ते ब्रह्म तद्विदुरित्युक्तस्य' (७-२९) 'प्रयाणकालेऽपि च मां विदुरित्युक्तस्य' (७-३०) च व्याख्यानमत्र प्राधान्येन क्रियते। तत्प्रसंगादन्तकालस्मरणफलं तदुपायप्रकारो ब्रह्मप्राप्तिमार्गश्चात्रोच्यत इति पूर्वानन्तर्यमध्यायभेदः स्वस्मिन्नेकवाक्यता च। स्मरणविषयत्वप्राप्यत्वरूपो महिमैव वर्ण्यत इति षट्कान्तर्भावश्च ज्ञेयः। पूर्वत्र तद्ब्रह्म विदुरिति परोक्षनिर्देशेन ब्रह्म भगवतः अन्यदिति प्रतीयते। तथा साधिभूतं साधिदैवं साधियज्ञं मां च विदुरिति योजनया भगवज्ज्ञानाद्ब्रह्मज्ञानमन्यदिति प्रतीयते। 'वासुदेवात्मकं ब्रह्म' (व्याससमृ०) इत्यादौ भगवानेव ब्रह्मेति प्रतीयते। अतो विप्रतिपत्त्या जातसंशयात्पृच्छति— **किं तद्ब्रह्मेति**।। अत्राद्यश्लोके किमिति स्वरूपप्रश्नः। द्वितीये कथमिति प्रकारप्रश्नः। अधिगतो यज्ञमधियज्ञ इति प्रादिसमासो नाव्ययीभावः। अत्र देहे अधियज्ञः कथमित्यर्थः। अस्मिन् देहे अधियज्ञः क इति स्वरूपप्रश्नः। अस्मिन्देह इति पदद्वयकृत्यं परिहारवाक्ये वक्ष्यामः। अन्तकाले किमर्थं कथंभूतः केन प्रकारेण स्मर्तव्य इत्यर्थः।। १।। २।।

श्रीभगवानुवाच-

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः।। ३।।

प्रश्नाष्टकस्यापि क्रमेणोत्तरमाह— **अक्षरमित्यादिना**।। 'किं तद्ब्रह्म' इति त्वया

पृष्टं ब्रह्म परममक्षरमुत्तमाक्षरं परमाक्षरशब्दितं वस्तु। अत्र भगवतोऽन्यद्ब्रह्मेति शंकया (शंकायां) किं ब्रह्मेति प्रश्ने अहं ब्रह्मेति परिहारे कार्ये अक्षरं ब्रह्मेत्युक्तिः 'तस्मादक्षरं तस्मादक्षरमित्याचक्षत एतमेव संतं' इत्यादौ विष्णावेवाक्षरत्वप्रसिद्धेरक्षरमित्युक्त्यैव विष्णुर्ब्रह्मेति वा अहमेव ब्रह्मेति वा फलितत्वादज्ञानामक्षरत्वमपि स्वस्य ज्ञापनाय। तथैव वाच्येऽपि परममित्यक्षरविशेषणं तु 'अधमं त्वक्षरं या सा प्रकृतिर्जडरूपिका' (स्कांदे) इत्यादेः प्रकृत्यादेरप्यक्षरशब्दार्थत्वात् तद्व्यावृत्त्यर्थमिति ज्ञेयम्। आत्मानं जीवमधिकृत्य यदस्ति जीवोपकारित्वेन वर्तमानदेहेन्द्रियान्तःकरणरूपं तदध्यात्मम्। स्वभावशब्दः स्वस्य 'ते विदुः' इति प्रकृतजीवस्य भवति उपकारित्वेन वर्तते इति व्युत्पत्त्या देहादिपदार्थवाची। देहेन्द्रियान्तःकरणलक्षणः पदार्थः अध्यात्ममिति प्रथमांताव्ययपदेनोक्तव्युत्पत्त्योच्यते। यद्वा अध्यात्मपदं सप्तम्यन्तमुपेत्य अध्यात्ममात्माधिकाराख्यग्रंथे प्रतिपाद्यं किमिति चेत्तव प्रतिप्रश्नः तदाध्यात्ममात्माधिकारग्रंथप्रतिपाद्यं स्वभावः स्वशब्दः 'ते विदुः' इति प्रकृतजीववाची, भवति सदैकप्रकारेणास्तीति भावः। स्वश्चासौ भावश्च सदैकरूपेण वर्तमानश्चेति स्वभावः। अध्यात्मशब्दितात्माधिकारग्रंथोक्तस्तु सदैकप्रकारो जीव इत्यर्थः। स्व इत्येवोक्तौ स्वशब्दस्यात्मीयेऽपि प्रयोगादन्तःकरणादिरपि प्रती(येत)यते। अतो भाव इत्युक्तिः। 'अन्नमयं सोम्य मन' इत्यादेर्मनःप्रभृतेरन्नविकारत्वेनैकप्रकारत्वाभावात्। भाव इत्येवोक्तौ ईश्वरस्यापि सदैकरूपत्वात्तेन तस्य प्रतीतौ द्वितीयप्रश्नो नोत्तरितः स्यादतः स्व इत्युक्तिः। तेन च प्रकृतत्वाज्जीव एव परामृश्यत इति पदद्वयमप्यर्थवदेवेति भावः। किं कर्मेत्यस्योत्तरं भूतेत्यादि। भूतानां जीवानां भावानां जडपदार्थानां चोद्भवकरः उत्पत्तिकरो विसर्गो विशेषेण सर्जनम् ईश्वरकर्तृको व्यापारः कर्मेति शब्दित इत्यर्थः।। ३।।

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर।। ४।।

अधिभूतं च किमित्यस्योत्तरम्— **अधिभूतमिति**।। भूतानि सदेहान् जीवानधिकृत्य तदुपकारित्वेन वर्तमानं वस्तु। क्षरो भावः विनाशी भावः कार्यभूतः पदार्थः। भवत्युत्पद्यत इति व्युत्पत्तेः। अधिदैवं किमित्यस्योत्तरं पुरुषश्चेत्यादि। अधिदैवतं दैवतानि सर्वदेवानधिकृत्य तत्स्वामित्वेन वा देवताप्रकरणे मुख्यतया प्रतिपाद्यत्वेन वा वर्तमानं च किमिति पृष्टं वस्तु पुरुषः पुरि देहे शेते, तिष्ठतीति पुरुषो जीवः। स च सर्वजीवाभिमानी संकर्षणो ब्रह्मा वा ज्ञेयः। अस्मिन्देहेऽधियज्ञः क इत्यस्योत्तरम्— **अधियज्ञोऽहमेवेति**।। प्रागुक्तदिशाऽधियज्ञ इति प्रादिसमासः। अधिष्ठितो यज्ञोऽनेनेति

बहुव्रीहिर्वा। अत्र लौकिकदेहे यज्ञाधिष्ठाताऽहमेवेत्यर्थः। अत्रेति देहविशेषणम् ईश्वरदेहव्यावृत्त्यर्थम् भगवतः प्राणिदेह इव स्वदेहे पृथगभावेन नियंतृत्वाभावात्। कर्तृभोक्तृफलदातॄणां देहे प्रेरकत्वेन वर्तमानस्यात्र विवक्षिततत्वात्। देह इत्युक्तिरप्यस्मिन्देहेऽधियज्ञः क इति कृतप्रश्नानुरोधात् प्रश्ने वा अधियज्ञः क इत्येवोक्तावग्न्यादेरप्यधियज्ञस्य हरेरन्यस्य सत्त्वात्। प्रश्नस्य तद्विषयत्वे सिद्धार्थतादोषप्रसक्तेस्तद्व्यावृत्त्यर्थं कर्तृभोक्तृफलदातॄणां देहे प्रेरकतया वर्तमानोऽधियज्ञः क इत्यर्थलाभाय देह इत्यवश्यं वाच्यत्वात्। किंच पूर्वाध्यायान्ते 'साधियज्ञं मां विदुरिति' (७-३०) भगवतोऽधियज्ञसाहित्योक्त्याऽधियज्ञो भगवतोऽन्योऽग्न्यादिरिति प्राप्तशंकाव्युदासाय च देह इत्युक्तिः। सर्वप्राणिदेहगताधियज्ञाख्यरूपविशेषापेक्षया साहित्याभिप्रायेण साधियज्ञं मामित्युक्तिरिति। देह इत्युक्त्या साहित्योक्तेर्गतिसूचनेन भगवदन्यत्वशंकानिरासात्साहित्योक्त्या प्राप्तभेदशंकाया अवश्यं परिहार्यत्वादेव प्रथमप्राप्तस्यात्र देहेऽधियज्ञः कथं केन प्रकारेणेति प्रश्नस्य परिहारमनुक्त्वा क इति प्रश्न एव परिहृतः। किंच सर्वयज्ञभोक्तृत्वसर्वयज्ञप्रवर्तकत्वप्रकारेण हि भगवतोऽधियज्ञत्वं तच्च सर्वयज्ञभोक्तृत्वादिकं 'भोक्तारं यज्ञतपसामित्यादि' (५-२९) पंचमांतोक्तं श्रुतवतोऽर्जुनस्य सिद्धमित्यधियज्ञोऽहमिति भगवतो यज्ञाधिष्ठातृत्वरूपाधियज्ञत्वोक्त्या कथमधियज्ञ इत्यस्य भोक्तृत्वादिना प्रकारेणाधियज्ञत्वमिति परिहारस्य प्राप्तत्वाच्च तत्परिहारो नोक्त इति। यद्वा कथमित्यस्य किंलक्षणक इत्यर्थः। अधियज्ञोऽहमेवेत्यधियज्ञाभिन्नत्वेनोक्तस्य हरेः 'कविं पुराणं' इति कवित्वादिलक्षणोक्त्या एवंलक्षणकोऽधियज्ञ इति प्राप्तेर्नोक्तमुत्तरम्। देहभृतां वरेति संबुद्धिः। देहभृतां देह इति चोभयत्रान्वयो ज्ञेयः। श्लोकद्वयस्यायमर्थसंग्रहः। ब्रह्म मम व्याप्तरूपं परममक्षरमुच्यते।अध्यात्मं स्वभावः। जीवचिदुपकारिदेहेंद्रियांतःकरणलक्षणः पदार्थः। जीवराशिर्वा। कर्म तु चराचरविषयकेश्वरकर्तृकसर्जनम्। अधिभूतं तु क्षरो भावः सदेहजीवोपकार्युत्पत्तिविनाशवान् देहेंद्रियाद्यन्यपदार्थ उच्यते। अधिदैवतं च पुरुषः ब्रह्मा संकर्षणो वा। अत्र देहस्थितोऽधिकयाज्यत्वहेतुनाऽधियज्ञाख्यो रूपविशेषोऽहमेवेति साहित्योक्त्या प्राप्तभेदशंकानिरासायैवकारप्रयोगः। यद्वा स्वभावो भगवत्स्वभावोऽध्यात्ममुच्यते अधिकत्वात्। क्षरो भावः सर्वजीवराशिरधिभूतम्। भूतशब्दितपृथिव्यादिजडाधिकत्वात्। "षकारः प्राण आत्मा" इति श्रुत्या षकारस्य चेष्टापर्यायप्राणवाचित्वात्। पुरुप्राणत्वहेतुना पुरुषशब्दिता रमा अधिदैवतम्। दैवतशब्दितो विष्णुरधिको यस्या इति व्युत्पत्तेरिति। एतेन ते तद्ब्रह्मेत्यर्धद्वयस्यायमर्थः। ब्रह्म व्याप्तं तत् मे रूपं ते विदुः कृत्स्नमध्यात्मं जीवोपकारिदेहेंद्रियांतःकरणलक्षणं वस्तु जीवराशिं वा सृष्टिलक्षणं भगवत्कर्म चाखिलं विदुः साधिभूताधिदैवमधिभूतशब्दितसदेहजीवोपका-

रित्वेन स्थितोत्पत्तिविनाशिपृथिव्यादिपदार्थस्थत्वेन तन्नियंतृतया तत्सहितं तद्गतरूपविशेषसहितमित्येके। पृथिव्यादिभूताधिकतयाऽधिभूतशब्दितसर्वजीवराशौ स्थिततया तत्सहितमिति वा। अधिदैवशब्दितसर्वजीवाधिपतौ ब्रह्मणि संकर्षणे वा स्थितत्वेन तत्सहितं तद्गतरूपविशेषसहितमित्येके। अधिदैवशब्दितरमासहितमिति वा। साधियज्ञं च अधियज्ञशब्दितसर्वप्राणिगतरूपविशेषसहितं च मां ये विदुरिति।। ४।।

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः।। ५।।

अन्तकाले च किमर्थं स्मर्तव्योऽसीति प्रश्नस्योत्तरमाह— **अन्तकाले चेति।।** अन्तकाले मृतिकाले मामेव स्मरन्कलेवरं देहं त्यक्त्वा यः प्रयाति स मद्भावं मयि निर्दुःखनिरतिशयानंदानुभवात्मिकां सत्तां याति। संदेहोऽत्रार्थे नास्तीत्यर्थः। निर्दुःखनिरतिशयानंदाभिव्यक्तिरूपमद्भावप्राप्त्यर्थं मत्स्मरणमंतकाले कार्यमित्युक्तं भवति।। ५।।

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौंतेय सदा तद्भावभावितः।। ६।।

तत्कथमित्यतः सामान्यव्याप्तिमाह— **यं यमिति।।** वा अथवा यं यमपि भावं पदार्थम् अन्ते स्मरन् कलेवरं त्यजति तं तमेव भावं याति। अन्तकाले स्मरणोपायमाह— **सदेति।।** सदा निरंतरं तद्भावेन तस्मिन्नंतर्गतेन मनसा। "तद्भावोऽन्तर्गतं मन" इत्यभिधानात्। भावितो वासितः नित्यं तच्चिंतया जाततद्गोचरस्मृतिजनक- संस्कारवानित्यर्थः। एवंरूपः पुमान् भावमंते स्मरंस्त्यजतीत्यन्वयः। एतच्च नित्यस्मृतिरूपं सदा तद्भावभावितत्वमपरोक्षज्ञानं जनयित्वा भोगेन प्रारब्धावसानानन्तरं अन्तकाले स्मृतिहेतुः न साक्षादिति ज्ञेयम्। स्मरंस्त्यजतीति त्यागस्मरणयोरेककालत्वप्रतीतावप्यंत इत्युक्तिस्त्यागकाले महादुःखात्स्मरणमसंभावितमिति मंदाशंकाव्युदासाय सर्वदा शरीरं हेयमिति मन्यमानानां ज्ञानिनां न देहत्यागो दुःखहेतुरतस्तदा स्मरणं नासंभावितमिति प्रदर्शनार्था। अज्ञस्यापि त्यागक्षणात्पूर्वमेव दुःखं न तु त्यागक्षण इति।। ६।।

तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः।। ७।।

अंतकालस्मरणस्य फलोक्तेरुपयोगमाह— **तस्मादिति।।** नित्यं मत्स्मृतेः मत्प्राप्तिहेतुचरमकालीनमत्स्मरणकारणत्वादित्यर्थः। मय्यर्पितमनोबुद्धिः सन्युध्यस्व।। ७।।

अभ्यासयोगयुक्तेन चेतसाऽनन्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिंतयन्।। ८।।

सदा तद्भावभावितत्वं स्पष्टयति— **अभ्यासेति**।। अभ्यासः पुनः पुनरावर्तनं तद्रूपयोगेनोपायेन युक्तेन सहितेनानन्यगामिनाऽनन्यविषयेण चेतसा परममुत्तमं दिव्यं सृष्ट्यादिक्रीडादिगुणयुक्तम्। दीव्यतेरौणादिको यक्। परममुत्तमं पुरि सर्वप्राणिदेहे शेते नियंतृतया वर्तत इति वा पूर्णत्वाद्वा पुरुषाख्यं पृ पालनपूरणयोरित्यतः कुषन्, धातोरुकारः। अनुचिंतयन् याति परमं पुरुषमित्यनुषंगः।। ८।।

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात्।। ९।।

कथंभूतः स्मर्तव्योऽसीति प्राकृतप्रश्नस्योत्तरमाह— **कविमिति**।। कविं सर्वज्ञं पुराणमनादिम् अनुशासितारं शिक्षकम् अणोरणीयांसमत्यंताणुप्रमाणं सर्वस्य चराचराख्यविश्वस्य धातारं धारणपोषणकर्तारम् अचिंत्यरूपं साकल्येन मनसोऽविषयम् आदित्यवर्णं रविप्रभं तमसः प्रकृतेर्मृत्योर्वा। 'मृत्युर्वाव तम' इति श्रुतेः ताभ्यां परस्तात् तदुभयास्पष्टत्वेन स्थितमिति शेषः।। ९।।

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्।।१०।।

भक्त्या युक्तः सन् प्रयाणकाले योगबलेन भ्रुवोर्मध्ये प्राणमावेश्याचलेन मनसा यः स्मरेत् स दिव्यं परम् उत्तमं पुरुषमुपैतीति योजना। अत्रादित्यवर्णमिति सशरीरत्वप्राप्तेर्जन्मादिप्रसंगः इति शंकाव्युदासाय तमसः परस्तादित्युक्तम्। तद्देहस्याप्राकृतत्वान्न जन्मादिदोष इति भावः। योगबलेनैव भ्रुवोर्मध्ये प्राणमावेश्येत्येतद्वायुजयादि ममात्रासाधारणम्। न तु उच्चिक्रमिषो सर्वस्य साधारणम्। वायुजयहीनानां ज्ञानभक्तिवैराग्यपूर्त्यैव मुक्तिसिद्धेः। वायुजयादिमतां तु ईषज्ज्ञानाद्यसंपूर्तावपि वायुजयादौ निपुणानां तद्बलादेवाल्पमुक्तिः किंचिच्छीघ्रं च भवतीति विशेष इति।। १०।।

यदक्षरं वेदविदो वन्दति विशन्ति यद्यतयो वीतरागाः।
यदिच्छंतो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये।। ११।।

वायुजयादिमतां मरणकाले कर्तव्यमेव सध्येयं स्पष्टयति— **यदक्षरमिति**। यद्वा केन प्रकारेण स्मर्तव्योऽसीति प्रश्नस्योत्तरं सध्येयमुच्यते— **यदक्षरमित्यादित्रिभिः**।। यत्पदम् अक्षरं सर्वथा नाशरहितं वेदविदो वदन्ति। यच्च पदं वीतरागाः अपगतकामादिदोषाः यतयः यत्नशीलाः विशन्ति प्रविशन्ति। यच्च पदमिच्छंतः (ति) ब्रह्मचर्यं,

मन आदीनां ब्रह्मणि चरणं ब्रह्मचर्यं, चरंति अनुतिष्ठंति तत्पदं पद्यते मुमुक्षुभिः प्राप्यत इति पदम्। पद्लृ गतावित्यतः कर्मण्यकारप्रत्ययः। स्वरूपं संग्रहेण संक्षेपेण प्रवक्ष्ये। तत्पदस्मरणप्रकारं प्रवक्ष्यामीत्यर्थः।। ११।।

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्।। १२।।

एवं ध्येयस्वरूपं तत्स्मरणप्रकारोक्तिं च प्रतिज्ञायेदानीं तत्प्रकारमाह— **सर्वेति।।** सर्वद्वाराणि वायुसंचारस्थानसर्वसुषु(म्नेतर)म्नोत्तरनाडीर्नियम्य। हृदि हरति जगदिति हृन्नामके नारायणे। हरतेः क्विप्। ह्रस्वस्य पिति कृति तुक्। मनो निरुध्य चात्मनः प्राणं प्राणवायुं मूर्ध्नि सुषुम्नामार्गेण ब्रह्मरंध्रे आधाय योगधारणाम् आस्थितः अखंडस्मृतिरूपयोगधारण एवाभियुक्त इत्यर्थः।। १२।।

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन्देहं स याति परमां गतिम्।। १३।।

ओमित्येकमक्षरं वाचकं यस्य तदोमित्येकाक्षरं ब्रह्म परं ब्रह्म मां व्याहरन्ननुस्मरन्। ॐ इत्युच्चार्य तद्वाच्यं ब्रह्मरूपं मामनुस्मरन्यः देहं त्यजन्प्रयाति प्रैति स याति परमां गतिम्।। १३।।

अनन्यचेताः सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः।। १४।।

अन्तकाले मत्स्मरणं नित्याभ्यासवत एव भवति नान्यथेति स्पष्टमाह— **अनन्यचेता इति।।** सततमन्यविषयकचेतोहीनः सन् यो मां नित्यशः स्मरति। तस्य नित्ययुक्तस्य नित्योपायवतः योगिनः संपूर्णोपायवतः अहं सुलभः अंतकाले स्मृतिविषयो भवानीत्यर्थः। यद्वा सुलभः सुखेन लभ्यः प्राप्य इत्यर्थः।। १४।।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवंति महात्मानः संसिद्धिं परमां गताः।। १५।।

प्रागुक्तपरमगतिः केत्यतो मत्प्राप्तिरूपेति तदुपायोक्तिपूर्वं परमगतिविवरणार्थोऽयं श्लोकः। अत एव परमगतिः सुलभ इत्युक्तभगवल्लाभश्च तत्प्राप्तिरूपमेव फलमिति भावेन तत्प्राप्तिं स्तौति— **मामिति।।** महात्मानो ज्ञानिनः मामुपेत्य प्राप्य दुःखालयं दुःखाश्रयं अशाश्वतं अनित्यं नाशशिरस्कं जन्म देहयोगं पुनर्नाप्नुवंति। कुतः यतः परमां संसिद्धिं मोक्षलक्षणां गताः प्राप्ताः। तत इति योजना।। १५।।

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते।। १६।।

ब्रह्मादीन्प्राप्तानामपि पुनर्जन्माभावात् किं विशिष्योच्यते मामुपेत्येत्यादि तत्राह— **आब्रह्मेति।।** आङ् अत्राभिविधौ। मेरुस्थब्रह्मसदनादारभ्यार्वाक्तनाः लोकाः तत्र गताः जना इति यावत्। पुनरावर्तिनः पुनर्भूमावागत्य जन्मादिमंतो भवंतीत्यर्थः। ननु मेरुस्थब्रह्मसदनादर्वाक्तनलोकस्थाः पुनरावर्तिन इत्युक्त्या अर्थात् 'आमेरुब्रह्मसदना- दाजनान्न जनिर्भुवि' (नारा. गो. कल्पे) इति स्मृत्या च तत उपरितनलोकस्थाः न पुनरावर्तिन इति प्राप्तत्वात्, मामुपेत्य पुनर्जन्म नाप्नुवंतीति कथमुच्यत इत्यतः तदेव पुनराह— **मामिति।।** सत्यं। मेरुस्थब्रह्मसदनाज्जनोलोकाच्चोपरिस्थितानां जनिर्नेति। तथाऽपि तल्लोकस्थत्वमात्रं न जन्माभावे प्रयोजकं किंतु तत्र स्थितं मामुपेत्य स्थितानामेव जन्म पुनर्न विद्यते। अतः प्रागुक्तं नायुक्तमिति भावः। तदुक्तम्। 'तथाप्यभावः सर्वत्र प्राप्यैव वसुदेवजं' (नारा० गो० कल्पे) इति। अभावः जननाभाव इत्यर्थः। यत्तु 'आजनान्न जनिर्भुवीति' जनोलोकादुपरिस्थितानामप्यपुनरावृत्त्युक्तेः ब्रह्मसदनादर्वाक् स्थिताः पुनरावर्तिनः तदुपरिस्थाः अपुनरावर्तिन इत्युक्तिरयुक्तेति चोद्यम्, तद्ब्रह्मभवनपदेन मेरुस्थब्रह्मसदनग्रहणात्परिहृतम्। सत्यलोकस्थब्रह्मसदनग्रहणेऽपि आब्रह्मभुवनात्सत्यलोकस्थब्रह्मसदनादर्वाक्तनतपोलोकस्थजना अंशेन पुनरावर्तिन इत्यर्थः। न च 'आजनात्' इति वचनविरोधः। तत्र स्मृतौ जनिर्नेत्यस्य कात्स्न्येन जनिर्नेत्यर्थकत्वात्। जनादिलोकस्थानामप्यंशेनापि भूमौ लयांते लयादौ च कात्स्न्येन जनिमृत्योर्भावात्। 'आब्रह्मभवनात्' इत्यत्र तत उपर्यार्थिकजन्माभावोक्तिस्तु मुख्यजन्माद्यभावोपेतमुक्तजनविषया। तेषामंशेनापि भूमौ जननाद्यभावादिति। एतेन 'आमेरुब्रह्मसदनादाजनात्' इति स्मृत्या मेरुजनांतरालिकानां जन्माजन्मनोर्थात्प्राप्तेर्विरोध इति प्रत्युक्तम्। अजनेर्मुक्तविषयत्वात् जनेरुक्तदिशा मुक्तेतरविषयत्वादिति। तदुक्तं— 'नियमाज्जन्मनोऽभावो मुक्तस्यैव' इत्यादि।। १६।।

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः।
रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः।। १७।।

मत्प्राप्तावेवापुनरावृत्तिरिति प्रतिज्ञामात्रेणोक्तस्य स्थापनायादौ सृष्टिप्रलयादिकर्तृत्वम् आत्मनो वक्तुम् उपोद्धातमाह— **सहस्रेति।।** सहस्रशब्दोऽत्र बहुशब्दपर्यायः। ये जनाः यत्परब्रह्मणोऽहः तद्बहुयुगपर्यंत द्विपरार्धात्मकं विदुर्जानंति। ब्रह्मणः परब्रह्मणो रात्रिं च युगसहस्रांतां बहुयुगांतां द्विपरार्धात्मिकां विदुः। तेऽहोरात्रविद इत्यर्थः। यदि-

त्यस्य य इति वाऽर्थः। य इति शेषो वा। परब्रह्मणः कूटस्थनित्यस्यापि सृष्ट्यादिसव्यापारनिर्व्यापारावस्थयोरुपचारादहोरात्रत्वोक्तिः।। १७।।

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवंत्यहरागमे।
रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके।। १८।।

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे।। १९।।

ततः किमित्यत आह– **अव्यक्तादिति।।** ब्रह्मणोऽहरागमे महाप्रलयांत इति यावत्। अव्यक्ताद्भगवतो व्यज्यंत इति व्यक्तयः गुणवैषम्यादयः कार्यपदार्थाः प्रभवंति उत्पद्यंते। रात्र्यागमेऽव्यक्तसंज्ञके तत्रैव भगवति प्रलीयंते।। १८।।

महामहिम(त्व)ख्यापनाय सृष्टिप्रलययोरविच्छेदमाह– **भूतेति।।** प्राग्जन्मलयवत्त्वेनोक्तो यः स एवायं भूतग्रामश्चराचरसमुदायः ब्रह्मणोऽहरागमे प्रत्यहमिति यावत् प्रभवति। भूत्वा भूत्वा चोत्पद्योत्पद्य रात्र्यागमेऽवशो भगवद्वशः सन्प्रलीयते। भूतग्रामो भूत्वा भूत्वा रात्र्यागमे प्रलीयते पुनरहरागमे प्रभवतीति वा योजना।। १९।।

परस्तस्मात्तु भावोऽन्योऽव्यक्तो व्यक्तात्सनातनः।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति।। २०।।

अव्यक्तोऽक्षर इत्युक्तस्तामाहुः परमां गतिम्।
यं प्राप्य न निवर्तंते तद्धाम परमं मम।। २१।।

भगवतोऽहोरात्रोक्त्या तस्यापि जगत इवान्यस्मादुत्पत्तिलयौ स्त इत्यतो नेत्याह– **पर इत्यादिद्वाभ्याम्।।** अव्यक्तस्तु भगवांस्तु तस्मात् प्रभवप्रलयोपेतात् व्यक्ताद्भूतग्रामादन्यो विलक्षणो भावः स्वतंत्रः परः उत्तमः सनातनोऽनादिश्च यो भगवान्सर्वेषु (भूतेषु) नश्यत्सु न विनश्यति।। २०।।

सर्वात्मना नाशभावादेवाव्यक्तो भगवानक्षर इत्युक्तः "तस्मादक्षरं तस्मादक्षरं" इति श्रुत्यादौ तां परमां गतिमाहुः। तामिति विधेयापेक्षया स्त्रीलिंगता। कुतोऽव्यक्तो भगवान्परमप्राप्य इत्यत आह– **यं प्राप्येति।।** तन्मम॰धाम स्वरूपमित्यर्थः।। २१।।

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यांतःस्थानि भूतानि येन सर्वमिदं ततम्।। २२।।

'भक्त्या युक्तो योगबलेन चैव' (१-१०) इत्यत्र साधनांतरैः सह भगवत्प्राप्तिसाधनत्वं भक्तेरुक्तम्। तत्र साधनांतरसाम्यशंकानिरासाय भक्तेरेव परमसाधनत्वमिति भावेनाह– **पुरुष इति**।। भूतानि यस्यांतःस्थानि। सर्वमिदं जगत् येन ततं व्याप्तं स परमः पुरुषः भगवाननन्ययाऽन्यासाधारणया तु भक्त्या लभ्यः प्राप्य इत्यर्थः। अत्र परमयेत्यनुक्तावपि पुनर्वचनबलादेव परमत्वलाभ इति भावः। उक्तं हि 'ॐ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः ॐ' (३-३-५४) इति सूत्रे भक्तेः प्राधान्यम्।। २२।।

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः।
प्रयाता यांति तं कालं वक्ष्यापि भरतर्षभ।। २३।।

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः।। २४।।

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते।। २५।।

भगवंतं प्राप्तानाम् अन्येषां चापुनरावृत्तिपुनरावृत्ती कथिते। तत्र यद्देवताधिष्ठितमार्गाभ्यां गतानामपुनरावृत्तिपुनरावृत्ती भवतः ता देवता प्रतिज्ञापूर्वकमाह– **यत्रेत्यादित्रयेण**।। काल इति यत्कालाभिमानि देवताधिष्ठितमार्गे कालानभिमानिदेवताधिष्ठितमार्गे च प्रयाता योगिनः अनावृत्तिमावृत्तिं च यांति तं कालं तत्कालाभिमानिदेवता अन्यदेवताश्च वक्ष्यामीत्यर्थः।। २३।।

ता देवता उद्देशेनाह– **अग्निरिति**।। अग्निनामकदेवता। ज्योतिरिति अर्चिर्नामकदेवता। अहरहरभिमानिदेवता। अभिजिद्देवतासहितेत्यपि ध्येयम्। शुक्लः शुक्लपक्षाभिमानिनी पौर्णमास्यभिमानिना सहेति ग्राह्यम्। षण्मासाभिमानिनी उत्तरायणाभिमानिनी विष्वभिमानिना सहेति ज्ञेयम्। तत्र क्रमेण निर्दिष्टाग्न्यादिदेवताऽधिष्ठितमार्गे प्रयाताः ब्रह्मविदो जनाः ब्रह्म गच्छंति।। २४।।

धूम इत्यादिधूमाद्यभिमानिदेवतानिर्देशः। तत्र धूमादिदेवताऽधिष्ठितमार्गे प्रयाता इति योज्यम्। योगी कर्मयोगी। पूर्वत्र ब्रह्मविद इति। अत्र योगीति विशेषणाच्च क्रमान्मार्गद्वयस्य ज्ञानकर्मसाध्यत्वमुक्तं ध्येयम्। एतच्च मार्गद्वयम् अंतकाले तद्विषयस्मृतिमतामेवेति ज्ञेयम्। तदाह सूत्रे 'ॐ योगिनः प्रति स्मर्येते स्मार्ते चैते ॐ' (४-२-२२) इति।। २५।।

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्यया वर्तते पुनः।। २६।।

उक्तौ मार्गौ निरामयति— **शुक्लेति।।** एते प्रागुक्ते शुक्लकृष्णे गती मार्गौ जगतः ज्ञानकर्मयोगिजगत्संबंधिनौ शाश्वते शाश्वत्यौ मते। एकया गत अनावृत्तिं याति। अन्यया गतः पुनरावर्तत इति।। २६।।

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन।। २७।।

मार्गयोरुक्तेः फलमाह— **नैते इति।।** हे पार्थ, एते प्रागुक्ते सृतीमार्गौ जानन्योगी सृत्युपायभूतज्ञानकर्मानुष्ठानवान्। यद्वा योगी ब्रह्मापरोक्षज्ञानवानेते सृती जानन्साक्षात्कुर्वन् कश्चन कोऽपि न मुह्यति। भगवद्विस्मृतिरूपमोहं न प्राप्नोति। तस्माद्योगस्य पुमर्थहेतुत्वात्सर्वदा भगवज्ज्ञानभक्तिपूर्वं स्वोचितनिवृत्तकर्मानुष्ठानरूपोपाययुक्तो भवेति। द्विः संबोधनमादरार्थम्।। २७।।

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम्।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्।। २८।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम अष्टमोऽध्यायः।। ८।।

अध्यायार्थं फलोक्त्योपसंहरति— **वेदेष्विति।।** वेदाध्ययनयज्ञानुष्ठानकृच्छ्रादितपश्चरणेषु यदेव पुण्यफलं प्रदिष्टं निर्दिष्टमस्ति। तत्सर्वमेवेति वा एव शब्दान्वयः। इदंमध्यात्मादिस्वरूपं भगवतोऽशेषस्रष्टृत्वं शुक्लकृष्णमार्गादिकं च प्रागुक्तं विदित्वाऽत्येति अतिक्रामति। ततोऽतिशयितफलंवान् भवति। किं तदित्यत आह— **योगीति।।** ज्ञानोपायवान्। आद्यं परं स्थानं विष्णोः स्थानमुपैति चेति। यद्वा " मार्गौ ब्रह्म च यः पश्येत्साक्षादेवापरोक्षतः। सर्वपुण्यातिगोऽमुह्यन्यात्यसौ ब्रह्म तत्परम्।।" इत्युक्तदिशा मार्गब्रह्ममात्रपरामर्शकोऽत्रेदं शब्दः। विदित्वेत्यस्य साक्षात्कृत्वेत्यर्थः।। २८।।

।। इति श्रीमद्भगवद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते अष्टमोऽध्यायः।। ८।।

नवमोऽध्यायः

श्रीभगवानुवाच-

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।। १।।

।। ॐ।। सप्तमेऽध्याये 'साधिभूताधिदैवं मां साधियज्ञं च ये विदुः' (७-३०) इत्यादिनोक्तं भगवन्माहात्म्यम् अत्राध्याये प्रपंच्यते। न चैवं तदानंतर्यमेवास्य शंक्यम्। अध्यात्मादिपदानां निरूपणेन परिहारोक्त्यनंतरमेवात्र साधिभूतादिवाक्यार्थभूतभगवन्माहात्म्यवर्णनस्यावसरादिति ध्येयम्। अतिचित्रमहिमानं वक्तुं तत्रादरजननाय प्रतिज्ञापूर्वं वक्ष्यमाणं प्रशंसति– **इदं त्विति।।** गुह्यतममतिगोप्यमिदं वक्ष्यमाणं ज्ञानम्। कर्मणि ल्युट्। ज्ञातव्यं विशेषेण ज्ञातव्यसहितम्। अनसूयवे असूयादिदोषहीनाय। एवंरूप एवाधिकारीति ज्ञापनायैतद्विशेषणोक्तिः। ते तुभ्यं प्रवक्ष्यामि यज्ज्ञात्वा अशुभान्मोक्ष्यसे। यच्छब्दस्येदंत्वित्यनेनान्वयः।। १।।

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्।। २।।

पुनः प्रशंसति– **राजेति।।** इदं वक्ष्यमाणं राजविद्या राज्ञी चासौ विद्या च राजविद्या। विद्यानां प्रधानविद्येत्यर्थः। राजगुह्यं गुह्यानां गोप्यानां मध्ये प्रधानगोप्यम्। पवित्रं पावित्र्यहेतुम्। अत एवोत्तमम्। प्रत्यक्षावगमम् अक्षेषु प्रति प्रति स्थितः प्रत्यक्षो भगवान्। कुगतिप्रादय इति प्रादिसमासो नाव्ययीभावः। अवगम्यते साक्षात्क्रियते येन तत् अवगमम्। "ग्रहवृदृनिश्चिगमश्चे"ति करणे गमेरप्प्रत्ययः। प्रत्यक्षस्य हरेरवगमं प्रत्यक्षावगमं सर्वेंद्रियप्रेरकभगवदपरोक्षज्ञानसाधनम्। धर्म्यं सर्व(र्वा)धारकत्वाद्धर्मो भगवान्। धृञ् धारण इत्यतः औणादिको मन्प्रत्ययः। धर्मादनपेतं तद्विषयं धर्म्यम्। सर्वधारकभगवद्विषयपरोक्षज्ञानं भगवदपरोक्षज्ञप्तिसाधनम्, अव्ययम् अक्षयमोक्षफलकं कर्तुं संपादयितुं सुसुखं अत्यंतसुलभमित्यर्थः। प्रवक्ष्यामीति पूर्वेणान्वयः।। २।।

अश्रद्दधानाः पुरुषा धर्म्यस्यास्य परंतप।
अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि।। ३।।

ननु त्वयोच्यमानं भगवदपरोक्षज्ञप्तिसाधनं तद्विषयपरोक्षज्ञानम् उक्तगुणकं सुकरं चेन्न कोऽपि संसारी स्यादित्यतो वा अकुर्वतां किमनिष्टमित्यतो वाऽऽह— **अश्रद्दधाना इति।।** धर्म्यस्य भगवद्विषयस्यास्य ज्ञानस्याश्रद्दधानाः पुमर्थहेतुत्वरूपश्रद्धाविहीनाः पुरुषाः मामप्राप्य मृत्युसंसारवर्त्मनि निवर्तंते नितरां वर्तंते पतंतीत्यर्थः।। ३।।

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः।। ४।।

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः।। ५।।

यस्य धर्म्यपदेन प्रत्यक्षावगमपदोक्तभगवज्ज्ञानसाधनत्वमुक्तं। यच्च प्रवक्ष्यामीति प्रतिज्ञातं। यच्च ज्ञात्वेत्यादिना प्रशंसितम्। यदकरणे च निंदा कृता; तज्ज्ञानविज्ञानयोर्मध्ये ज्ञानशब्दितं ज्ञातव्यं तावदाह— **मयेत्यादिना अहंक्रतुरिति पर्यंतेन** (९-१६)।। इदं सर्वं चराचरात्मकं जगदव्यक्तमूर्तिना। बहुव्रीहिः। मया ततं व्याप्तम्। व्याप्तत्वे सर्वत्र कुतो न दृश्य इत्यतोऽव्यक्तेति विशेषणम्। ततमित्युक्त्या जगत आधारता स्वस्याधेयता घटादेरिव प्राप्ता तां निराह— **मत्स्थानीति।।** मदाधारतयैव सर्वभूतानि सजडजीवजातानि। तेषु चाहं नावस्थितः तदाधारतया तदुपजीवनेन वर्त इत्यर्थः।। ४।।

त्वयि चेद्भूतानि तिष्ठंति भूतले वर्तामहे भूतलशैत्यादिनाऽहं शीतो भवामीति ज्ञानमिव भगवति वयं वर्तामह इति धीः स्यात्। तथा वह्न्याद्यौष्ण्यशैत्याभ्यां भूतलादेरौष्ण्यशैत्यवदन्योन्यधर्मसंक्रांतिश्च स्यादित्यत आह— **न च मत्स्थानीति।।** त्वगिंद्रियेण तं ज्ञात्वाऽन्योन्यधर्मसंक्रांतिं चासाद्य न तिष्ठंति। भगवतः प्राकृतस्पर्शरहितत्वात्। 'अशब्दमस्पर्शमरूपं' (कठ० ३-१५) इत्यादिश्रुतेः। 'न दृश्यश्चक्षुषा चासौ न स्पृश्यः स्पर्शनेन च, (मोक्षधर्मे) इति स्मृतेः। भूताधारोऽपि कथं तदनाधार इत्यत उक्तं— **पश्येत्यादि।।** ऐश्वरम् ईश्वरसंबंधिनं मे योगं सामर्थ्यम्। 'योगोऽसावुपायः शक्तिरेव चेति' वचनात्, पश्य मम तादृशीं शक्तिमित्यर्थः। पूर्वत्राव्यक्तमूर्तिनेति मूर्तावुक्तायां साऽस्मदादीनामिव भिन्नेति भ्रांतिनिरासाय स्वलक्षणं भूताधारत्वादिकं स्वदेहस्याप्याह— **भूतभृदिति।।** भूतभावनः भूतानामुत्पत्तिकर्ता ममात्मा मम देहः

अहमिव भूतभृत् भूतस्थश्च न भवति इत्यर्थः। अत्र मम देह इति वक्तव्ये ममात्मेत्युक्तिः अचेतनस्य देहस्य कथं भगवल्लक्षणं स्यादिति शंका स्यात्तन्निवृत्तये तस्य चेतनत्वं पृथग्वाच्यं स्यादात्मपदप्रयोगे तु देहत्वं चेतनत्वं द्वयमप्युक्तं स्यात्। आत्मपदस्य देहचेतनरूपोभयार्थत्वादिति।। ५।।

यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्र गो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय।। ६।।

भगवतः सर्वाधारत्वेऽप्यन्योन्यधर्मासंक्रांत्यादिरसंभावित इत्यतो दृष्टांतेन तदुपपादयति— **यथेति।।** अवकाशं विनाऽवस्थित्ययोगान्नित्यमाकाशे स्थितो महान्वायुः सर्वत्रगोऽपि तत्तद्धर्मान्नाप्नोति। शैत्यसौरभादिकं तु वायुसंबद्धजलाद्यवयवगतमेव। न वायुगतम्। तथा सर्वाणि भूतानि मत्स्थानि नान्योन्यधर्मसंक्रांतिमंतीत्युपधारयेति।। ६।।

सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्।। ७।।

प्रतिज्ञातज्ञानप्रदर्शनाय मयेत्यादिना हरेर्व्याप्तत्वसर्वाधारत्वाद्युक्त्वा न चेत्यादिश्लोकद्वयेन तदुपपाद्याधुना पुनः प्रतिज्ञातज्ञानप्रदर्शनार्थं प्रलयादिकारणत्वमाह— **सर्वेति।।** कल्पक्षये प्रलयकाले सर्वाणि भूतानि सजडजीवजातानि मामिकां मदधीनां त्रिगुणात्मिकां प्रकृतिं यांति तत्र लीयंते। पुनस्तानि भूतानि कल्पादौ विशेषेण विविधतया चाहं सृजामि।। ७।।

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्।। ८।।

सृष्टौ प्रकृतेरनुक्तेः साधनानि विनैव सृष्टिं करोतीति प्रतीतिनिरासायोक्तं विवृणोति— **प्रकृतिमिति।।** स्वां स्वाधीनां प्रकृतिं त्रिगुणात्मिकामवष्टभ्य उपादानतयाऽऽश्रित्य प्रकृतेर्वशात्तदधीनत्वादवशं स्वानधीनम्। यद्वा मदधीनप्रकृतिवशत्वादेवाकारवाच्यब्रह्मरूपमदधीनमिमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि। प्रकृत्यादिसाधनावष्टंभो न तेन विना स्रष्टुमसामर्थ्यात्। किंतु लीलयैव। प्रकृत्यादेः साधनताशक्तेर्मदायत्तत्वादिति ज्ञापनाय स्वामिति विशेषणोक्तिः। तदुक्तं तदनन्यत्वनये "ॐ युक्तेः शब्दांतराच्च ॐ" (२-१-१९) इति सूत्रे।। ८।।

न च मां तानि कर्माणि निबध्नंति धनञ्जय।
उदासीनवदासीनमसक्तं तेषु कर्मसु।। ९।।

ननु नानाविधां सृष्टिं कुर्वतस्तव जीवस्येव कर्मबंधोऽस्ति किं इत्यतो नेत्याह।। **न चेति।।** तानि सृष्ट्यादीनि कर्माणि मां न निबध्नंति। कुतः उदासीनवदासीनम्। स्वत एव कर्तृत्वं न मायिकं चेत्कथमुदासीनतया वर्तनमित्यत उदासीनतयाऽऽसीनमित्यनुक्त्वा उदासीनवदित्युक्तम्। वस्तुतोऽनुदासीनोऽप्युदासीनसदृशतया वर्तमानमित्यर्थः। किं तत्सादृश्यमित्यत उक्तम् असक्तं तेषु कर्मस्विति। उदासीनस्य तथा सक्तिर्नास्ति तथा ममापि तत्र सृष्ट्यादिकर्मणि सक्तिशब्दितस्यादरस्य आयासस्य वाऽभावान्न निबध्नंतीत्यर्थः।। ९।।

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौंतेय जगद्विपरिवर्तते।। १०।।

ननु पूर्वं प्रकृतिं स्वामवष्टभ्य विसृजामीत्युक्त्या उदासीनवदासीनमित्युक्त्या च निष्क्रियत्वं प्रतीयते। एवं तर्हि प्रकृतिरेव स्वातंत्र्येण जगत्प्रसूयते त्वयि तु प्रकृतिसन्निधानात्कर्तृत्वोपचारमात्रमित्यापन्नमित्यत आह— **मयेति।।** यद्यप्येषा शंका 'मामिकामिति', 'स्वामिति', 'असक्तं तेषु कर्मस्वि'त्युक्त्या निरस्ता। तथाऽपि स्वस्वातंत्र्यं स्पष्टं वक्तुं प्रागुक्तपरिहाराच्छादनेनोक्तां शंकां हृदि कृत्वा मयेति श्लोकेन पर्यहार्षीदिति ज्ञेयम्। अध्यक्षेणेति प्रातिपदिकेन साक्षात्कारः तृतीयया च कर्तृत्वमुच्यते। प्रकृतिहेतुकप्रसवं साक्षात्कुर्वता तत्प्रयोजककर्त्रा च मयेति दर्शनपूर्वकत्वात्प्रयोजकत्वस्यैवमुक्तिः। यद्वा अध्यक्षेणाधिपतिना मया प्रकृतिः सचराचरं जगत्प्रसूयते जनयति। अनेन मत्प्रयोजितप्रकृतिरूपहेतुना दर्शनपूर्वकं मद्रूपप्रयोजककर्तृरूपहेतुना च जगद्विशेषेण परिवर्तते पुनः पुनर्जायते।। १०।।

अवजानंति मां मूढा मानुषीं तनुमाश्रितम्।
परं भावमजानंतो मम भूतमहेश्वरम्।। ११।।

यद्येवं भवान् जगतः सृष्टिस्थितिसंहाराणां कर्ता तर्हि कुतः केचित्त्वामवजानंति। अवज्ञानेऽपि तेषामनर्थाभावात्सर्वकर्ता अहमिति प्रागुक्तमयुक्तमत आह— **अवजानंतीत्यादिद्वयेन।।** मानुषीं तनुमाश्रितं मानुषदेहमधिष्ठितोऽयमिति मूढलोकभ्रांतिविषयं मामिति वा। अज्ञानामवज्ञानकारणतया मानुषीं मनुष्यदेहसादृश्येन प्रतीयमानां तनुम् आश्रितमिति वार्थः। एतेनात्र हरेः मानुषदेहोक्तेस्तस्य चाधारेणान्योन्यधर्मसंक्रां-

त्यादेरवश्यंभावात् 'भूतभृन्न च भूतस्थ' इति प्रागुक्तिरयुक्तेति निरस्तम्। तथा तनुतनुमतोरभेदेऽपि आश्रितमित्युक्तिश्चैत्रदेहश्चैत्राधीनो यथा तथा भगवद्देहोऽपि स्वाधीन इति स्वाधीनत्वगुणयोगाद्गौणीति ममात्मेत्यत्रत्याभेदोक्तिर्न विरुद्धेति ज्ञेयम्। एतादृशं मां मूढास्तामसा भूतमहेश्वरं भूतं सदाविद्यमानं महांतमीश्वरं गुणपरिपूर्णं परमुत्तमं मम भावं याथार्थ्यम् अजानंतोऽवजानंति अवमतया जानंति। 'ब्रह्मरुद्ररमादीनां साम्यदृष्टिः' इत्यादितात्पर्योक्तदिशाऽन्यदप्यवज्ञानं ज्ञेयम्।। ११।।

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः।। १२।।

अवजानतामनर्थाभावादिति हेतुरसिद्ध इति भावेन फलमाह– **मोघेति**। मोघाशाः वृथाशाः भगवद्द्वेषिभिराशासितस्य संपदादेः प्राप्तावपि आमुष्मिकस्य न कस्यचिदप्याप्तिरित्यर्थः। मोघकर्माणः यज्ञादिकर्माणि च तेषां वृथैव। तत्त्वविषयकज्ञानं च तेषां वृथैवेति मोघज्ञानाः। ज्ञानस्य मोघत्वं नाम केनापि ब्रह्मरुद्रादिभक्त्याद्युपायेनानुत्पत्तिरेव 'ॐ सर्वथाऽपि तु त एवोभयलिंगात् ॐ' (३-४-३४) इति सूत्रात्। विचेतसो विरुद्धमनस्काः। किं बहुना। कोऽप्यामुष्मिकः पुमर्थो नास्त्यत एवेति ज्ञेयम्। 'द्वेषाच्चैद्यादयो नृपा' (भाग. ७-१-३२) इत्यादिनित्यध्यानस्तुत्याद्यर्थमिति भावः। ननु मौढ्यान्मिथ्याज्ञानमस्तु। प्रज्वलनात्मको द्वेषः कुत इत्यतो वा अन्येषामविद्यमानं मौढ्यमेव तेषां कुत इत्यतो वा तस्य मूलकारणमाह– **राक्षसीमिति**।। मोहिनीं बुद्धिभ्रंशकरीम् आसुरीं असुरसंबंधिनीं प्रकृतिं स्वभावम् आश्रिताः तमोयोग्याः मामवजानन्तीति पूर्वेणान्वयः।। १२।।

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्।। १३।।

ननु भगवतो दोषित्वादेवावजानंतीति किं न स्यात्। तथात्वे दैवप्रकृतयोप्यवज्ञां कुर्युः। न चैवमस्तीत्याह– **महात्मानस्त्विति**।। दैवीं मुक्तियोग्योत्तमजीवसंबंधिनीं प्रकृतिं स्वभावम् आश्रिताः महात्मानो महामनस्कास्तु भूतादिं भूतानां कारणम् मव्ययं चतुर्विधनाशहीनं मां ज्ञात्वाऽनन्यमनसोऽन्यविषयकमनोहीना मदेकमनस्काः संतो मां भजंति सेवंते।। १३।।

सततं कीर्तयन्तो मां यतंतश्च दृढव्रताः।
नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते।। १४।।

भजनप्रकारमाह– **सततमिति।।** मां सततं कृष्ण कृष्णेत्यादिरूपेण कीर्तयंतः, यतंतः मत्पूजादौ यत्नं कुर्वतः। दृढानि उपवासादिनियमव्रतानि येषां ते दृढव्रताः। नित्ययुक्ताः नित्यं मयि मनोयोगवंतः। नित्यं कर्मज्ञानोपायवंत इति वा। भक्त्या नमस्यंतश्च मामुपासते।। १४।।

ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते।
एकत्वेन पृथक्त्वेन बहुधा विश्वतो मुखम्।। १५।।

अन्येऽपि च महात्मानो ज्ञानाख्ययज्ञेन मां यजंतः पूजयंतः मामुपासते। श्रवणमननध्यानादि कुर्वतः परेभ्यः उपदिशंतश्च नित्यं भगवन्माहात्म्यज्ञाने रता इत्यर्थः। विश्वतोमुखं मुखशब्दोऽत्र सर्वावयवोपेतरूपपरः। विश्वस्मिन्सर्वत्र स्थितं मामेकत्वेन पृथक्त्वेन सर्वजगद्वैलक्षण्येन बहुधा च शुक्लनीलपीतादिभेदेन बहुधोपासत इति वा। बहुधा बहव इत्यर्थः। 'दैवमेवापरे यज्ञम्' (४-२४) इत्यादिना चतुर्थोक्तदिशा बहव उपासत इति वाऽर्थः। यद्वा 'एकमूर्तिश्चतुर्मूर्तिरथवा पंचमूर्तिक' इति तात्पर्योक्तदिशा सर्वरूपात्मकनारायणरूपैकमूर्तित्वेन पृथक्त्वेन वासुदेवादिचतुर्मूर्तित्वेन बहुधा नारायणवासुदेवादिपंचमूर्तित्वेन विश्वतोमुखं द्वादशचतुर्विंशत्यादिभेदेन स्थितं मामुपासत इत्यर्थः।। १५।।

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम्।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम्।। १६।।

ज्ञानं विज्ञानसहितं वक्ष्यामीति प्रतिज्ञातज्ञानविषयं निरूप्याधुना विज्ञानप्रदर्शनाय तद्विषयमाह– **अहं क्रतुरित्यादिचतुष्टयेन।।** क्रतवः दीक्षाद्यवभृथांतकर्मकलापाः ज्योतिष्टोमादयः। यज्ञस्तु देवतोद्देशेन द्रव्यत्यागरूपं प्रधानं कर्म। कुरुपांडववत्सामान्यविशेषभावेन भेदो ज्ञेयः। स्वधा पितॄणां तिलोदकादिदानम्। अहं क्रतुरित्याद्यभेदोक्तिः 'रसोऽहमप्सु कौन्तेय' इत्यादाविव क्रत्वादेः क्रतुत्वादिनियंतृत्वेन क्रत्वंगहविरादिभोक्तृत्वादिना ध्येया।

पिताऽहमस्य जगतो माता धाता पितामहः।
वेद्यं पवित्रमोंकार ऋक्सामयजुरेव च।। १७।।

किंचास्य जगतः पिता जनकः अहं, माता धाता पोषकोऽहमिति सर्वत्रानुवृत्तिः। पितामहः पूज्यः। वेद्यं ज्ञेयं वस्तु पवित्रं चाहमेव। यद्वा वेद्यपवित्रवस्तुनोर्वेद्यत्वपवित्रत्वप्रदत्वात्तथोच्यते। ॐकारादावोंकारत्वऋक्त्वादिनियंतृत्वात्तद्वेद्यत्वादिना तद-

भेदो ध्येयः। यद्वा " अर्च्यत्वादृक्समत्वाच्च" इत्यादिस्मृत्युक्तदिशा क्रत्वादिभिन्नस्य हरेर्योगवृत्या क्रत्वादिनामकत्वमिह ध्येयम्। तथा हि कृतिस्वरूपत्वात्क्रतुः। यदस्ति प्रामाणिकतया तज्ज्ञानातीति यज्ञनामा। स्वं स्वात्मानं धत्त इति स्वधा। उषदाहे कर्मणि घञ् उषाः उष्टाः तापत्रयदग्धाः तेषां निधिरित्यौषधनामा। मानाज्ज्ञानात्त्रातीति मंत्रनामा। आ समंताज्ज्यायस्त्वादाज्यनामा। अगस्य स्वतो गतिहीनस्य जगतो नेतेत्यग्निनामा। यज्ञादावाहूतत्वाद्धुतनामा। ओमित्त्याक्रियत इत्योंकारः। अर्च्यत्वात्पूज्यत्वादृङ्नामा। सर्वरूपेषु समत्वात्सामनामा। याज्यत्वाद्यजुर्नामा।। १७।।

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्।। १८।।

मुमुक्षुभिरवगम्यत्वाद्गतिः। भर्ता पोषकः। प्रभुः स्वामी। साक्षात्सर्वमीक्षत इति साक्षी। निवासः आश्रयः। शरणं भीतरक्षकः। मुक्ताश्रय इति यावत्। सुहृदनिमित्तोपकारी। प्रभवः जगदुत्पत्तिकर्ता प्रलयकर्तृत्वात्प्रलयोऽहम्। स्थानं सर्वाधारोऽहम्। नितरां धारकत्वाद्वा प्रलयकाले प्रकृत्यादिजगदत्र निधीयत इति वा निधानम्। प्रकृतिं प्राप्य पश्चात्तयां हरौ निधीयत इत्यर्थः। तेन 'प्रकृतिं यांति भूतानि' इत्युक्त्यविरोधः। जगद्व्यञ्जकत्वाद्बीजम्। तथात्वेऽप्यविकारित्वप्रदर्शनायोक्तमव्ययमिति।। १८।।

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन।। १९।।

किंचाहमादित्यस्थस्तपामि तापं करोमि। मेघचक्रगतः सन्वर्षं वृष्टिम् उत्सृजामि निगृह्णामि उपसंहरामि। अहमिंद्रियेषु स्थित्वा तेषां देहधारणेन मृतिं परिहरतीति हेतोरमृतम् अहम्। प्रलयकालादन्यकाले संहर्तृत्वान्मृत्युरहम्। सत्कार्यजातमहम्। असच्च कारणजातमहमेव। तन्नियंतृत्वादेरभेदोक्तिः। अहमित्यसकृदुक्तिरुपचारनिवृत्त्यर्था। यद्वा साधुगुणपूर्णत्वात्सदित्युक्तोऽहम्। साधुगुणपूर्णपुरुषान्तरराहित्याद् असदित्युक्तोऽहमेवेत्यर्थः।। १९।।

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते।
ते पुण्यमासाद्य सुरेंद्रलोकं अश्नंति दिव्यान् दिवि देवभोगान्।।२०।।

ननु सर्वयज्ञादिभोक्तृत्वादिनाऽहंक्रतुरित्याद्युक्तिरिति प्रथमव्याख्यानं यत्तदयुक्तम्। तथात्वे त्रैविद्यकृतयज्ञभोक्तृत्वस्यापि प्राप्त्या तेषां भागवतानां च फलभेदो न स्यात्। भगवद्भोगनिमित्तकत्त्वात्कर्मफलस्य तस्य च सर्वत्र साम्यात्। अतो भागवतानु-

ष्ठितभगवद्भजनस्य त्रैविद्यकृतयज्ञफलादप्यतिशयफलमाह— **त्रैविद्येत्यादित्रयेण।।** तिस्रो विद्या ऋग्यजुःसामलक्षणा येषां ते त्रिविद्याः। त एव त्रैविद्याः। विष्णुं सर्वोत्तमं ज्ञात्वाऽपि त्रय्यां मुखतः प्रतीयमानस्वर्गाद्युद्देश्यकान्यदेवतायजनं बुध्वा तथैवानुष्ठायान्ते विष्णौ समर्पणं कुर्वन्तः त्रैविद्याः मां यज्ञैरिष्ट्वाऽन्ते मयि समर्प्य सोमपाः हुतशेषसोमरस-पानवन्तोऽत एव पूतपापाः शोधितकल्मषाः सन्तः स्वर्गतिं स्वर्गमार्गम्। स्वराख्यप्राप्यं वा प्रति; मां प्रार्थयन्ते। ते पुण्यं पुण्यलभ्यं सुरेन्द्रलोकं स्वर्गमासाद्य प्राप्य दिवि स्वर्गे दिव्यान् द्युलोकभवान् अलौकिकानिति वा भोगानश्नन्ति भुञ्जते।। २०।।

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभंते।। २१।।

किंच ते स्वर्गकामेनान्यदेवतायाजिनस्तं विशालं विपुलं स्वर्गसुखं भुक्त्वा क्षीणे पुण्ये मर्त्यलोकं भूलोकं भुक्तावशिष्टपुण्ययुक्ताः सन्तः विशन्ति। तदाह सूत्रे 'ॐ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्याम् ॐ' (३-१-८) इति। पुनरप्येवं त्रयीधर्मं वेदोक्तं धर्ममनुप्रपन्ना अनुतिष्ठन्तः कामकामाः भोगेच्छवः। गतागतम्। द्वन्द्वैकवद्भावः। गतेन सहितम् आगतमिति वा। स्वर्गं प्रति गमनं ततो मर्त्यलोकं प्रत्यागमनं च लभन्ते। न कदाऽप्यपुनरावृत्तिं प्राप्नुवन्तीत्यर्थः।। २१।।

अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।। २२।।

त्रैविद्यानां फलमुक्त्वा भागवतानां फलमाह— **अनन्या इति।।** न विद्यतेऽन्य-श्चिंत्यत्वेन येषां तेऽनन्याः अन्यदचिन्तयन्तो मां चिन्तयंतो ये जनाः पर्युपासते भक्त्युद्रेकेणोपासते तेषां नित्याभियुक्तानां नित्यमभि सर्वस्मिन्देशे शरीरेन्द्रियमनोभिर्वा युक्तानां भगवत्सेवोद्युक्तानां नित्यं तत्स्मरणवतामिति वा। योगक्षेमम्। द्वंद्वैकवद्भावः। योगस्य क्षेम इति वा। अप्राप्तप्राप्तिर्योगो मोक्षरूपः। तस्य क्षेमः अनंतत्वं वहामि। अहमपुनरावृत्तिलक्षणं पुरुषार्थं ददामीत्यर्थः। भगवतः सर्वयज्ञभोक्तृत्वाविशेषेऽपि त्रैविद्यभागवतयोः फलभेदो भगवद्भजनरूपोपायभेदकृत इति द्योतनायानन्या इत्यादि-विशेषणोक्तिः। तथाहि— 'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति' (७-२१) इत्यादौ पूर्वं त्रैविद्यानामन्यदेवतायाजित्वमुक्तम्। भागवतानां तद्विरोधितयाऽनन्या इत्युक्तम्। 'न तु मामभिजानंति तत्त्वेने' ति त्रैविद्यानां अतिशयभक्तिज्ञानाभाव उक्तः। तत्त्वज्ञानाभावे भक्त्यभावस्य सिद्धत्वात्। भागवतानां तत्प्रतियोगितया भक्त्युद्रेकसूच-

नाय पर्युपासत इति परिशब्दप्रयोगः। तथोपासनस्यैव पर्युपासनत्वात्। "स्वर्गतिं प्रार्थयन्ते"। "कामकामा" इति त्रैविद्यानां कामनमुक्तम्। तत्प्रतियोगितया भागवतानां चिन्तयन्तो मां मामेव चिन्तयन्ति न काममिति कामनाभाव उक्तः। "मामिष्ट्वे" ति, "मामेव यजन्त" इति त्रैविद्यानाम् अन्ते समर्पणमुक्तम्। तत्प्रतियोगितया नित्याभियुक्तानामिति सदा तत्स्मरणतदुद्देशयुक्तत्वमुक्तम्। अतो द्वयोर्वैष्णवत्वेऽपि भगवद्भोग्यकर्मवत्त्वेऽपि फलहेतूपायभेदात्फलभेद इति।।२२।।

येऽप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः।
तेऽपि मामेव कौंतेय यजंत्यविधिपूर्वकम्।। २३।।

भागवतेभ्योऽन्यदेवतायाजिनां फलभेदं सहेतुकं प्रपञ्चयति– **येऽपीति।।** अन्येदवताभक्ता येऽपि श्रद्धयान्विताः सन्तो अन्यदेवता यजन्ते। तदुद्देशेन हविस्त्यागं कुर्वन्ति। तेऽपि मामेवाविधिपूर्वकं यजन्ति। मदुद्देशेनैव कर्तव्येऽपि अन्योद्देशेन कृत्वा ते तत्कर्म अन्ते मय्यर्पयन्तीत्यविधिपूर्वकमासीन्मद्यजनमिति भावः।। २३।।

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते।। २४।।

तद्यज्ञस्यापि भगवद्भोग्यत्वात्कथमविधिपूर्वकतेत्यतोऽविधिपूर्वकत्वे कारणमाह – **अहं हीति।।** सर्वयज्ञानां भोक्ता प्रभुश्च प्रवर्तक उद्देश्यश्च तादृशं मां तु तत्त्वेन अभि सम्यक् न जानन्ति। अभीत्यस्य सर्वोत्तमत्त्वेन हरिं जानन्तोऽपि यज्ञाद्युद्देश्यत्वादिना सम्यङ् न जानन्तीत्यर्थः। तत्त्वेनेत्यस्य तु ब्रह्माद्यन्यदेवतानां तु तत्परिवारत्वादिकं न सम्यग्जानन्तीत्यर्थः। हि यतोऽतस्ते च्यवन्ति। स्वर्गान्मर्त्यलोकं विशन्तीति।। २४।।

यांति देवव्रता देवान्पितॄन्यांति पितृव्रताः।
भूतानि यांति भूतेज्या यांति मद्याजिनोऽपि माम्।। २५।।

फलभेदं विविच्य प्रपञ्चयति– **यान्तीति।।** इन्द्रादिदेवेषु व्रतं नियमो येषां ते तथा इन्द्रादियाजकाः इन्द्रादीन्यान्ति। पितृव्रताः श्राद्धादिक्रियापराः पितॄन्यान्ति। भूतेज्या भूतेषु सप्तमातृकादिषु इज्या पूजा येषां ते भूतेज्याः। शिष्टं व्यक्तम्।। २५।।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।। २६।।

अन्यदेवताभजनस्याल्पफलत्वेऽपि तदेव कार्यं सुशकत्वात्। त्वद्भजनं तु दुर्बलैरशक्यं कर्तुं, तवातिमहिमत्वादित्यत आह— **पत्रमिति**।। अनिषिद्धपत्रादिकं यो मह्यं भक्त्या ददाति। प्रयतात्मनः। "यम उपरमे" प्रकर्षेणोपरतमनस्कस्य विषयविरक्तस्य, भक्त्या समर्पितमश्नामि। भक्त्यैवाहं तुष्टो भवामि न द्रव्यादिनेति भावः।। २६।।

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्।। २७।।

यतोऽल्पमपि भक्त्याऽर्पितं मम प्रीतिकरम्। अतस्त्वमपि तथा कुर्वित्युपसंहरति— **यदिति**।। हे कौन्तेय, यत्त्वं यद्विहितं करोषि, विहितमिति सर्वत्रान्वेतव्यम्। निषिद्धादिकरणस्य प्रत्यवायहेतुत्वात्। पात्राय च यद्द्रव्यादि ददासि तत्सर्वं मयि समर्पणं कुरुष्व।। २७।।

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि।। २८।।

त्वदर्पणेन किमित्यत आह— **शुभाशुभेति**।। शुभाशुभफलैरिति बहुव्रीहिः। एवं मयि सर्वसमर्पणे सति शुभाशुभफलकैः कर्मबन्धनैः मोक्ष्यसे। तदेव व्यनक्ति— **संन्यासेति**।। फलत्यागकर्मानुष्ठानाभ्यां युक्तात्मा, विमुक्तः सन्मामुपैष्यसि।। २८।।

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहम्।। २९।।

ननु भक्त्युपहृतमश्नामीत्युक्तदिशा यदि त्वं भक्तिप्रियः तर्हि द्वेषिणामप्रियश्चेति स्यात्। तथा च भक्तेषु द्वेषिषु यथाक्रमं स्नेहद्वेषवत्त्वादल्पभक्तस्य कस्यचित्सुखरूपं बहुफलं ददासि अल्पद्वेषिणो बहुदुःखरूपं ददासि इत्यापद्यते। राजादौ तथा दर्शनात्। एवं च वैषम्यनैर्घृण्ये प्राप्नुतस्तवेत्यत आह— **समोऽहमिति**।। अहं सर्वेषु भूतेषु समः न वैषम्यादिमान्। यतो मे तदीयं द्वेषमपेक्ष्याधिकं द्वेष्यो नास्ति। तदीयां भक्तिमपेक्ष्याधिकः प्रियश्च नास्ति। किंतु तत्तदीयद्वेषभक्त्यनुसारेण तत्तत्सदृशफलद एवाहम्। अतः समोऽहम्। न हि तत्तत्कर्मानुसारेणानुशासिता यमो विषमो भवति। तथात्वे 'समवर्ती परेतराट्' इति प्रसिद्धिविरोधात्। तथेति भावेन भक्तिमतां फलमाह— **य इति**।। ये भक्ताः मां भजन्ति सेवन्ते ते मयि मदधीनाः मद्वशाः इति ज्ञानवन्तो भवन्ति। तेषु चाप्यहं तेषां वशोऽहमित्यर्थः। यद्वा सम इति पूर्वार्धे भक्तोऽभक्त इति पदद्वयमध्याहार्यम्। सर्वभूतेषु मे भक्तः द्वेष्यो नास्ति। अभक्तो मे प्रियो नास्ति। अतः समोऽहम्।

यदि भक्तेषु द्वेषमभक्तेषु प्रीतिं कुर्यां तर्ह्येव विषमः स्याम्। न चैवम्। किंतु भक्त्यनुसारेण फलद इति भावेनाह– **य इति**।। ये मयि प्रीत्या वर्तन्ते तेष्वहं प्रीत्या वर्त इत्यर्थः।। २९।।

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः।। ३०।।

भक्तप्रशंसा क्रियते– **अपि चेदित्यादिना**।। सुदुराचारोऽपि भगवद्भक्तो यः कश्चिद्देवांशः ऋष्यादिः स्वयोग्याधिकपुण्यापगमाय दैवादत्यंतदुराचारोऽपि अनन्यभाक् स्वातंत्र्येण अन्य(देवतांतर)भजनहीनः सन्मां भजते चेत्स साधुरेव मंतव्यः। कुतो हि यस्मात्स चन्द्रसूर्याद्यंशः सम्यग्व्यवसितः संजातसमीचीनभगवत्तत्त्वनिश्चयवानत इत्यर्थः।। ३०।।

क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति।
कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति।। ३१।।

सम्यग्व्यवसायवत्त्वेऽपि सुदुराचारः कुतः साधुर्मन्तव्यः इत्यत आह– **क्षिप्रमिति**।। सम्यग्व्यवसायवत्त्वात्क्षिप्रं धर्मचित्तो भवति। शश्वच्छांतिं शाश्वतमोक्षं च सम्यगधिगच्छति। हे कौन्तेय, मे भक्तः दुराचारोऽपि न प्रणश्यति। नरकाद्यनर्थं न प्राप्नोति। एतच्च देवदेवांशऋष्यादिविषयं ज्ञेयम्।। ३१।।

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यांति परां गतिम्।। ३२।।

कैमुत्येन च भक्तेर्महिमानमाह।। **मां हीत्यादिना**।। हे पार्थ, पापयोनयः स्वयमुत्तमवर्णा अपि पापहेतुका योनिर्जन्म येषां ते पापयोनयः। ते क इत्यत उक्तं।। **स्त्रिय इत्यादिना**। स्वतः पुमांसोऽपि पापात्सुद्युम्नस्येलात्वमिव स्त्रीत्वं प्राप्ता ये च स्वतो ब्राह्मणादिरपि पापाद्वैश्यादिहीनवर्णतां प्राप्ताः शूद्रत्वं वा प्राप्ताः मामाश्रित्य स्युः वर्तेरन्। मयि भक्तिमन्तो भवेयुः तेऽपि परां गतिं यान्ति।। ३२।।

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्।। ३३।।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः।। ३४।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजगुह्ययोगो (भगवन्महिमवर्णनरूपभक्तियोगो) नाम नवमोऽध्यायः।। ९।।

पुण्याः पुण्यहेतुकाः ब्राह्मणाः (स्वरूपतः)। शूद्रादिहीनवर्णा अपि स्वयं यदि पुण्यवशेन (देहतः) ब्राह्मणत्वं प्राप्ताः तथा राजत्वं ऋषित्वं वा प्राप्ताः परां गतिं यांति। किं पुनः स्वाभाविकाः एते स्त्रीवैश्यादयः परां गतिं यान्तीति वाच्यमित्यर्थः। अत्र नैमित्तिकस्त्रीवैश्यादिग्रहणमध्ये नैमित्तिकपुंसां स्त्रियः पुमांसो वैश्याः शूद्रा इत्यनुक्तिस्तु स्वभावतः स्त्रीणां केनापि हेतुना पुंस्त्वाभावेन नैमित्तिकपुंसामभावादेव 'याति स्त्रीत्वं पुमांसोऽपि पापतः कामतोऽपि वा। न स्त्रियो यांति पुंस्त्वं तु स्वभावादेव याः स्त्रिय।।' इत्युक्तेरिति। अतो भक्तेः साधनोत्तमत्वादेव अनित्यमसुखं सुखहीनम् इमं भक्त्यादिसाधनभूतं लोकं देहं भूलोकं वा प्राप्य अविलम्बेन मां भजस्व।। ३३।।

भजनप्रकारं दर्शयन् तस्य फलमाह– **मन्मना इति**।। एवं मन्मनस्त्वादिप्रकारेण मत्परायणः सन्नात्मानं मनो मयि युंक्त्वा मामेवैष्यसि प्राप्स्यसीति।। ३४।।

।। इति श्रीमद्भगवद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते नवमोऽध्यायः।। ९।।

दशमोऽध्यायः

श्रीभगवानुवाच-

भूय एव महाबाहो शृणु मे परमं वचः।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया।। १।।

।।ॐ।। षष्ठेऽध्याये ध्यानयोग उक्तः। नवमान्ते च 'मन्मना' (९-३४) इत्यादिना तद्ध्यानं स्मारितम्। तच्च ध्येयसापेक्षम्। अतो ध्यानार्थं भगवद्विभूतिरूपाणि अत्राध्याये अग्रे 'हंत ते कथयिष्यामि' इत्यादिना प्राचुर्येण वक्ष्यन्नादौ बुद्ध्यादीनां महर्ष्यादीनां सामर्थ्यातिशयोपेततया निर्माणरूपं विशेषकारणत्वं च भगवतो वक्ति। यद्यपि 'भोक्तारं यज्ञतपसां' (५-२९) इत्यादिना पंचमान्तादौ ध्येयमुक्तम्। तथाऽपि विशिष्टाधिकारिणां भगवद्विभूतय उपास्या इति तदुक्तिरत्रेति। उक्तरूपविशेषकारणत्वमपि विशिष्टाधिकारिध्येयमिति तस्याप्यत्रोक्तिः। ननु विभूतिरूपाण्यपि 'रसोऽहमप्सु कौन्तेय' (७-८) इत्यादिना " अहं क्रतुः" (९-१६) इत्यादिना चोक्तान्येव। सत्यम्। अत्र विस्तरेणोच्यन्त इत्यदोषः। अत एवास्य विभूत्यध्याय इति व्यपदेशः। तदुक्तेरेव बहुत्वेनैकवाक्यता चाध्यायस्य। विभूतिशब्दार्थमग्रे वक्ष्यामः। तत्र पार्थस्य श्रोतृत्वसंपत्तिप्रतिपादनाय तद्विशेषणोक्तिपूर्वं संबोध्य प्रतिजानीते– **भूय एवेति**।। हे महाबाहो, भूय एव पुनरेव मे परमं वचः माहात्म्यप्रतिपादकं वचनं शृणु श्रुत्वा तत्र निष्ठां कुरु। प्रीयमाणाय मद्वचः श्रुत्वा संतोषं प्राप्नुवते। अनेन श्रोतृत्वसंपत्तिरुक्ता। ते तुभ्यं हितकाम्यया हितेच्छया वक्ष्यामीति।। १।।

न मे विदुः सुरगणाः प्रभवं न महर्षयः।
अहमादिर्हि देवानां महर्षीणां च सर्वशः।। २।।

प्रतिज्ञातमहिमानमाह– **न म इति**।। सुरगणा महर्षयश्च मे प्रभवं प्रभावं महिमानं न विदुः। प्रभवमुत्पत्तिं मदधीनामुत्पत्तिं जगत इति योज्यम्। न विदुः न जान-

न्ति। देवादिजगतो भगवदधीनामुत्पत्तिं सुरगणादयो न जानन्ति। किमुतान्य इत्यर्थः। यद्वा मे प्रभवं ममोत्पत्तिं सुरगणादयो न विदुरित्यर्थः। भगवन्महिमवज्जगदुत्पतिवञ्च भगवदुत्पत्तिं विद्यमानां न जानन्तीति न भ्रमितव्यम्। किंतु महिमजगदुत्पत्त्योः सत्त्वमिव भगवदुत्पत्तेः सत्त्वमेव नास्तीति। तदभावादेव न विदुरिति ज्ञेयम् प्रभावजगत्प्रभवयोरिव मे प्रभवः कुतो नेति चेत्तत्रोच्यते— **अहमादिरिति**।। देवानां मनुष्याणां च उपलक्षणमेतत्। देवादिकृत्स्नजगतोऽहमादिः कारणं हि यतोऽतो मे प्रभवो नेति। सर्वस्य मत्सृष्टत्वेन मज्जनकस्यान्यस्याभावात्। असतश्च पूर्ववृत्तित्वरूपजनकत्वायोगात्। आत्माश्रयापत्त्या मयैव मज्जननायोगादिति भावः। तदाह सूत्रे "ॐ असंभवस्तु सतोऽनुपपत्तेः ॐ" (२-३-९) इति।। २।।

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते।। ३।।

स्वज्ञानान्मोक्षाख्यमहिमानं चाह— **यो मामिति**।। योऽधिकारी अजमुत्पत्तिहीनम्। अनादिम् अनश्चासावादिश्च तम्। सर्वचेष्टकं कारणभूतं च। अनितेरन्तर्णीतण्यर्थात्पचाद्यच्। यद्वा अनस्य मुख्यप्राणस्य कारणं च। लोकानां महास्वामिनं मां वेत्ति जानाति। स मर्त्येषु असंमूढः संमोहहीनः भ्रान्तिहीनः सन् सर्वपापैः प्रमुच्यते मुक्तो भवति।। ३।।

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः।
सुखं दुःखं भवो भावो भयं चाभयमेव च।। ४।।

मुक्तिहेतुज्ञानविषयत्वमहिमानमुक्त्वा बुद्ध्यादिप्रदत्वमहिमानं चाह— **बुद्धिरिति**।। यद्वा 'अहमादिर्हि देवानां' इति देवाद्युपलक्षितसर्वकारणत्वं स्वस्योक्तम्। तत्र केषाञ्चिद्बुद्ध्यादीनां महर्ष्यादीनां च सामर्थ्यातिशयोपेततया निर्माणरूपविशेषकारणत्वोक्त्या प्रागुक्तं प्रपञ्चयति— **बुद्धिरित्यादित्रयेण**।। बुद्धिरन्तःकरणं कार्याकार्यनिश्चयो वा। ज्ञानं तु प्रतीतिसामान्यम्। असंमोहः अकार्येच्छाऽभावः मिथ्याज्ञानाभावो वा। क्षमा क्रोधाभावेन सहापकर्तुरनपकरणम्। सत्यं यथार्थज्ञानपूर्वकमनुष्ठानं वचनं वा। दम इन्द्रियनिग्रहः। शमो भगवन्निष्ठता। सुखमनुकूलवेदनीयम्। दुःखं प्रतिकूलवेदनीयम्। भव उत्पत्तिः। भावः सत्ता। भयं त्रासः। अभयं त्रासविरोधिमनोव्यापारः।। ४।।

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः।। ५।।

अहिंसा परप्राणिपीडाऽभावः। समता द्वंद्वेषु निर्विकारत्वम्। तुष्टिर्विषयालंबुद्धिः। तपो ब्रह्मचर्यादिः। दानं धर्मार्जितवित्तस्य परस्वत्वापादनम्। यशः कीर्तिः। अयशोऽपकीर्तिः। पृथग्विधाः नानाविधाः एते भावाः धर्माः भूतानां प्राणिनां मत्त एव भवन्ति इति।। ५।।

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः।। ६।।

न केवलं भूतानां बुद्ध्यादिधर्माः मत्तो भवन्ति। किंतु भूतान्यपि मत्त एव भवन्तीत्याह।। **महर्षय इति**।। 'मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। वसिष्ठश्च महातेजाः पूर्वे सप्तर्षयः स्मृता' (मोक्षधर्मे) इत्युक्ताः। पूर्वे पूर्वमन्वन्तरस्थास्सप्तमहर्षयः। मानसाः ब्रह्मणो मनोऽपत्यतया जाता पूर्वे प्राथमिकाश्चत्वारः स्वायंभुवस्वारोचिषरैवतोत्तमाख्याः मनवः। यद्वा मनु अवबोधने इत्यतः उप्रत्यये बोधवैशेष्याद्ब्रह्माद्या देवाः विप्रक्षत्रियवैश्यशूद्रभेदेन चतुर्धा स्थितत्वाच्चत्वारः। उक्तं हि बृहद्भाष्ये प्रथमाध्याये चतुर्थेऽव्याकृतब्राह्मणे– 'विष्णोर्ब्राह्मणजातिः सन् जज्ञे ब्रह्मा चतुर्मुखः। इतोऽग्रे जगतस्तस्मात्क्षत्रजातिरजायत।। वायुः सदाशिवोऽनन्तो गरुडः शक्र एव च। कामश्च वरुणश्चैव सोमः सूर्यो यमस्तथा।। एवमाद्याः क्षत्रियास्तु देवता ब्रह्मनिर्मिताः।।' इति। तथा 'विवस्वदिन्द्रवरुणविष्णुभ्योऽन्येऽदितेः सुताः। रुद्रादन्ये तथा रुद्राः वायोरन्ये च वायवः। अग्नेरन्ये च वसवो वैश्या इत्येव कीर्तिताः।।' तथा 'अश्विनौ पृथिवी चैव कालो मृत्यव एव च। शूद्रदेवाः समुद्दिष्टा देववर्णा इति स्मृता।।' इति च। विवस्वदिंद्रवरुणानां क्षत्रियत्वाद्विष्णोरवर्णत्वात्तेभ्योऽन्येष्टावादित्या ग्राह्या इति विष्णुभ्य इत्युक्तम्। अग्नेर्ब्राह्मणत्वादग्नेरन्य इत्युक्तम्। सप्तैव वसवो वैश्याः। सदाशिवस्य क्षत्रियत्वाद्रुद्रादन्य इत्युक्तम्। दशैव रुद्रा वैश्या इत्यर्थः। मद्भावा मत्तो भावो जन्म येषां ते मद्भावाः मत्त एवोत्पत्तिमन्त इत्यर्थः। लोके इमाः प्रजा येषां प्रागुक्तमनूनां पुत्रपौत्रादिरूपेण वर्तन्ते ते मद्भावा इत्यन्वयः। न च 'ततो मनून्ससर्जान्ते मनसा लोकभावनात्' (भाग. ३-२१-४९) इत्युक्त्या ब्रह्मसृष्टानां स्वायंभुवादीनां कथं मद्भावा इत्युक्तिरिति शंक्यम्। ब्रह्मान्तर्यामिणो मत्तो जनिमन्त इत्यर्थकत्वान्मद्भावा इत्यस्य। ब्रह्मा तु द्वारमात्रम्। न चैवमपि प्रियव्रताद्यपत्यतादशायामेवोत्पन्नानां तेषां मनुसंज्ञकत्वेन मानसत्ववेलायां तदभावेन मनव इति उक्तिरयुक्तेति वाच्यम्। मानसदेहात्यागेनैव प्रियव्रतादावुत्पन्नानां द्वयोर्देहयोरैक्येन मनुत्वोपपत्तेः इत्येतद्भाष्यटीकायामेवोक्तेः।। ६।।

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः।। ७।।

उक्तमाहात्म्यज्ञानस्य फलमाह— **एतामिति।।** एतां 'न मे विदुः सुरगणा' इत्यादिनोक्तां विभूतिं विशिष्टभवनं सुरगणाद्यवेद्यत्वरूपां महत्तां वक्ष्यमाणनानाविधभवनं वा। योगं च बुद्ध्यादिसर्वस्रष्टृत्वोक्त्या लब्धम्। प्रभवपदस्य प्रभावमिति व्याख्यानेन प्रभवपदेनोक्तं वा मम सामर्थ्यं च। " युज्यतेऽनेन (येन) योगोऽसावुपाय शक्तिरेव चे" त्युक्तेः। तत्त्वतो यो वेत्ति सोऽविकम्पेन निश्चलेन योगेन ध्यानरूपोपायेन युज्यते युक्तो भवति। अत्रार्थे संशयो नेत्यर्थः।। ७।।

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः।। ८।।

उक्तफले विश्वासजननार्थं पूर्वोक्तमहिमज्ञानपूर्वं मां भजन्तः सन्तीत्यहमित्यादि द्वाभ्यामुक्त्वा पुनस्तेषामित्यादिद्वाभ्यां फलं च व्यनक्ति। प्रभवत्यस्मादिति प्रभवः सर्वस्याहमुत्पादक इत्यर्थः। मत्तः सर्वं प्रवर्तते। इष्टानिष्टप्राप्तिपरिहाराद्यनुकूलव्यापारवद्भवति। लयादिरपि मदायत्त इत्युपलक्ष्यते इति मत्वा बुधाः ज्ञानिनः भावसमन्विताः भावेन भक्त्या समुपेताः सन्तः मां भजन्ते। पत्रपुष्पादिभिरर्चयन्ति ध्यायन्ति चेत्यर्थः। अत्र पूर्वार्धेनैव मामित्यस्य लाभात्पुनर्मामित्युक्तिर्जीवेश्वरैक्याभिप्रायेण स्वात्मानमुद्दिश्याहमेव सर्वस्य प्रभव इति मत्वा भजन्त इति प्रतीतिनिरासाय।। ८।।

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च।। ९।।

पुनर्भजनप्रकारमेवाह— **मच्चित्ता इति।।** मन्निष्ठमनस्काः। मद्गतप्राणाः मद्विषयचेष्टावन्तः। बोधयन्तः शिष्यान्प्रति बोधयन्तो मामुपदेशेनेति योज्यम्। परस्परं मां कथयन्तः कीर्तयन्तश्च, नित्यमिति सर्वत्रान्वेति। तुष्यन्ति तृप्ता भवंति। विषयेष्वलंबुद्धिमन्तो भवन्ति। तत्र हेतुः रमन्ति च सुखमनुभवंति चेति।। ९।।

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते।। १०।।

सततयुक्तानां नित्यं मयि निबद्धचित्तानां प्रीतिपूर्वकं मां भजतां तेषां तमेव बुद्धियोगं ज्ञानरूपं मुक्त्युपायं ददामि। येन बुद्धियोगेन मामुपयान्ति तमित्यन्वयः।। १०।।

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।। ११।।

अनाद्यज्ञानकृतबंधसत्त्वात्कथं तत्प्राप्तिरित्यत आह— **तेषामेवेति**। तेषामनुकम्पार्थमनुग्रहार्थमेव। न तु किंचित्फलमुद्दिश्य। अहमज्ञानजं तेषां तमः सुखदुःखादिक्लेशरूपबंधं भास्वता विरोधिनाशनदक्षतया प्रकाशमानेन ज्ञानाख्यदीपेन आत्मभावस्थः तदीयचित्तवृत्तिस्थस्सन्नाशयामीति।। ११।।

अर्जुन उवाच-

परं ब्रह्म परं धाम पवित्रं परमं भवान्।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्।। १२।।

एवं संक्षेपेणोक्तं विभूतिं योगं च श्रुत्वा विस्तरेण ज्ञातुकामः तत्स्तुतिपूर्वकं तद्वक्तुं प्रार्थयते— **परमित्यादिभिः सप्तभिः**।। हे केशवेत्यग्रेतनमाकृष्यते। भवान्परमुत्तमं ब्रह्म, परिपूर्णं, वस्तु परं धाम, उत्तमाश्रयः, परमं पवित्रं त्वां ऋषयो वसिष्ठाद्या देवर्षिर्नारदोऽसितादयश्च पुरुषं पूर्णषड्गुणं शाश्वतं निर्विकारं दिव्यं लोकविलक्षणं आदिदेवम् अजं जन्महीनं विभुं विशिष्टतया विविधतया च भवनहेतुना विभुशब्दवाच्यमाहुः।। १२।।

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे।। १३।।

"अहं सर्वस्य" इत्यादिना स्वयं च मे मह्यं ब्रवीषि वदसि।। १३।।

सर्वमेतदृतं मन्ये यन्मां वदसि केशव।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः।। १४।।

हे केशव, यन्मां प्रति वदसि सर्वमेतन्माहात्म्यम् ऋतं सत्यमेव मन्ये। केशवशब्दार्थ उक्तः प्रथमाध्याये। हे भगवन्, षड्गुणयुक्त ते व्यक्तिं सामर्थ्यातिशयं देवा दानवाश्च न विदुः। हीति 'न यस्येंद्रो वरुणो न मित्र' इत्यादौ प्रसिद्धमित्यर्थः।।१४।।

स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम।
भूतभावन भूतेश देवदेव जगत्पते।। १५।।

तर्हि को जानातीत्यत आह— **स्वयमेवेति**।। हे पुरुषोत्तम त्वं स्वयमेवान्यदनपेक्ष्यात्मना स्वसामर्थ्येनात्मानं वेत्थ जानासि। भूतभावन भूतानामुत्पादक भूतेश भूतनियामक।। १५।।

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि।। १६।।

एवं स्तुत्वा प्रार्थयते– **वक्तुमिति।।** दिव्याः या विभूतयः। याभिर्विभूतिभिः त्वमिमाल्लोकान्व्याप्य तिष्ठसि। ता विभूतीरशेषेण वक्तुम् अर्हसीत्यर्थः। विभूतयो नाम विविधतया नानारूपतया रामकृष्णादितया भूतानि रूपाणि। यद्वा 'येषां विष्णुस्वरूपाणां सन्निधेरन्यवस्तुषु। विशिष्टत्वं स्वजातेः स्याद्विभूत्याख्यानि तानि तु।।' इत्युक्तदिशा स्वसन्निधिनिमित्तेन वस्तुषु स्वजात्युत्तमतापादकरूपाणि।। १६।।

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया।। १७।।

नित्यं मच्चिन्तनया विभूतिरूपाणि जानीहि किं मद्वचनप्रार्थनयेत्यत आह– **कथमिति।।** त्वां परिचिन्तयन्नप्यहं त्वद्वचनाभावे। हे योगिन्ननन्तशक्ते विभूतीः कथं विद्यां जानीयाम्। अतो हे भगवन्मया केषु केषु भावेषु पदार्थेषु तेषां स्वजात्युत्तमतापादकतया स्थितः सन् चिन्त्योऽसि।। १७।।

विस्तरेणात्मनो योगं विभूतिं च जनार्दन।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्।। १८।।

तमात्मनो विभूतिं वस्तूनां विशिष्टताप्रदमात्मनो रूपं विविधतया (नानाविधतया) भूतं रूपं च। एकवचनं समुदायाशयम्। योगं सामर्थ्यं च विस्तरेण भूयः पुनः पुनः कथय। ते वचोऽमृतं शृण्वतो मे तृप्तिर्नास्ति। जनार्दनशब्दार्थ उक्तस्तृतीयाध्याये।। १८।।

श्रीभगवानुवाच-

हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे।। १९।।

'वक्तुमर्हस्यशेषेण' इत्यस्योत्तरं वदन् प्रतिज्ञां तावत्करोति– **हन्तेति।।** हतं हर्षे। या दिव्याः आत्मविभूतयः वस्तूनां विशिष्टताप्रदरूपाणि विविधस्वरूपाणि च। तानि रूपाणि प्राधान्यतः प्रधानतया स्थितानि। ते तुभ्यं कथयिष्यामि। मे विस्तरस्य विभूतिराशेरन्तः समाप्तिर्नास्ति। अतो नाशेषेण वचनं युक्तमिति भावः।। १९।।

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च।। २०।।

'केषु केषु च भावेषु चिन्त्य' इत्यस्य प्रश्नस्य सर्वभूतेष्वपि चिन्त्य इति भावेन सर्वभूतस्थत्वं तावत्सामान्यतो वक्ति– **अहमिति**।। हे गुडाकेश, जितनिद्र। अहमात्मा व्याप्तोऽपि सर्वभूतानां हृदयगुहायां स्थितः। अहमेव भूतानामादिर्मध्यमन्तश्च। सृष्टिस्थितिलयकर्ता चेत्यर्थः।। २०।।

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी।। २१।।

द्विविधं हि भगवतो विभूतिरूपं प्रत्यक्षं तिरोहितं च। तत्र प्रत्यक्षं विष्णुकपिलव्यासवासुदेवरामादिरूपम्। तिरोहितं तु पदार्थेष्वन्यत उत्कर्षप्रदत्वेन सन्निहितम्। द्विविधविभूतिरूपाणि संकलय्याह– **आदित्यानामिति**।। द्वादशादित्यानां मध्ये अहं विष्णुरस्मि। सर्व (त्र) व्याप्तत्वात्सर्वेषु प्रविष्टत्वाद्वा विष्णुनामास्मि। विष्लृ व्याप्तावित्यतः क्नुप्रत्ययः। विश प्रवेशन इत्यतः क्नुप्रत्यये शकारस्य षत्वे वा विष्णुरिति सिद्धेः। 'केषु केष्विति' पृष्टस्योत्तरमाह– **ज्योतिषामिति**। ज्योतिषां प्रकाशरूपाणां मध्ये अंशुमान्विश्वव्यापिरश्मियुक्तो रविरहमस्मि। ज्योतीरूपेभ्यो रवेराधिक्यहेतुतया रवेण वेदशब्देन ईयते ज्ञायते इति व्युत्पत्त्या रविनामकः सन् रवौ सन्निहितोऽस्मीत्यर्थः। रवशब्द उपपदे इण् गतावित्यतः क्विप् उपपदान्तलोपः। मरुतामेकोनपंचाशन्मरुतां मध्ये तेभ्यो मरीचिनाम्नो मरुत आधिक्यहेतुतया मरशब्दोक्तोदकवान् मेघो मरी तं चालयतीति व्युत्पत्त्या मरीचिः मरीचिनामा सन्मरीचौ मरुतिसन्निहितोऽस्मि। नक्षत्राणां मध्ये तेभ्यो शशिन आधिक्यहेतुतया शशिशब्दितातिसुखत्त्वहेतुना शशिनामा सन् शशिनि चन्द्रे स्थितोऽस्मि। एवमग्रे सर्वत्र तिरोहितेष्वर्थो ध्येयः। ग्रन्थगौरवभयान्निरुक्तिमात्रं वक्ष्यामः।। २१।।

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना।। २२।।

साम्यहेतुना सामवेदनहेतुना वेदे स्थितः सामवेदनामा। वसन्त्यत्रेति वासः सर्वदेशः तत्र वर्तत इति वासवः। वसतेरधिकरणे घञ् तस्मिन्नुपपदे वृतुधातोर्डः। अवबोधरूपत्वान्मनः मनुतेरसुन्। चेतोनेतृत्वाच्चेतना। स्त्रीरूपेण चेतनायां स्थितत्वात् स्त्रीलिंगम्। यद्वा भूतानां चेतनारूपसारधर्मद इत्यर्थः। चेतना नाम चेतसो व्याप्तिः। सा च "बहुस्मरणशक्तिश्च चेतनेत्यभिधीयत" इत्युक्तदिशा ज्ञेया।। २२।।

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम्।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्।। २३।।

सुखकारणत्वाच्छंकरनामा। वित्तस्वामित्वाद्वित्तेशनामा कुबेरस्थः। पावकः पावयति शोधयतीति व्युत्पत्त्या पावकनामा "पव शुद्धा" वित्यतोऽन्तर्णीतण्यर्थात् ण्वुल्। शुद्धिकर्तेत्यर्थः। मेरुरित्यत्र मा ईरुरिति विभागः। ईरयति प्रेरयतीति ईरः प्रेरकः। माशब्दो निषेधार्थः। ईरः प्रेरकोऽस्यान्यो मा नास्तीति मेरः मेर एव मेरुः। ईर प्रेरण इत्यतः ताच्छील्यार्थे उप्रत्ययः। शिखरिणां पर्वतानाम्।। २३।।

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः।। २४।।

पुरोधसां पुरोहितानां बृहतां पतित्वाद्बृहस्पतिनामानम्। सेनानीनां सेनानेतॄणां स्कंदनात्स्वस्माज्जगतो निष्कासनात्स्कंदनामा। 'स्कंदिर्गतिविशोषणयो' रिति धातोरच्। सरसां सरोवराणां सागरः। गिरतीति गरः गृ निगरणे पचाद्यच्। सारस्य गरः सागरः रशब्दलोपो निरुक्तत्वात्। सारभोक्तृत्वात्सागरनामा समुद्रस्थः।। २४।।

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः।। २५।।

विरोधिनां भर्जनाद्दहनाद्भृगुनामा भृगुस्थः। मुख्यत्वादेकम्। चतुर्विधनाशहीनत्वादक्षरनामा प्रणवस्थः। जान्जातान्पातीति जपः। याज्यत्वाद्यज्ञः। जपश्चासौ यज्ञश्चेति व्युत्पत्त्या जपयज्ञनामा जपरूपयज्ञस्थः स्थावराणां गतिहीनानां हिमालय इति। ह्रीश्च मा च तयोरालय आश्रयः। ह्रीमालयः स एव हिमालयः। ह्रीश्रीशब्दितलक्ष्मीरूपद्वयस्य आश्रयत्वाद्धिमवत्पर्वतस्थः।। २५।।

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः।। २६।।

अश्ववत्तिष्ठतीत्यश्वत्थनामाऽश्वत्थगतः नराणामपेक्षितं नारम्। तद्ददातीति नारदनामा नारदस्थः विचित्राधिदेवादिरथवत्त्वाच्चित्ररथनामा तन्नामकगन्धर्वस्थितः। सुखरूपत्वात्कः। पाल्यते जगदनेनेति पिः। पा रक्षण इत्यतः किः। 'आतो लोप इटि चे, त्याकारलोपः। लीयते जगदनेनेति लः। ली श्लेषण इत्यतो डः। ला आदान इत्यतो वा कः। कश्चासौ पिश्चासौ लश्चेति कपिलः। सुखं पिबत्यनुभवति लीलयेति वा कपिलः।। २६।।

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम्।। २७।।

अत्युत्कृष्टकीर्तिमत्त्वहेतुना उच्चैःश्रवोनामानममृतोद्भवं क्षीरसमुद्रजातोच्चैःश्रवःस्थं विद्धि। 'तदैरं मदीयं सर' इति मुक्तिस्थसरसो लक्ष्म्यात्मकत्वोक्तेः ऐरं श्रीः तामवतीति ऐरावतनामानं इन्द्रवाहनस्थं विद्धि। नरेश्वरत्वहेतुना नराधिपनामानं चक्रवर्त्यादिस्थं विद्धि।। २७।।

आयुधानामहं वज्रं धेनुनामस्मि कामधुक्।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः।। २८।।

सर्वदोषवर्जितत्वादरिभिर्वर्जनाद्वा वज्रनामा इन्द्रायुधस्थः। कामितार्थदोग्धृत्वात्कामधुङ्नामा कामधेनुस्थः। कं सुखं तस्य दराः प्रभेदाः तान्पिबत्यनुभवतीति कन्दर्पनामा। प्रकृष्टजननकारणमन्मथस्थः। सर्पाणामेकशिरसाम्। वासस्य कं वासकं अतिशयार्थ उकारः वासुकः तद्दातृत्वेन तद्वान्वासुकिः मत्वर्थक इकारप्रत्ययः। वासुकिर्वाससुखद इति निरुक्तेः।। २८।।

अनन्तश्चास्मि नागानां वरुणो यादसामहम्।
पितॄणामर्यमा चास्मि यमः संयमतामहम्।। २९।।

नागानामनेकशिरसां देशकालगुणानन्त्यहेतुनाऽनन्तनामा शेषगतः। यादसां जलचराणाम् उत्कृष्टानन्ददत्वाद्वरुणनामा वरुणस्थः। 'णश्च निर्वृतिवाचक' इत्युक्तेः। वरशब्दस्य उकारोऽन्तादेशः। वृणोतीति वा वरुणः वृञ उणप्रत्ययः। ऋ गताविति धातोर्यप्रत्यये अर्यं ज्ञेयं तन्माति जानातीत्यर्यमनामा तन्नामकपितृस्थः। संयमतां नियमनं कुर्वतां यमः नियमनहेतुना यमनामा यमाख्यसारधर्मप्रदः (इत्यर्थः)।। २९।।

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्।। ३०।।

प्रकृष्टः ह्लादः सुखं यस्येति प्रह्लादनामा तन्नामकदैत्यस्थः। कलयतामाकलयतां बंधनादिकुर्वतां वा कालः। कल ज्ञान इति धातोः सर्वमाकलयतीति कालनामा कालस्थः। स्वात्मानं मृगयन्त्यन्वेषयन्तीति मृगाः भक्तास्तदधिपतित्वान्मृगेन्द्रनामा मृगेन्द्रस्थः। विशेषेण नताः विनतास्तेषा माश्रयतया तत्संबंधी वैनतेयः। 'वैनतेयो नतास्पद' इत निर्वचनात् संबंधे ढक्।। ३०।।

पवनः पवतामस्मि रामः शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी।। ३१।।

पवतां शोधकानां वेगवतां वा। पान्तीति पाः 'पा रक्षणे' क्विप्। पाभिः पालकैः वननीयत्वाद्भजनीयत्वात्पवनः पवनस्थः लोकं रमयतीति रामः लोकोऽस्माद्रमत इति वा रामः। रमेर्घञ्। झषाणां मीनानाम्। माङ्मान इत्यतो माशब्देन ज्ञानं तस्याल्पताज्ञापनाय ह्रस्वतया निर्देशः। 'ऊनार्थे चोनमिष्यत' इत्युक्तेः। लोकस्य मम् अल्पज्ञानं करोतीति मकरनामा। मकराख्यजन्तुगतः। असारतया संसारं जहतस्त्यजतोऽवति रक्षतीति जाह्नवी नामा गंगास्थः।। ३१।।

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्।। ३२।।

सृज्यन्त इति सर्गाः भूतानि, तेषां सृष्टिस्थितिलयहेतुरहमेवेत्यर्थः। आत्मनो जीवानधिकृत्य पतित्वेन वर्तते ज्ञप्तिस्वरूपश्चेत्यध्यात्मविद्यानामा ब्रह्मविद्यास्थः। प्रवदतां जल्पवितंडादिकथां कुर्वतां वाच्यत्वहेतुना वादनामा वादकथास्थः।। ३२।।

अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः।। ३३।।

अ इत्याक्रियमाणत्वादकारनामा अकारस्थः। सामासिकस्य समाससमूहस्य। बहिरन्तर्द्विरूपत्वेन द्वंद्वनामा द्वंद्वसमासस्थः। क्षयहीनत्वादक्षयनामा संहर्तृत्वात्कालनामा सन्। अक्षयकालस्थः। उत्तरावधिशून्यः त्रिकालगतः। कलच्छेदन इति धातोः। धाता धारणपोषणकर्ता। डुधाञ् धारणपोषणयोः। सर्वदिङ्मुखत्वहेतुना विश्वतोमुखनामा चतुर्मुखस्थ इत्येके। सर्वत्र स्थितमुखोपलक्षितसर्वावयववानित्यर्थ इत्यन्ये।। ३३।।

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतीर्मेधा धृतिः क्षमा।। ३४।।

सर्वहरो मारकत्वहेतुना मृत्युस्थः। भविष्यतामुत्पत्स्यमानानामुद्भावयतीति व्युत्पत्त्योद्भवनामा उद्भवस्थः। कीर्त्यत्वाश्रयत्ववक्तृत्वहेतुभिः कीर्तिश्रीवाङ्नामा सन् कीर्तौ श्रियां वाचि च स्थितः। स्मरणीयत्वात्स्मृतिनामा स्मृतिस्थः। मेधाधृतिक्षमारूपत्वात्तत्तन्नामा मेधाधृतिक्षमास्थः।। ३४।।

बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः।। ३५।।

बृहत्सारत्वाद्बृहत्सः अमेयत्वादमः बृहत्सश्चासावमश्चेति बृहत्सामनामा। रथंतर-वैरूपवैराजशाक्वरादिसाम्नां मध्ये तदाधिक्यहेतुतया बृहत्सामस्थः। स्वगायकांस्त्रातीति व्युत्पत्त्या गायत्रीनामा। त्रिष्टुब्जगत्यादिछंदोभ्य आधिक्यहेतुतया गायत्रीच्छन्दस्थः। मार्गाणां शीर्षस्थानत्वान्मार्गशीर्षनामा, मासेभ्य आधिक्यहेतुतया मार्गशीर्षमासस्थः। कुत्सितां सुष्ठुभूतां च मां ज्ञानं करोतीति कुसुमाकरनामा अन्यऋतुभ्य आधिक्यहेतुना वसन्तऋतुस्थः।। ३५।।

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्।। ३६।।

छलयतां कापट्यमाचरतां क्रीडापरत्वहेतुना द्यूतनामा द्यूतस्थः। प्रकाशकत्वात्तेजोनामा तेजःस्थः। जयिनां जयरूपसारप्रदत्वहेतुना जयोऽस्मि। व्यवसायो निश्चयः व्यवसायिनां व्यवसायरूपसारधर्मदाताऽस्मीत्यर्थो ज्ञेयः। सत्त्ववतां सत्त्वरूपसारधर्मप्रदोऽस्मीत्यर्थः।। ३६।।

वृष्णीनां वासुदेवोऽस्मि पांडवानां धनञ्जयः।
मुनीनामप्यहं व्यासः कवीनामुशना कविः।। ३७।।

वासयति सर्वमाच्छादयति निवासयतीति वा वासुः। "वस आच्छादने" "वस निवास" इत्यतो वा ण्यंतादुण्। सर्वत्र वसतीति वा वासुः वसतेरुण्। स चासौ देवश्च क्रीडादिगुणविशिष्टश्चेति वासुदेवः। धनं जयतीति धनञ्जयनामा धनञ्जयस्थः। सर्वस्माद्विशिष्टत्वाद्विः आसमन्तात्सः गतः। सृगतावित्यतो डः। विश्चासावासश्च सर्वगतश्चेति व्यासः। यद्वा विशिष्टा आसा स्थितिर्यस्यासौ व्यासः। आस उपवेशने इति धातोः। उश इच्छायामिति धातोः सर्गादीच्छावत्त्वादुशनानामा सन्नुशना कविः उशनसि कवौ स्थित इत्यर्थः।। ३७।।

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्।। ३८।।

दमयतां दण्डं कुर्वतां दण्डनहेतुना दण्डनामा दण्डनरूपधर्मदाताऽस्मीत्यर्थः। जिगीषतां नीतिरस्मि नीतिरूपसारप्रदोऽस्मि। गुह्यानां गोपनीयानां मुनीनामीड्यत्वसंबंधेन मुनीनामिदं मौनम्। शब्दस्वभावान्नपुंसकता। मुनिसंबंधितया मौननामा मौनस्थः। ज्ञानवतां ज्ञानाख्यसारदोऽहमित्यर्थः। स्वयं च ज्ञानरूपत्वेन ज्ञाननामा। अत्र शश्यादिषु विजातीयश्रैष्ठ्यदं विभूतिरूपमुक्तम्। नक्षत्रादीनां विजातीयत्वात्। 'सत्त्वं

सत्त्ववतां' इत्यादौ धर्मिषु सत्त्वादिसारधर्मदं विभूतिरूपमुक्तं ज्ञेयम्। तथैव दर्शितमस्माभिस्तत्र तत्रैव। 'रुद्राणां शंकर' इत्यादौ सजातीयश्रैष्ठ्यदं विभूतिरूपमुक्तम्। वासवोशनोधनं जययज्ञवज्रसामवेदानां सजातीयैकदेशाधिक्यदं विभूतिरूपमुक्तम्। तेषां सजातीयसर्वश्रैष्ठ्याभावात्। देवेषु कवित्वादिगुणेषु च ब्रह्मणः। पार्थेषु भीमस्य, यज्ञेषु ज्ञानयज्ञस्य, आयुधेषु चक्रस्य, वेदेषु ऋग्वेदस्याधिक्यात्।। ३८।।

यच्चापि सर्वभूतानां बीजं तदहमर्जुन।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम्।। ३९।।

बीजं कारणं तदप्यहमेव श्रैष्ठ्यदत्वेन। भगवतः सर्वगतत्वं कुतो मानादित्यत आह– **न तदिति**।। मया विना यद्भूतं स्यात्तच्चराचरं नास्ति यतोऽतोऽहं सर्वत्र स्थितः इत्यर्थः। यद्वा रविप्रभृतिषु श्रैष्ठ्यदत्वेन तव सन्निधावुक्ते ज्योतिरादिषु नेति प्राप्तं अतः सर्वत्राहमस्मीति व्यतिरेकमुखेनाह– **न तदिति**।। ३९।।

नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया।। ४०।।

संक्षेपकरणे कारणं दर्शयन्नुपसंहरति– **नान्त इति**।। अन्तः पर्यवसितिः। अत्र एष इति पदमावर्तते। एष 'अहमात्मा गुडाकेशे' ति 'आदित्यानामहं विष्णुः' इत्यादिना विभूतिरूपसंक्षेप उद्देशतः शृंगग्राहिकया इदमिति विशिष्य निर्देशेन मया प्रोक्तः। एष तु वक्ष्यमाणतया हृदिस्थस्तु विभूतेर्विस्तरो मया प्रोक्तः प्रोच्यते। वर्तमाने निष्ठाप्रत्ययः। पुरा प्रोक्त इति वाऽर्थः।। ४०।।

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम्।। ४१।।

तमेव विभूतिविस्तरं लक्षणोक्त्याऽऽह– **यद्यदिति**।। यद्यत्सत्त्वं वस्तु विभूतिमत्स्वजातितः श्रैष्ठ्योपेतं श्रीमत्संपद्युक्तम् ऊर्जितम् अभिवृद्ध्युपेतं वा तत्तद्वस्तु मम तेजोरूपेण प्रकाशरूपेणांशेन सह भवतीति तेजोंऽशसंभवमेवावगच्छ जानीहि।। ४१।।

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।। ४२।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः।। १०।।

लक्षणमुखेनोक्ततत्तद्वस्तुनिष्ठविभूतिविस्तरादप्यधिकविभूतिविस्तरमाह— **अथवेति**।। अथवेति पक्षान्तरे। एतेन बहुना विभूत्यादियुक्तरविप्रभृतितत्तद्वस्तुनिष्ठपरिच्छिन्नविभूतिरूपाणां विस्तरेण ज्ञातेन तव किम्। न किमपि फलम्। वक्ष्यमाणव्याप्तज्ञानफलादल्पफलत्वादाक्षेपः। न तु वैफल्यादिति भावः। तर्हि किं ज्ञातव्यमित्यत आह— **विष्टभ्येति**।। इदं प्रमाणावगतं कृत्स्नं जगदेकांशेन अनन्तांशमध्ये एकांशेनैव विष्टभ्य व्याप्य स्थितः सर्वांशेन व्याप्तुं जगत्सहस्रमपि नालम्। अतः तादृशापर्यवसितव्याप्तिमानहम्। अतस्तज्ज्ञानमावश्यकमिति भावः। न चैतज्ज्ञानादेव मोक्षसिद्धौ प्रागुक्तपरिच्छिन्नविभूतिरूपाणां ज्ञानं व्यर्थमिति तदुक्तिर्व्यर्थेति शंक्यम्। 'अज्ञात्वैनं सर्वविशेषयुक्तं देवं परं को विमुच्येत बंधादिति' श्रुत्या प्रागुक्तज्ञानस्यावश्यकत्वात्। महाफलाधिकारित्वात्तवोभयज्ञानमावश्यकम्। न विशेषज्ञानमात्रेणालमिति तवैतेन किमिति भावेन तवेत्युक्तम्।। ४२।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते दशमोऽध्यायः।। १०।।

एकादशोऽध्यायः

अर्जुन उवाच-

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम्।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम।। १।।

।। ॐ।। पूर्वान्ते 'विष्टभ्याहमिदं कृत्स्नं' इति व्याप्तरूपोपासनं संक्षेपेणोक्तम्। संक्षेपेणोक्तरूपस्य बुद्धावनारोहेणाशक्यध्यानत्वात्तद्ध्यानसौकर्याय प्राक् संक्षेपेणोक्तविश्वरूपस्थितिरत्र विस्तरेणोच्यत इति पूर्वानन्तर्यमर्थभेदश्चास्येति ध्येयम्। विश्वरूपं ज्ञातुं तत्प्रष्टुकामः प्रागुक्तमनुवदत्यर्जुनः— **मदनुग्रहायेति द्वाभ्याम्।।** परमं गुह्यमतिगोप्यं आत्मानं भगवन्तं अधिकृत्य स्थितमध्यात्मम् अध्यात्मनामकं यद्वचः त्वया मदनुग्रहायोक्तम्। तेन बंधुस्नेहादिरूपोऽयं मोहो विगतोऽपगतः मम।। १।।

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम्।। २।।

हे कमलदलवदायतनेत्र। त्वत्तः भूतानां भवाप्ययौ। 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' (७-६) इत्यादिना सप्तमाध्यायादिषु विस्तरशो मया श्रुतौ अव्ययं माहात्म्यमपि च श्रुतम्।। २।।

एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम।। ३।।

तद्वचनं स्तुवन् ज्ञातव्यविश्वरूपाविर्भावं प्रार्थयते— **एवमित्यादि द्वाभ्याम्।।** हे परमेश्वर, यथा येन प्रकारेणात्मानं त्वमात्थ वदसि। एतद्वचनं एवमेव सत्यमेव। हे पुरुषोत्तम, ऐश्वरमचिन्त्यशक्तिकं ते रूपं द्रष्टुमिच्छामि।। ३।।

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्।। ४।।

हे प्रभो, समर्थ तद्रूपं मया द्रष्टुं शक्यमिति यदि मन्यसे। ततस्तर्हि योगेश्वर सर्वोपायपते। त्वमव्ययमात्मानं स्वरूपं मे मह्यं दर्शय। प्रार्थनायां लोट्। प्रभो इति वचनं तवातिसमर्थत्वात् त्वच्छक्त्यैवातीन्द्रियस्यापि दर्शनं स्यादिति ज्ञापनाय।। ४।।

श्रीभगवानुवाच-

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च।। ५।।

एवं कौतूहलान्वितेन पार्थेन प्रार्थितो भगवान् रूपं दिदर्शयिषुरादौ दर्शनं कुर्विति विधत्ते– **पश्येत्यादिना चतुष्टयेन**।। ते रूपं द्रष्टुमिच्छामीत्येकरूपदृष्टिप्रार्थनेऽपि दिव्यान्यप्राकृतानि। नानाभूताः शुक्लादिवर्णाः आकृतयः संस्थानविशेषाः येषां तानि। शतशः सहस्रशः बहूनीति यावत्। मे रूपाणि पार्थ पश्येति बहुरूपदर्शनोक्तिः एकस्यैव रूपस्याचिन्त्यशक्त्या विशेषबलेन चानन्तरूपसमुदायात्मकत्वाभिप्रायेणेति ज्ञेयम्। नानाविधानीत्यस्य विवरणं नानावर्णेत्यादि।। ५।।

पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत।। ६।।

पश्येत्युक्तौ कस्तत्र विशेष इत्यत आह– **पश्येति**।। द्वादशादित्यानष्टौ वसूनेकादशरुद्रान् पंचाशन्मरुतः। तथा शब्दः समुच्चये। अदृष्टपूर्वाणि पूर्वमदृष्टानि बहूनि आश्चर्याणि अद्भुतानि च।। ६।।

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि।। ७।।

मम देहे मदीये रूपे पश्य। कृत्स्नमित्यस्य विवरणं सचराचरमिति। जगदिह तव प्रदर्शनीये मम देहे। एकस्थमेकदेशस्थमद्य पश्य, हे गुडाकेश जितनिद्र। यच्चान्यद्द्रष्टुमिच्छसि तत्सर्वं मम देहे पश्य।। ७।।

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्।। ८।।

त्वं द्रष्टुमिच्छसि। मयाऽप्युच्यते पश्येति। तथाऽपि त्वं त्वनेन स्वचक्षुषा मां द्रष्टुं न शक्यसे न शक्तो भविष्यसि। अतस्ते दिव्यम् अलौकिकं चक्षुर्ददामि दर्शनशक्तिं ददामि। ऐश्वरम् ईश्वरभूतमत्संबंधियोगं सामर्थ्यं पश्येति।। ८।।

संजय उवाच-

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम्।। ९।।

अनन्तरवृत्तान्तं धृतराष्ट्रं प्रति संजय उवाच। तदाह— **एवमिति।।** 'पश्य मे पार्थ रूपाणि' इत्यादिप्रकारेणोक्त्वेत्यर्थः। महतां योगानामुपायानाम् अनन्तशक्तीनां वेश्वरः। कुत एतदित्यत उक्तं— **हरिरिति।।** सर्वयज्ञादिभागहरणाद्धरिः। परममनेकविभवोपेतम्। 'इडोपहूतं गेहेषु हरे भागं क्रतुष्वहम्। वर्णो मे हरितः श्रेष्ठः तस्माद्धरिरिति स्मृतः।।' इति मोक्षधर्मोक्तेः। गेहेषु इष्टिगृहेष्वित्यर्थः। हरते रिकारप्रत्ययः। अप्राकृतविग्रहस्य साकारस्यानन्तपूजास्थानेषु युगपत्सन्निधानेन भागहारिणो महायोगेश्वरत्वं किं वक्तव्यमिति भावः।। ९।।

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम्।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्।। १०।।

तद्रूपमाह— **अनेकेति।।** अनेकानि वक्त्राणि नयनानि यस्य तत्। अनेकशब्दोऽनन्तवाची। अनेकेषामद्भुतानां दर्शनं यस्मिन्नित्यनेकाद्भुतदर्शनं रूपं दर्शयामासेत्यनुषङ्गः।। १०।।

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्।। ११।।

सर्वाश्चर्यमयं सर्वाश्चर्यात्मकम्। तादात्म्यार्थे मयट्। देवं क्रीडादिगुणम्। अनन्तं देशकालगुणापरिच्छिन्नम्। विश्वतोमुखं सर्वदिक्षु मुखं यस्य तद्विश्वतोमुखम्। अनन्तमुखमिति वा।। ११।।

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः।। १२।।

किंच दिव्याकाशे सूर्यसहस्रस्यानन्तसूर्यराशेः युगपदुत्थितस्येति शेषः। प्रभा युगपदुत्थिता स्यात्सा प्रभा तस्य महात्मनो विश्वरूपस्य भासः प्रभायाः सदृशी स्यात् नान्याऽस्त्युपमेत्यर्थः।। १२।।

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा।
अपश्यद्देवदेवस्य शरीरे पांडवस्तदा।। १३।।

ततः किं जातमित्यत आह– **तत्रेति**।। भगवता प्रदर्शिते सति देवदेवस्य शरीरे विश्वरूपे देवदानवमानवादिभेदेनानेकधा प्रविभक्तं कृत्स्नं जगदेकस्थमेकदेशस्थं तदाऽपश्यत्।। १३।।

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत।। १४।।

दर्शनानंतरं किमकरोदित्यत आह– **तत इति**। दर्शनानन्तरम्।। १४।।

अर्जुन उवाच-

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान्।
ब्रह्माणमीशं कमलासनस्थम् ऋषींश्च सर्वानुरगांश्च दिव्यान्।। १५।।

किमभाषतेत्यतो दृष्टरूपानुवादपूर्वं स्तुतिमकरोदित्याह– **अर्जुन उवाचेत्यादिना**। सर्वान्देवान्सर्वान्प्राणिविशेषसमूहांश्चेत्यर्थः। ब्रह्माणं चतुर्मुखम्। कमलासने चतुर्मुखे स्थितम् ईशं रुद्रम्। तदुक्तं पाद्मे– 'विष्णुं समाश्रितो ब्रह्मा ब्रह्मणोऽङ्कगतो हरः। हरस्याङ्गविशेषेषु देवाः सर्वेऽपि संस्थिताः' इति। तव देहे देवानित्यत्रापि परंपरयेति ज्ञेयम्। दिव्यानद्भुतानुरगान्सर्पांश्च तव देहे पश्यामि।। १५।।

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम्।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप।। १६।।

'अनेकबाहूदरवक्त्रनेत्रम्' इत्यत्रापि अनेकनयनमित्यत्रेवानेकशब्दो अनन्तवाची। प्रागुक्तानुवादरूपत्वादपौनरुक्त्यम्। सर्वतः सर्वस्मिन्देशे अनन्तान्यपरिमितानि रूपाणि यस्य तम्। हे विश्वरूप पूर्णरूप "सर्वं समस्तं विश्वं च अनन्तं पूर्णमेव च" इत्युक्तेः। विश्वेश्वर जगत्पते। तवादि मध्यम् अन्तं वा न पश्यामि। नञः त्रिरुक्तिरादरार्था। अत एवाद्यन्तयोरभावादेव मध्याभावसिद्धौ पुनर्मध्यं नेत्युपचारनिवृत्त्यर्थम्।। १६।।

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम्।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम्।। १७।।

दीप्तयोरनलार्कयोर्द्युतिरिव द्युतिः प्रकाशो यस्य तमित्युक्त्या प्राप्तपरिमितशंकाव्युदासायोक्तमप्रमेयमिति अमितद्युतिमित्यर्थः।। १७।।

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे।। १८।।

परं निधानं मुख्याश्रयः। शाश्वतधर्मगोप्ता अनादिपरंपराप्राप्तधर्मरक्षकः। अव्ययो ह्रासहीनः सनातनोऽनादिनित्यः पुरुषो मे मतः।। १८।।

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम्।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्।। १९।।

अनादिमध्यान्तं आदिमध्यान्तशून्यं गुणतोऽत्रादिमध्यान्तहीनत्वमुच्यते। 'नान्तं न मध्यम्' इत्यत्र देशतः। अतो न पौनरुक्त्यम्। शशिसूर्यौ नेत्रयोर्यस्य तमिति वा जन्यजनकभावेन वा भेदोक्तिः। देवानां बहुरूपत्वादनेकाश्रयत्वं युक्तमिति 'चन्द्रमा मनसो जात' (ऋग्वेदखिलेषु) इति मनोजाततया तदाश्रयत्वमप्यविरुद्धम्। दीप्तहुताशवक्त्रमिति जन्यजनकभावेनाश्रयाश्रयिभावेन वेति ध्येयम् (ज्ञेयम्)।। १९।।

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्।। २०।।

द्यावापृथिव्योरिदमन्तरं मध्यम् एकेन त्वया एकरूपेण (त्वया) व्याप्तम्। रूपान्तरैस्तु सर्वा दिशो व्याप्ता इत्यर्थः। त्वयेत्येकवचनेनैवैकेनेति लाभे पुनरेकेनेत्युक्तिः एकेन रूपेण द्यावापृथिव्यन्तरव्याप्तिसूचनाय। हे महात्मान् स्तवेदमुग्रं भयङ्करमद्भुतं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम् अतिभीतं पश्यामीत्यन्वयः। भूमेर्भारहाराय प्रवृत्तत्वादुग्रमिव न तूग्रमेव। तदुग्रत्वमपि केषांचित्संहार्यत्वकारणविशेषादनभ्यासरूपकारणाद्वा। अभ्यासे तु आनन्द एव तद्दर्शनाद्भवति। अत्र लोकत्रयपदेन लोकत्रयस्थभक्तवर्गग्रहः। अभक्तानां तद्दृष्टेरेवाभावात्। यद्वा तद्रूपमदृष्ट्वाऽपि मनसा तदनुसन्धायैव बिभ्यज्ञनं दृष्ट्वाऽर्जुनोऽहमिव एतेऽपि दृष्ट्वा बिभ्यतीति बुद्ध्वा लोकत्रयं प्रव्यथितं पश्यामीत्याहेति ज्ञेयम्। अस्मिन्पक्षे लोकत्रयशब्दो भक्ताभक्तवर्गपरः।। २०।।

अमी हि त्वा सुरसङ्घा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः।। २१।।

अन्यदपि स्वदृष्टमाहार्जुनः— **अमी हीति।** सुरसंघाः मुक्तदेववर्गाः। 'प्रवेशो निर्गमश्चैव मुक्तानां स्वेच्छया भवेत्' इति वचनात्। तेन 'पश्यामि देवांस्तव देव देह' इत्यनेन न पौनरुक्त्यम्। अत्र मुक्तानां तत्रामुक्तानां उक्तेः। पुष्कलाभिर्गुणपूर्णाभिः स्तुतिभिः स्तुवन्ति।। २१।।

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मताश्चैव सर्वे।। २२।।

ऊष्मपाः पितरः "ऊष्मभागा हि पितर" इति श्रुतेः। गन्धर्वादीनां सङ्घाः।।२२।।

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम्।। २३।।

बहुदंष्ट्राभिः करालं विरूपम्। लोकाः भक्तवर्गाः भक्ताभक्तवर्गार्थत्वे तु लोकत्रयमित्यत्रेवाभिप्रायो ध्येयः। तथाऽहमपि प्रव्यथितः।। २३।।

नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम्।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो।।२४।।

व्यात्ताननं विवृतमुखम्। अन्तरात्मा मनः। न विन्दामि न प्राप्नोमि। शमं सुखं च न विन्दामि न प्राप्नोमि। विष्णुशब्दार्थ उक्तः दशमेऽध्याये।। २४।।

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास।। २५।।

दंष्ट्राकरालानि दंष्ट्राभिर्विरूपाणि। कालेति प्रलयकालाग्निसन्निभानि समप्रभाणि। न जाने न जानामि। शर्म सुखं च न विन्दामि। जगन्निवास जगदाधार।। २५।।

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः।
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः।। २६।।

त्वा त्वां सूतपूत्रः कर्णः। योधमुख्यैः योधेषु भटेषु प्रधानैःअस्मदीयैः सह।। २६।।

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि।
केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः।। २७।।

ते प्रागुक्तधृतराष्ट्रपुत्रादयः ते तव वक्त्राणि विशन्तीत्यत्र तेषां भगवन्मुखाभिमुखचेष्टाभावेऽपि भगवानेवानेकमुखैः सेनाद्वयस्थयोधान् ग्रसित्वा तिष्ठतीत्युपचारेण

विशन्तीत्युक्तिर्ज्ञेया। एवमग्रेऽपि। केचित्तस्मिन्मुहूर्त एव मरिष्यमाणाः। केचिद्दशनान्तरेषु विलग्नाः चूर्णितैः शतशः सूक्ष्मरेखोपेतशीर्णघटवत् शतशः सूक्ष्मरेखोपेततया भिन्नैः उत्तमाङ्गैः शिरोभिरुपलक्षिताः सन्तः दृश्यन्ते मयेत्यर्थः। मन्ददृष्टीनाम् अन्येषां तथा दृष्ट्यभावेऽप्यर्जुनस्य दिव्यदृष्टिमत्वात्तथा दर्शनं युक्तमिति ज्ञेयम्। यथाऽन्यैरदृष्टापि पूरूरवसो जराश्विभ्यां दृष्टा तथेति। व्यक्तमेतद्विष्णुधर्मे एकोनविंशेऽध्याये। (तथाहि-पुरूरवसो रूपं द्रष्टुमागतावश्विनौ प्रति पुरूरवो राजा तैलाभ्यक्तः सन्स्नातः भूषणयुतः सन्नागमिष्यामि तदा मद्रूपं द्रष्टव्यमित्युक्ते "अप्रसाधितमेवाशु भवन्तं वसुधाधिप। पश्यावो भूषितं त्वां वै वस्त्रालङ्करणान्वितम्।।" इत्यश्विभ्यामुक्ते तूष्णीं बहिर्गतस्य राज्ञः साङ्गापाङ्गादिकं सर्वं समपश्यताम्। "शिरोललाटबाह्वास्यनयनादिविलोकनम्। कृत्वा चिरं महीपालमूचतुस्तावरिन्दमौ।। प्रविश्य स्नास्य भूपाल यथार्हैश्च विभूषणैः। विभूषिततनुं भूयस्त्वां द्रक्ष्यावो नरेश्वरम्।।" इत्यश्विभ्यामुक्तो राजा गृहं प्रविश्य स्नात्वाऽनुलिप्तो वस्त्रालङ्करादिभूषितः सन्नश्विनोः समीपमागतः। तदा तौ तद्रूपं दृष्ट्वा हासं चक्रतुः। तदा राज्ञा हासकारणे पृष्टे "शृणु भूपाल सकलमावयोर्हासकारणम्। युष्मद्दर्शनसंभूतं क्षणापचयहेतुकम्।। अतस्तस्याभवत्पूर्वं यादृशी ते स्वरूपता। साम्प्रतं तादृशी नेयं भूषितस्यापि भूषणैः।। दिव्येन चक्षुषा भूप कालस्यास्य च तस्य च। वपुः परिणतिं स्वस्मात् पश्यावोपचयप्रदाम्।।" इत्यादिनेति भावः।)

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति।। २८।।

विज्वलन्ति दीप्यमानानि वक्त्राणि।। १८।।

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः।। २९।।

'तवापि वक्त्राणि समृद्धवेगा' भगवता अतितीव्रं ग्रस्यमानत्वात्तथोपचर्यन्त इति भावः।। २९।।

लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो।। ३०।।

समग्रान्लोकान् जनान् ज्वलद्भिर्वदनैः समन्ताद्ग्रसमानः मुखान्तःकुर्वाणः लेलिह्यसे। कोपेन रुधिरासिक्तमोष्ठ (ज) पुटादिकं जिह्वाग्रेणास्वादयसीवासकृत्स्पृश-

सि। हे विष्णो, तवोग्राः तीक्ष्णा भासः प्रभाः तेजोभिः प्रकाशनशक्तिभिः समग्रं जगदापूर्य व्याप्य प्रतपन्ति देहादिपदार्थेषूष्माणं (उष्णिमानं) जनयन्ति।। ३०।।

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद।
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम्।। ३१।।

भगवत्स्वरूपं तदीयगुणकर्माणि जानन्नप्यर्जुनः अज्ञातगुणकर्मविशेषज्ञानार्थं पृच्छति—**आख्याहीति।** उग्ररूपो भवान्कः किंधर्मकः किमर्थमुग्ररूप इत्यर्थः।। ३१।।

श्रीभगवानुवाच-

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः।। ३२।।

एवमर्थितो भगवान्स्वगुणादीनाह— **कालोऽस्मीति।।** "कल बंधने, कल संहरणे, कल ज्ञाने, कल विद्रावणे, कल कामधेनुरि" ति धातुपाठात्। पूर्णसद्(षड्)गुणैः कलितत्वात् संबद्धत्वात्कालः पूर्णसद्गुणो(षड्गुणो)ऽस्मीत्यर्थः। तथा जगद्बन्धनसंहरणबोधनविद्रावणादिकर्मयुक्तत्वाच्च कालोऽस्मीत्यर्थः। कलतेः कर्मणि कर्तरि च अण्, घञ् प्रत्ययो वा। किमर्थमुग्ररूप इत्यस्योत्तरम्— **लोकक्षयकृदित्यादि।** प्रवृद्धो देशकालतः परिपूर्णः। अनादिनित्य इति वा। लोकस्य क्षयकृद्भवन्निह युद्धमण्डलगतान् लोकान् जनान्प्रत्यक्षत एव संहर्तुं प्रवृत्तोऽस्मि। तर्हि पार्थानामपि संहर्तुं प्रवृत्तः किमित्यत आह— **ऋतेऽपीति।** अपिर्धर्मादिसमुच्चये। धर्मादिपञ्चपाण्डवान् अश्वत्थामकृतवर्मकृपांश्च विनेत्यर्थः। प्रत्यनीकेषु परस्परं प्रतिस्पर्धितया स्थिते सेनाद्वये। अक्षौहिणीबहुत्वाभिप्रायेण बहुवचनम्। येऽवस्थिता योधास्ते सर्वे न भविष्यन्तीत्यर्थः।। ३२।।

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम्।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्।। ३३।।

पूर्वं द्वितीये ' न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः' (२-६) इति वदन्तं पार्थं प्रति संदेहेऽपि युद्धे प्रवृत्तिर्युक्ता। पक्षद्वयेऽपि फललाभात्। 'हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्' (२-३७) इत्युत्तरमुक्तम्। इदानीं तव पराजयशङ्का नास्तीत्याह—**तस्मादिति द्वयेन।।** यस्मादहमेव लोकान्समाहर्तुमिह प्रवृत्तः। तस्माद्विजये संदेहाभावादुत्तिष्ठ योद्धुं सन्नद्धो भव। शत्रून् जित्वा यशो

लभस्व समृद्धं राज्यं भुङ्क्ष्व। पूर्वमेव मया निहताः निहतप्रायाः अपहृतायुष्ट्वेन सन्निहितमरणाः सन्ति। तान्प्रत्यक्षतो हन्तुं हे सव्यसाचिन्, त्वं निमित्तमात्रं भव। पश्चादपि त्वयि स्थित्वाऽहमेव हनिष्यामीति भावः।। ३३।।

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथाऽन्यानपि योधवीरान्।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान्।। ३४।।

ननु द्रोणो धनुर्विद्याचार्यः भीष्मः स्वच्छंदमृत्युः। योऽस्य शिरः छित्वा भूमौ पातयेत्तच्छिरो भेत्स्यत इति पितुर्वरेण बलिष्ठः सैन्धवः। वासवशक्त्या कर्णो बलवान्। एवमन्ये च बलिष्ठाः सन्ति। ते कथं मया जेया इत्यत आह— **द्रोणं चेति**।। ३४।।

संजय उवाच-

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य।। ३५।।

ततः किं जातमिति धार्तराष्ट्रहार्दं परिहर्तुं संजय उवाच किमित्यत आह— **एतदित्यादिना**।। वेपमानः भयकम्पितांगः। भीतभीतः अत्यन्तभीतः।। ३५।।

अर्जुन उवाच-

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः।।३६।।

तद्वचनमाह— **स्थान इत्यादिना**। हे हृषीकेश सर्वेन्द्रियप्रेरक तव प्रकीर्त्या जगत्प्रहृष्यति अनुरज्यते चेत्यादि (कं) स्थाने। अव्ययमेतत्। युक्तमेवेत्यर्थः।। ३६।।

कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत्।। ३७।।

कथं युक्तमित्यत आह— **कस्मादिति**।। हे महात्मन्महांश्चासावात्मा च तस्य संबुद्धिः महात्मन् महच्छब्दोऽत्र पूर्णवाची। आत्मशब्दोऽपि 'यच्चाप्नोति' (भारते) इत्यादिस्मृतेराप्त्यादानविषयानुभवनित्यसत्तारूपार्थचतुष्टयवाची। तुभ्यं कस्मान्न नमेरन्। नमेयुरेव। अनन्त अन्तशून्य। (देवेश) देवानामीश। जगन्निवास जगदाश्रय। यत्सदसद्भावात्मकं जगत्तत्परं तदुत्तममक्षरम्। त्वमेवेत्यर्थः।। ३७।।

त्वमादिदेवः पुरुषः पुराणः त्वमस्य विश्वस्य परं निधानम्।
वेत्ताऽसि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप।। ३८।।

निधानमाश्रयः। वेत्ताऽसि वेदिताऽसि परिज्ञाताऽसि। वेद्यं च त्वमेव। परंधाम तेजोजातं च त्वमेव। अनन्तरूप। कालतोऽन्तहीनं रूपं यस्य तस्य संबुद्धिः। न च 'नान्तं न मध्यं न पुनस्तवादिं पश्यामि' इत्यनेन "त्वया ततमि" त्यस्य पौनरुक्त्यं शंक्यम्। नान्तं पश्यामीत्युक्ते विद्यमानमप्यन्तं स्वयं न पश्यामीत्यपि प्रतीत्या परिमाणानन्त्यं नेश्वरस्य सिध्यतीत्यतो न केवलमहं न पश्यामि। त्वया ततं च विश्वमित्युक्तत्वेन सप्रयोजनत्वान्न पुनरुक्तिरिति ज्ञेयमिति। 'द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः' इति 'त्वया ततं विश्वमनन्तरूपं' इत्याद्यभ्यासो विष्णोर्देशकालगुणैः आनन्त्ये स्वस्य महातात्पर्यज्ञापनार्थम् इति न पौनरुक्त्यं शंक्यम्।।३८।।

वायुर्यमोऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते।। ३९।।

गुणान्तरयुक्तत्वेन पुनः स्तौति– **वायुरिति।।** वायुर्बलज्ञानरूपः। यमः दोषोपरतिमान्। अग्निः स्वतो गतिहीनजगन्नेता। वृणुते भक्तानिति वरुणः। अतिसुखाङ्कितत्वात् शशाङ्कः। प्रजापालनात् प्रजापतिः।। ३९।।

नमः पुरस्तादथ पृष्ठतश्च नमोऽस्तु ते सर्वत एव सर्व।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः।। ४०।।

सर्वतः दक्षिणोत्तरादिसर्वपार्श्वेभ्यः नमोऽस्तु ते। हे सर्व परिपूर्ण। ननु 'सर्वं खल्विदं ब्रह्म' (छा. ३-१४-१) इति श्रुतौ इदं सर्वं च जगद्ब्रह्मेति सर्वस्य जगतो ब्रह्मात्मकत्वोक्तेः "त्वमस्य विश्वस्य परं निधानम्। त्वया ततमिदं विश्वमि" त्याद्ययुक्तमित्यतः श्रुतिगतसर्वशब्दार्थमाह– **सर्वमिति।।** सर्वं विश्वं समाप्नोषि व्याप्नोषि यतः ततः सर्वोऽसि। "सर्वं खल्विदं ब्रह्म" (छा. १-१४-१) 'पुरुष एवेदं सर्वं' (तै. आ. ३-१२) इत्यादिश्रुतिस्थसर्वशब्दवाच्योऽसि। इदं ब्रह्म सर्वं खलु सर्वजगद्व्यापि खल्वित्यादिरूपेण श्रुत्यर्थो ज्ञेयः। न तु जगदात्मकत्वेनेत्यभिप्रायः।। ४०।।

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वाऽपि।। ४१।।

एतादृशमाहात्म्यं भगवन्तं प्रति यदपराद्धं तत्क्षन्तव्यमित्याह– **सखेत्यादिना।।** इदं प्रागुक्तं जगत्स्रष्टृत्वादिकं महिमानं अजानता मया प्रमादात्पारवश्यात्प्रणयेन वा

स्नेहेन वा सखेति मत्वा हे कृष्ण हे यादव हे सखेति प्रसभं अबहुमानं यथा तथा यदुक्तं तत्क्षामये क्षमापये इत्यग्रेतनेनान्वयः। हे सख इति विच्छिद्य वक्तव्ये संधिश्छांदसः।।४१।।

यच्चापहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु।
एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम्।। ४२।।

किंच अथवेति पक्षान्तरे। हे अच्युत सर्वगुणैश्च्युतिहीन। विहारः क्रीडा तदादिषु एकोऽपि त्वं सर्वोत्तमोऽपि असत्कारानर्होऽपि इति यावत्। यदपहासार्थमसत्कृतोऽसि अवमतोऽसि। तदप्रमेयं त्वां समक्षं त्वत्पुरतोऽहं क्षमापये क्षमस्वेति प्रार्थये। एकशब्दे ए शब्द एकवाची। कशब्दस्तु करोतेरन्तर्णीतण्यर्थात् केवलाद्वा डप्रत्यये क इति कर्तृवाची कारयितृवाची च। ए एकोऽसहाय एव कः कर्ता कारयिता चेत्येकः सर्वोत्तमः अन्यनिरपेक्षकर्तृत्वादिमत एव सर्वोत्तमत्वादिति। अत्र एकशब्दः सर्वोत्तमपरो ध्येयः।। ४२।।

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकःकुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव।।४३।।

असत्कारानर्हतामेव गुणान्तरोक्त्या व्यनक्ति— **पितासीत्यादिना।।** त्वमस्य चराचरस्य लोकस्य पिताऽसि जनकोऽसि। अत एव पूज्यो, गरीयान् गुरुरत्यन्तं गुरुश्च अप्रतिमप्रभाव अनुपमैश्वर्य।। ४३।।

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम्।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम्।।४४।।

यस्मादुक्तमहामहिमा तस्मात्कायं भूमौ प्रणिधाय ईशमीड्यं स्तुत्यं त्वा त्वां प्रणम्य प्रसादये। हे देव, पित्रादिः पुत्रादेरिवापराधं सोढुमर्हसि।। ४४।।

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास।। ४५।।

एवं क्षमाप्य प्रार्थयते— **अदृष्टेति।।** हे देव, पूर्वमदृष्टमदृष्टपूर्वं तव रूपं दृष्ट्वा हृषितोऽस्मि। तथा भयेन च मे मनः प्रव्यथितं प्रचलितम्। अतो हे देवेश जगन्निवास तदेव रूपं मे दर्शय प्रसीद।। ४५।।

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते।। ४६।।

तदेवेत्युक्तं रूपमाह– **किरीटिनमिति।।** यथा विश्वरूपं दृष्टवानस्मि तथैव तेनैव पूर्वदृष्टेन चतुर्भुजेन रूपेण त्वां द्रष्टुमिच्छामि। हे सहस्रबाहो अनन्तबाहो विश्व-मूर्ते गुणपूर्णविग्रहेति वा विश्वस्मिन्मूर्तिर्यस्येति वाऽर्थः।। ४६।।

श्रीभगवानुवाच-

मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम्।। ४७।।

भक्त्यतिशयोत्पादनाय विश्वरूपप्रदर्शनस्य दौर्लभ्यमाह– **मयेति।।** हे अर्जुन, प्रसन्नेन मया आत्मयोगात् स्वरूपसामर्थ्यात्परमुत्तमि इदं रूपं तव दर्शितम्। तद्विशिन-ष्टि। तेजोमयं प्रचुरतेजस्स्वरूपम्। विश्वं पूर्णम् अनंतं देशकालापरिच्छिन्नम्, आद्यं त्वदन्येन न दृष्टपूर्वमित्यस्य त्वत्तोऽधमैरदृष्टपूर्वमित्यर्थः। तैरपि स्वयोग्यतानुरोधेन दृष्ट-त्वेऽपि अर्जुनवन्न दृष्टमित्यदृष्टत्वोक्तिः। तथा त्वया त्विन्द्रशरीरेण दृष्टपूर्वमित्यपि त्वद-न्येनेति विशेषणाल्लभ्यते। यन्मे रूपं दर्शितमित्यन्वयः। अत्र विश्वरूपस्य परमित्युत्तम-त्वोक्तिः अज्ञजनापेक्षयैव। ब्रह्मादीनां कृष्णाद्यवतारेष्वपि परत्वधीसत्वादिति।। ४७।।

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीरः।। ४८।।

ननु अर्जुनादवरैः स्वतोऽर्जुनवन्न दृष्टमपि विश्वरूपं वेदादिसाधनैरर्जुनेनेव तदवरैरपि तथा दृश्यतामित्यत आह– **न वेदेति।।** वेदानां यज्ञानां चाध्ययनैरग्निहोत्रा-दिक्रियाभिः। उग्रैः कृच्छ्रचान्द्रायणादितपोभिरेवंरूपः प्राक् प्रदर्शितविश्वरूपोऽहं नृलोके त्वदन्येन त्वत्तोऽवरेण त्वद्वद्द्रष्टुं न शक्य इत्यर्थः। सर्वात्मनाऽर्जुनादन्येनादृ-ष्टार्थत्वे 'दृष्ट्वाऽद्भुतं, रूपमि'' ति प्रागुक्तविरोध इति ज्ञेयम्।।

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपँ घोरमीदृङ्ममेदम्।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य।। ४९।।

अदृष्टपूर्वमित्यादिना प्रार्थितस्योत्तरमाह– **मा त इति।।** घोरं संहर्तृरूपं ईदृगी-दृशम् अनन्तबाह्वादिरूपं दृष्ट्वा ते व्यथा माऽस्तु। विमूढभावो विमूढत्वं च माऽस्तु। व्यपगतभयः प्रीतमनाश्च सन्पुनस्त्वं तदेव रूपं पूर्वदृष्टमेव रूपं प्रपश्येति।। ४९।।

संजय उवाच-

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा।। ५०।।

ततः किं जातमिति धार्तराष्ट्रहार्दं निरसितुं संजय उवाच— **इत्यर्जुनमित्यादिना।।** इत्युक्त्वेत्यन्वयः। तथाशब्दः समुच्चये। स्वकं रूपं दर्शयामास चेत्यर्थः। स्वं स्वकीयतया प्रदर्शनीयमित्यर्थः। विश्वरूपं न स्वकीयं इदं तु स्वकीयमिति लोकभ्रांन्तिविषयमिति यावत्। भीतमेनं भूय आश्वासयामास च। किं कृत्वा महात्मा सौम्यवपुर्भूत्वेति।। ५०।।

अर्जुन उवाच-

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः।। ५१।।

विश्वरूपतिरोधानेन कृष्णरूप(प्र)दर्शनेनाश्वासितोऽस्मीत्याहार्जुनोः— **दृष्ट्वेति।।** किंच मनुष्यवद्दृश्यमानत्वात् मानुषमि इदं सौम्यमक्रूरं इदं तव रूपं दृष्ट्वा इदानीं सचेताः प्रसन्नचित्तः संवृत्तो जातोऽस्मि। प्रकृतिं पूर्वस्वभावं स्वस्थतां गतोऽस्मीत्युवाचेत्यन्वयः।। ५१।।

श्रीभगवानुवाच-

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः।। ५३।।

भयङ्करं रूपं किमर्थं दर्शितवानसीत्यतः विश्वरूपदृष्टेर्महिमानमाह भगवान्।। **सुदुर्दर्शमिति।।** यन्मम रूपं दृष्टवानसि। अस्य रूपस्य नित्यं दर्शनकाङ्क्षिणो ये देवाः तेऽपि यद्दृष्टवन्तस्तदिदं सुदुर्दर्शम्। केषांचित्सुखेन दर्शनीयम्। केषांचित्सुखेन दुःखेन च दर्शनीयमित्यर्थः। देवानामप्यपेक्षिततत्वात्तव शत्रुवधे निमित्तमात्रत्वज्ञापनाय चैतद्रूपं दर्शितमिति भावः।। ५२।।

नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा।। ५३।।

किंचातिदुर्लभदर्शनं ते मया कारितमिति भावेनाह— **नाहमिति।।** यथा दृष्टवानसि एवंविधो विश्वरूपवानित्यर्थः।। ५३।।

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप।। ५४।।

केनोपायेन द्रष्टुं शक्य इत्यत आह– **भक्त्येति।** वेदादितो विशेषद्योतकस्तु-शब्दः। अनन्ययाऽन्यासाधारणया असहाययेति वा। तत्त्वेन ज्ञातुं द्रष्टुं प्रवेष्टुं सायुज्यं प्राप्तुं च शक्योऽहमिति।। ५४।।

मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः।
निर्वैरस्सर्वभूतेषु यः स मामेति पांडव।। ५५।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनं नाम एकादशोऽध्यायः।। ११।।

अनन्ययेत्युक्त्या जातान्यत्यागभ्रान्तिं निराह– **मत्कर्मकृदिति।।** अहमेव परमो यस्य स तथा। मदुत्तमताज्ञानवानित्यर्थः। संगवर्जितः फलस्नेहहीनः यः स मामेतीति।। ५५।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते एकादशोऽध्यायः।। ११।।

द्वादशोऽध्यायः

अर्जुन उवाच-

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः।। १।।

।। ॐ।। देवदेव्युपासनयोर्मध्ये देवोपासनस्याधिक्याय तदुपासनमाहास्मिन्नध्याये। भगवदुपास्त्याधिक्यपरत्वादस्य भगवन्माहात्म्यपरषट्कान्तर्भावश्च। 'तमेवं विद्वान्' (तै.आ. ३-१२-७) इत्यादौ भगवदुपास्तेरिव 'श्रियं वसाना अमृतत्वमायन्' इत्यादिश्रुतौ श्रियं प्रत्युपासीना अमृतत्वं प्राप्ता इति श्रीदेव्युपास्तेरपि मुक्तिहेतुत्वावगमेन जायमानपरकीयसंदेहमाहृत्य विशेषयुक्तिबुभुत्सया पृच्छति– **एवमिति**।। न च देव्युपास्तेर्मुक्तिहेतुत्वमुपचरितम्। "अन्तवत्तु फलं तेषामि" ति साप्तमिकन्यायात्। अतो नास्य संदेहहेतुत्वमिति शंक्यम्। ब्रह्मादिदेवानां जनिमृतिमत्त्वेन तदुपास्तेरन्तवत्फलकत्वेऽपि श्रियस्तु 'चतुष्कपर्दा' इत्यादौ नित्ययौवनज्ञानमयत्वदेवपूज्यत्वादिमहामहिम्नः श्रवणेन तदुपास्तेर्मुक्तिहेतुत्वसंभवेन संदेहहेतुत्वं मन्वानस्यायं प्रश्नः। ये भक्ताः सततयुक्ताः सततं ध्यानकर्मयोगवन्तः। एवं दृष्टश्रुतरूपं त्वां एवं 'मत्कर्मकृत्' इत्याद्युक्तप्रकारेण पर्युपासते, येऽपि चाक्षरनामकमव्यक्तं चित्प्रकृतिं परिश्रद्धया भक्त्यादिपूर्वकमुपासते तेषां मध्ये के योगवित्तमाः मोक्षोपायज्ञेषु श्रेष्ठाः, इत्युवाचार्जुनः इत्यन्वयः। एवमित्यस्य त्वामित्यत्रोपासत इत्यत्र चान्वयः। एवमित्यस्य पूर्वपरामार्शित्वात्पूर्वानन्तर्यमप्य- स्याध्यायस्य ध्येयम्। अत्राव्यक्तमित्येव वाच्ये अक्षरमिति तद्विशेषणोक्तिः क्षरणवद्भ्यो ब्रह्मादिदेवान्तरेभ्यो वैलक्षण्यप्रदर्शनेन प्रश्नसंभावनार्था।। १।।

श्रीभगवानुवाच-

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः।। २।।

अव्यक्तोपासकान्मदुपासका एवोत्तमा इत्याह— **मयीति**।। ये मयि सम्यङ्मन आवेश्य नित्ययुक्ताः नित्यं कर्मयोगध्यानयोगवत्त्वेन नित्ययुक्ताः। परया श्रद्धयोपेताश्च सन्तः मामुपासते ते युक्ततमाः। मोक्षोपायवत्सु श्रेष्ठाः मे मता इत्यर्थः।। २।।

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्।। ३।।

नन्वव्यक्तोपासकानां मोक्षाभावे 'श्रियं वसाना अमृतत्वमायन्' इत्यादिश्रुतिविरोधः। मोक्षसत्त्वे च कथं त्वदुपासकानामेव युक्ततमत्वं फलसाम्यादित्यत आह— **ये त्विति**।। यद्वोक्तश्रुत्यादिनाऽव्यक्तोपासकानां मत्प्राप्तिरूपमोक्षसत्वेऽपि तदुपासनं कष्टसाध्यम्। मदुपासनं न तथा। अतो मदुपासका एवोत्तमा इत्याह— **ये त्वित्यादिना श्लोकपञ्चकेन**।। अक्षरमविनाशि सूक्ष्मत्वात्। अनिर्देश्यम् अप्रसिद्धत्वात् जगदुपादानप्रकृत्यभिमानित्वाच्चाव्यक्तनामकं श्रीतत्त्वं पर्युपासते। विष्णुभक्तिविष्णूत्तमत्वज्ञानविष्णूपासनादिपूर्वकमुपासते। तद्विशिनष्टि— **सर्वत्रगमिति**।। देशतो व्याप्तम्। गुणबाहुल्यादचिन्त्यम्। कूटस्थं कूटेऽव्याकृताकाशे अभिमानितया स्थितम्। कदाऽपि स्वपदादभ्रष्टत्वादचलं ध्रुवं निर्विकारमिति।। ३।।

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः।। ४।।

तदुपासनायामितिकर्तव्यतामाह— **सन्नियम्येति**।। इन्द्रियग्रामम् इन्द्रियसमुदायं सन्नियम्य विषयेभ्य उपसंहृत्य। सर्वत्र समबुद्धयः। षष्ठाध्यायोक्तदिशा सम्यग्ज्ञानवन्तः। सर्वभूतहिते रताश्च सन्तः पर्युपासत इत्यन्वयः। अत्राक्षरत्वादिविशेषणं मोक्षदानशक्तिद्योतनाय। ते मामेव प्राप्नुवन्तीति।। ४।।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते।। ५।।

अव्यक्तोपासकानामपि त्वत्प्राप्तिरूपमोक्षसत्त्वे कथं त्वदुपासकानामुत्तमतेत्यत अह— **क्लेश इति**।। अव्यक्ते विष्णुं विनाकृतश्रीतत्त्वे आसक्तचित्तानां तेषां क्लेशः अधिकतरः अत्यन्ताधिकः। कथमित्यत आह— **अव्यक्ता हीति**।। गतिशब्दो गम्यतेऽनेनेति करणव्युत्पत्त्या मार्गपरः। अव्यक्तशब्दस्तदुपासनं लक्षयित्वा तद्द्वारकलक्षकः। अव्यक्तोपासनद्वारको भगवत्प्राप्तिमार्गः दुःखं यथा भवति तथा देहवद्भिरवाप्यते हि। प्रागुक्तपरिशब्दार्थपूर्वकमुपासनम् इन्द्रियग्रामातिनियमनं षष्ठोक्तप्रकारेण सर्वत्र

समबुद्धित्वम्। सर्वभूतहितकरत्वं सुष्ठाचारं च विना न देवीप्रसादः। तेन विना नेश्वरप्रसादः। तेन विना न तत्प्राप्तिरिति तदुपास्तिद्वारकभगवत्प्राप्तिमार्गस्य क्लेशतरत्वं ध्येयम्।। ५।।

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते।। ६।।

मदुपासने न तथा क्लेश इत्याह– **ये त्विति**।। पूर्वस्माद्वैलक्षण्यद्योतकस्तुशब्दः। ये तु सर्वाणि कर्माणि मयि संन्यस्य सर्वस्वतन्त्रो हरिरेव मयि स्थित्वा स्वपूजात्वेन कर्माणि स्वाधीनकर्त्रा मया कारयतीत्यनुसन्धाय समर्प्येति वा। मत्पराः अहमेवोत्तम इति जानन्तः अनन्येनैव योगेन अव्यक्तोपासनां विना कृतेन ध्यानेन। केवलमद्विषयध्यानेनापीति यावत्। मां ध्यायन्त उपासते। अत्र उपासत इत्युक्त्या पर्युपासत इत्युक्ताव्यक्तोपासनमिव नातिशयितोपासनम्। अतीवेन्द्रियनियमनादिकं मत्प्रसादे नापेक्षितमिति न क्लेश इति सूचितं तथा 'न चिरा' दित्यनेनाव्यक्तापरोक्षे यावान् प्रयासस्तावता यदि मामुपासते तदूनेन वा तदा मदपरोक्षमेव भवतीत्यतोऽपि न क्लेश इति सूचितम्। तेषामहं समुद्धर्ता भवामीत्यनेनेन्द्रियसंयमाद्यूनभावेऽपि देवीवद्देवो नोपेक्षते किंतु तानि साधनानि भक्तिमतः स्वयमेवाप्रयत्नेन ददातीति चातिसौकर्यं भक्तानां भगवदुपासने इति भावः। यद्वा 'क्लेशोऽधिकतर' इति श्लोके अव्यक्तोपास्तिमार्गस्य क्लेशतरत्वोक्त्यैव सुष्ठाचारादेरूनत्वेऽपि मत्प्रसादो भवत्येवेत्यक्लेशत्वान्मदुपास्तिमार्ग एव श्रेष्ठ इति तात्पर्यगत्योक्तप्रायत्वाद्धेत्वन्तरेणापि भगवदुपास्तिमार्गः श्रेष्ठ इत्याह– **ये त्विति**।। पूर्वार्धस्य प्रागिवार्थः। अनन्येनैव अन्यशब्दो लक्ष्म्याद्यन्यदेवतावाची सन् तन्निष्ठस्वातन्त्र्यापरिवारत्वविषय(क)परः स न भवतीत्यन्यः तेन योगेन ध्यानेन भगवदधीनतया तत्परिवारत्वेन लक्ष्मीब्रह्मादिसहितेन ध्यानयोगेनेति यावत्। 'ॐ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॐ' (३-३-५७) इत्यादिसूत्रात् मां ध्यायन्त उपासते।। ६।।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्।। ७।।

तेषां मय्यावेशितचेतसामहं मृत्युसंसारसागरात् मृत्युरूपसंसारसमुद्रान्न चिराच्छीघ्रं समुद्धर्ता भवामीत्यर्थः। अत्र न चिरादित्युक्त्या श्रिया सह भगवदुपासने द्वयोरपि परमप्रसादसंभवेन अचिरान्मोक्षो भवति। पृथगव्यक्तोपासनपक्षे तु पूर्वं किंचिद्भगवदुपासनं कृत्वा बहुकालं पृथक् श्रियमुपास्य पुनः श्रिया सह भगवदुपासनं तु निरन्-

तरं कार्यम्। ततो मुक्तिरिति चिरेणैव भवतीत्यतोऽचिरेण मुक्तिहेतुत्वाच्च भगवदुपासनमेवाधिकमित्युक्तं भवति। तदुक्तम्– 'विष्णुना सहिता ध्याता देवी तुष्टिं परां व्रजेत्' इत्यादि।। ७।।

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः।। ८।।

एवमुक्तदिशा भगवदुपास्तेरेवोत्तमत्वात्तदेव कुरु। तदशक्तौ तत्सिद्ध्यर्थम् उपायान्तराणि संपादयेत्याह– **मय्यीत्यादिचतुष्टयेन।।** मय्येव मन आधत्स्व आधेहि मामुपास्वेति यावत्। तदलाभे मयि बुद्धिं निवेशय। मद्विषयं ज्ञानं संपादय। अत ऊर्ध्वं मत्संपत्त्यनन्तरं मय्येव निवसिष्यसि निर्दुःखानन्दानुभवात्मिकां स्थितिं प्राप्स्यसि।।८।।

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय।। ९।।

अथेत्यर्थान्तरे। स्थिरं यथा तथा मयि चित्तं समाधातुं न शक्नोषि। ततो मनःसमाधानाशक्तत्वात्पुनः पुनः प्रत्याहारेण भगवन्मनःसमाधानरूपाभ्यासलक्षणोपायेन मामाप्तुं ज्ञातुमिच्छ।। ९।।

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि।। १०।।

अभ्यासेऽप्यशक्तोऽसि तदा मत्कर्मपरमः मत्प्रीत्यर्थं मद्विषयकर्मानुष्ठानमेव परममुत्तमं यस्य स तथा तादृशो भव। तावता कथमिष्टसिद्धिरित्यत आह **–मदर्थमिति।।** कुर्वन्नपीत्यर्थः।। १०।।

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्।। ११।।

अथेति प्राग्वत्। एतदपि सर्वाण्यपि जपार्चनादीनि कर्माणि मदुद्देश्यकानि मत्प्रीत्यर्थकानीत्यनुष्ठानमपि कर्तुमशक्तोऽसि। तर्हि देवतान्तरोद्देशेन कर्माणि कृत्वाऽन्ते मयि समर्पणरूपं मद्योगम्। मत्कर्मवत्त्वे उपायम् अन्ते मयि समर्पणं सर्वकर्मणां वैष्णवत्वेन करणे य उपायस्तमाश्रितो भव। ततो मद्योगात् यतात्मवान् नियतमनस्कः सर्वकर्मफलत्यागं कुर्वित्यर्थः। सर्वप्रकारेणापि मदुपासनमेव त्वदुपलक्षितैः सर्वैः कार्यमिति तात्पर्यार्थः।। ११।।

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्।। १२।।

मयीत्यादिनोक्तध्यानालाभे ज्ञानं तदलाभेऽभ्यासयोग इत्येतत्समर्थयते— **श्रेयो हीति।।** अज्ञानपूर्वकादभ्यासाज्ज्ञानं श्रेयः। ज्ञानमात्राज्ज्ञानपूर्वकध्यानं श्रेयः। तस्माद्ध्यानाज्ज्ञानपूर्वकसकामध्यानादित्यर्थः। कर्मफलत्यागः श्रेयान्। एतादृशसकामध्यानात्कर्मफलत्यागोपलक्षिततादृशनिष्कामध्यानं श्रेय इति (ध्येयम्) योज्यम्। फलत्यागात्कर्मफलत्यागोपलक्षितनिष्कामध्यानादित्यर्थः। अपरोक्षज्ञानं श्रेय इति योज्यम्। अनन्तरं शान्तिर्मोक्ष इत्यर्थः।। १२।।

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहंकारः समदुःखसुखः क्षमी।। १३।।

ये तु सर्वाणि कर्माणीत्युक्तं तदुपलक्षितधर्मान्तरोक्त्या प्रपञ्चयति— **अद्वेष्टेत्यादिना।।** अद्वेष्टा अप्रियमकुर्वन्। क्लेशस्थानं निरूप्य ततो रक्षिता मैत्रः। करुणः कृपावान्। निर्ममः ममेदमिति स्वातन्त्र्यबुद्धिहीनः। निरहंकारः अविद्यमानात्मगुणाभिमानमोहहीनः। हेयतया दुःखसमं वैषयिकसुखं यस्य स समदुःखसुखः। क्षमी सहिष्णुः।। १३।।

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।। १४।।

सन्तुष्टः अलम्बुद्धिमान्। योगी कर्मध्यानरूपज्ञानोपायवान्। यतात्मा विषयेभ्य उपसंहतचित्तः। दृढनिश्चयः अप्रामाण्यशंकाशून्यतत्त्वनिश्चयवान्। मय्यर्पिते मनोबुद्धी यस्य स तथोक्तः।। १४।।

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।। १५।।

किंच यस्माल्लोको नोद्विजते न बिभेति लोकस्य भयहेतुर्यो न भवति। यश्च सर्वमीशाधीनं बुद्ध्वा लोकाज्जनात् नोद्विजते। यश्च हर्षामर्षभयोद्वेगैः। हर्षो नाम (मदात्) सदाऽधर्माय मनःप्रवृत्तिः। अमर्षे रोषः। उद्वेगो मनः कम्पविशेषः। तैर्मुक्तो हीनः। स चेत्यत्र भक्त इत्यनुषज्यते। मे प्रियः।। १५।।

अनपेक्ष शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः।। १६।।

किंच अनपेक्षो भगवत्प्रीत्यन्यत्र काप्यपेक्षाहीनः। शुचिः बाह्यान्तरशुद्धिमान्। दक्षः भगवत्कर्मकरणे पटुः। उदासीनः कर्तव्योपकारापकारयोरुपेक्षकः। गतव्यथः परकृतापकारैरप्राप्तमनःक्लेशः। सर्वारम्भपरित्यागीत्यस्य अवैष्णवसर्वारम्भपरित्यागीति, सर्वारम्भाभिमानत्यागी सर्वारम्भफलत्यागी भगवति सर्वारम्भसमर्पणरूपत्यागवानिति चतुर्धार्थः।। १६।।

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः।। १७।।

'हर्षामर्षभयोद्वेगैर्मुक्त' इत्युक्ते निष्ठाप्रत्ययेनातीतत्वप्रतीत्या कालान्तरे हर्षादिमानिति शंका स्यात्। तन्निरासाय तद्व्यनक्ति– **यो न हृष्यतीत्यादिना**।। 'नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोरिति' (पा०सू० ३-३-१३५) सूत्रेण क्रियासातत्यरूपक्रियाप्रबन्धे विहितलट्प्रत्ययान्तत्वेन हृष्यतीत्यादेर्यावज्जीवं हृष्यतीत्यादिरर्थः। न हृष्यति द्वेष्टीत्यादिरूपेण नञ्सम्बन्धे सति कदाऽपि न हृष्यतीत्यादिरर्थो भवतीति भावः। उदाहृतं च वृत्तौ तार्तीयतृतीयपादे। यावज्जीवमन्नमदादित्यादि। सर्वारम्भपरित्यागीति सामान्यत उक्तम्। विशिष्योक्त्या व्यनक्ति– **शुभाशुभेति**।। ज्ञानभक्तिवैराग्याद्यन्यशुभत्यागीत्यर्थः। अत एव तदन्यत्र काङ्क्षतीत्यर्थो न काङ्क्षतीत्यस्य ज्ञेयः। एवं लोकान्नोद्विजत इत्यस्यापि हर्षामर्षभयमुक्त इत्यनेनापौनरुक्त्यं ध्येयम्। उक्तशंकानिरासार्थत्वादिति।। १७।।

समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः संगविवर्जितः।। १८।।

किंच समः शत्रौ च मित्रे चेत्यादि। पूर्वं समदुःखसुख इति सामान्येनोक्तम्। तद्विशिष्योक्त्या व्यनक्ति– **शीतोष्णेत्यादि**।। शीतोष्णादिविषयजन्यसुखदुःखेषु समः उत्सेकानुत्सेकहीनः। संगविवर्जितः फलस्नेहहीनः।। १८।।

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः।। १९।

किंच तुल्यनिन्दास्तुतिः हेयत्वेन निन्दायाः तुल्या स्तुतिर्यस्य स तथा। अनिकेतः अनियतवासः। अकारवाच्यभगवदाश्रयो वा। स्थिरमतिः कुतर्कैरचञ्चलज्ञानः। यो मद्भक्तः भक्तिमानिति भक्तेर्बहुवारोक्तिरद्वेष्टेत्यादिनोक्तेषु धर्मेषु भक्तेराधिक्यज्ञापनाय। अत्र सुखादिषु साम्यं हर्षादिराहित्यं च प्रायेणेति ज्ञेयम्। 'प्रायः सुखादिषु समः

प्रायो हर्षादिवर्जित' इत्यादेः। सन्तुष्टः सततमित्यस्य सन्तुष्टो येन केनचिदित्येतद्व्याख्यानरूपमित्यपौनरुक्त्यम्।। १९।।

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः।। २०।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः।। १२।।

'अद्वेष्टा सर्वभूतानामि' त्यादावद्वेषादिकं यत्पृथक् प्रीतिमात्रसाधनमुक्तं, 'स मे प्रियः' 'स च मे प्रियः' इत्यादिना तत्सर्वं मिलितं यत्रास्ति स तु मेऽत्यन्तं प्रिय इति प्रागुक्तं पिण्डीकृत्योपसंहरति— **ये त्विति**।। धर्मामृतं धारकत्वाद्धर्मो विष्णुस्तदुपासनाङ्गत्वादुपचारेण धर्म्यम्। अमृतशब्दितमुक्तिसाधनममृतम्। धर्म्यं च तदमृतं च धर्म्यामृतम्। यथोक्तमद्वेष्टेत्यादिनोक्तमद्वेषादिकं प्रीतिसाधनं समस्तम्। श्रद्दधानाः। आस्तिक्यवन्तः। मत्परमाः मदुत्तमताज्ञानिनः सन्तो ये पर्युपासते सम्यगनुतिष्ठन्ति ते भक्ताः अतीव मे प्रियाः इत्यर्थः।। २०।।

इति श्रीमद्गीतार्थसङ्ग्रहे राघवेन्द्रयतिकृते द्वादशोऽध्यायः।। १२।।

त्रयोदशोऽध्यायः

अर्जुन उवाच-

प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च।
एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव।। १।।

पूर्वषट्कद्वयोक्तार्थसंग्रहपरोऽयमध्यायः। तथाहि– यत्प्रथमषट्के 'त्रैगुण्यविषया वेदा' (२-४६) इत्यादिना प्राचुर्येण ज्ञानसाधनमाषष्ठसमाप्तेरुक्तम्, यच्च तत्र द्वितीयेऽध्याये 'न त्वेवाहं' (२-१२) इत्यादिनाऽनादिनित्यत्वादिना जीवस्वरूपमुक्तम्, यच्च द्वितीयषट्केभगवत्स्वरूपमुक्तम्, यदपि सप्तमे 'भूमिराप' (७-४) इत्यादिना क्षेत्रशब्दितं भगवदावासस्थानमुक्तम्, तद्विकीर्णतयोक्तं सर्वं बुद्ध्यारोहार्थं संक्षिप्यास्मिन्नध्याये प्रश्नपूर्वकं प्रदर्श्यते– **प्रकृतिमित्यादिना**।। पुरुषं जीवम्। ज्ञानं ज्ञानसाधनम्।। १।।

श्रीभगवानुवाच-

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञं इति तद्विदः।। २।।

ननु भगवत्स्वरूपज्ञानस्यैव पूर्वोक्तदिशा मुक्तिहेतुत्वात्तत्स्वरूपोक्तिर्युक्ता। क्षेत्रस्वरूपं 'महाभूतानि' (१३-६) इत्यादिना किमर्थमत्रोच्यत इति चेन्न। क्षेत्रज्ञत्वविशिष्टभगवज्ज्ञानोपयोगित्वात्क्षेत्रोक्तिरिति क्षेत्रोद्देशपूर्वं भगवतः क्षेत्रज्ञत्वमाह– **इदमिति**।। कौन्तेय इदं शरीरम् अव्यक्तमहदहंकारादिकं भगवदावासस्थानत्वात् क्षीयते स्थीयतेऽत्र भगवतेति व्युत्पत्त्या क्षेत्रमित्यभिधीयते। एतदव्यक्तादिकं क्षेत्रशब्दितं यो वेत्ति जानाति तं तद्विदः क्षेत्रविदः क्षेत्रज्ञमिति प्राहुरित्यर्थः। शरीरशब्दस्याव्यक्तादिपरत्वं च स्वपरिणामदेहादिवियोगद्वारा जीवस्य हिंसादिहेतुत्वात्, शर् शृ हिंसायामिति धातोः, भगवता प्रेर्यत्वादीरं च। ईर प्रेरण इति धातोः। शर् च तदीरं चेति शरीरमिति व्युत्पत्तेरिति ज्ञेयम्। तेन संघातश्चेतनेति संघातपदेन क्षेत्रविकारेष्वेकदेशत्वेनोक्तशरीरस्य कथं समस्तक्षेत्रत्वमुच्यत इति शंका निरस्ता।। २।।

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम।। ३।।

जीवस्यापि किंचित्क्षेत्रज्ञज्ञानात्स किं क्षेत्रज्ञ इत्यत आह— **क्षेत्रज्ञं चेति।।** सर्वक्षेत्रेष्वव्यक्तादिषु क्षेत्रज्ञं तु मां विद्धि। न जीवम्। क्षेत्रक्षेत्रज्ञयोर्यज्ज्ञानं तज्ज्ञानं मम सम्यग्ज्ञानं मतमित्यर्थः। अत्र सर्वक्षेत्रेष्वित्युक्तिरिदं शरीरमित्यत्र शरीरपदोक्ताव्यक्तादेः क्षीयतेऽत्रेश्वरेणेति व्युत्पत्त्या क्षेत्रपदवाच्यत्वमिति सूचनाय।। ३।।

तत् क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत्।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु।। ४।।

क्षेत्रादिस्वरूपं वक्तुं प्रतिजानीते— **तत्क्षेत्रमिति।।** तत्क्षेत्रं यद्भगवन्निवासस्थानतया क्षेत्रपदोक्तम्। देहद्वारा जीवहिंसाहेतुतया ईश्वरप्रेर्यत्वहेतुना च शरीरपदेन प्रकृतम् अव्यक्तादि, यच्च यत्स्वरूपं यादृक् यत्प्रकारं यद्विकारि। कर्मधारयात् मतुप्। येन विकारेण (सं)युक्तम्। यतः यादृशप्रवृत्त्यनुकूलधर्मयुक्तात्पुरुषात्। यत्। इणः शत्रन्तं रूपम्। गतिमत्। प्रवर्तत इति यावत्। स च प्रवर्तकः यः यत्स्वरूपः यत्प्रभावः यादृशप्रवृत्त्यनुकूलधर्मेतरसामर्थ्यवान्, तत्सर्वं समासेन संक्षेपेण मे सकाशाच्छृणु श्रुत्वा निष्ठां कुरु।। ४।।

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितम्।। ५।।

श्रोतृविश्वासजननायोच्यमानं प्रामाणिकमित्याह— **ऋषिभिरिति।।** तदित्यनुषज्यते। यच्छृण्वित्युक्तं क्षेत्रादिस्वरूपं तदृषिभिर्बहुधा गीतम्। गै शब्दे। उक्तमित्यर्थः। विविधैः छन्दोभिर्वेदैः। प्रत्येकं गीतमिति सर्वत्रानुषज्यते। हेतुमद्भिः न्यायोपेतैः ब्रह्मसूत्रपदैश्च विनिश्चितमेव शृण्वित्यन्वयः।। ५।।

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः।। ६।।

क्षेत्रं यच्च यादृक् च तच्छृण्विति प्रतिज्ञातमाह— **महाभूतानीति।।** पञ्चमहाभूतानि। महत्तत्त्वमप्यहंकारशब्देन गृह्यते। बुद्धिरन्तःकरणविशेषः। अव्यक्तं त्रिगुणात्मकं प्रधानम्। 'इन्द्रियाणि दशैकं चे' ति ज्ञानेन्द्रियमनोभेदेनैकादशेन्द्रियाणि। इन्द्रियगोचराः श्रोत्रादिविषयाः शब्दाद्याः पञ्च च। एतत्क्षेत्रं समासेन संक्षेपेण महाभूतत्वादिप्रकारोपेतमुदाहृतमित्यन्वयः।। ६।।

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम्।। ७।।

क्षेत्रं यद्विकारीति प्रतिज्ञातक्षेत्रविकारानाह— **इच्छेति।।** संघातो देहः। चेतना चेतसो व्याप्तिः। धृतिर्धैर्यम्। एतत्प्रागुक्तं क्षेत्रम् इच्छादिविकारोपेतं संक्षेपेणोक्तमित्यर्थः। महाभूतादिक्षेत्राभिमानिनः। तद्विकारेच्छाद्यभिमानिनश्चावश्यं ज्ञेयत्वादुच्यन्ते। आकाशाभिमानी विघ्नेशः। वायुमानी मुख्यवायुजो अभिमानी मरीचिनामा। अग्निमानी वह्निः। अबभिमानी वरुणः। भूमिमानिनी धरादेवी। अहंकारः शिवः। महान्ब्रह्मा। बुद्धिरुमा। अव्यक्तं श्रीदेवी। इन्द्रियेषु मनोऽभिमानिनः स्कन्देन्द्रानिरुद्धाः। श्रोत्रं चन्द्रः। त्वक् वायुसुतो मरुत्। चक्षुः सूर्यः। जिह्वा वरुणस्य रूपान्तरम्। घ्राणमश्विनौ। वागग्निः। हस्तौ वायुसुतौ मरुतौ। पादौ तु विष्णुनाविष्टौ शचीसुतौ यज्ञशंभुनामकौ। पायुर्यमः। उपस्थः शिवः मनुश्च। इन्द्रियगोचरेषु शब्दस्पर्शरूपरसगन्धाभिमानिनः शिवपुत्राः पञ्च ज्ञेयाः। विकारेषु इच्छा श्रीर्भारती च। द्वेषदुःखाभिमानिनौ कलिद्वापरौ। सुखं मुख्यवायुः। धृतिः सरस्वती भारती च। चेतना श्रीः। संघातमानिनोऽन्ये चेतनाः ज्ञेयाः। अभिमानिनां प्रागुक्तव्युत्पत्त्या भगवन्निवासत्वादेव क्षेत्रनामत्वम्। क्षेत्रविकारित्वमपि महदादिभ्योऽतिशयेन विकारितया स्थितत्वादिति ज्ञेयम्।। ७।।

अमानित्वमदंभित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः।। ८।।

एवं प्रतिज्ञातार्थषट्कमध्ये यच्च यादृक्च यद्विकारीति त्रयमुक्त्वा यतश्च यदिति (अग्रे) वक्ष्यन् ततः प्राक् स च यो यत्प्रभावश्चेति प्रतिज्ञातार्थद्वयं "ज्ञेयं यत्तदि" त्यादिना वक्तुं न यादृशतादृशेन श्रवणेन तदनुभवारूढं भवतीति भावेन वक्ष्यमाणज्ञेयद्वयभूतभगवज्ज्ञानस्य साधनान्याह— **अमानित्वमित्यादिपञ्चकेन।।** अमानित्वमात्मनः श्लाघनराहित्यम्। आत्माल्पत्वं ज्ञात्वाऽपि महत्त्वप्रदर्शनं दम्भः। तद्राहित्यमदम्भित्वम्। क्षान्तिः सहिष्णुत्वम्। आर्जवं सन्मार्गे मनोवाक्कायकर्मणामवैपरीत्यम्। आचार्योपासनं ज्ञानिनां सेवा। शौचं बाह्यान्तरशुद्धिः। 'शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथाऽन्तरम्' इति स्मृतेः। स्थैर्यं भयादिना स्वधर्मादचलनम्। आत्मविनिग्रहः विशेषेण मनसो नियमनम्।। ८।।

इन्द्रियार्थेषु वैराग्यमनहंकार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्।। ९।।

इन्द्रियार्थेषु वैराग्यं शब्दादिषु रागाभावः। अनहंकारः अविद्यमानात्मगुणाभि-

मानमोहाभावः। जन्मादिषु दुःखदोषयोरनुदर्शनमिति वा दुःखस्वरूपस्य दोषस्यानुदर्शनमिति वा। अनुक्षणमनुसन्धानमित्यर्थः।। ९।।

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु।। १०।।

पुत्रदारगृहादिषु असक्तिः स्नेहाभावः। अनभिष्वङ्गः अतिपक्वस्नेहाभावः। इष्टानिष्टोपपत्तिषु। उपपत्तिः प्राप्तिः, तत्र नित्यं समचित्तत्वं हर्षविषादयोरभावः।। १०।।

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि।। ११।।

अनन्ययोगेन रमाब्रह्मादिस्वातंत्र्यासम्बन्धेन, तदविषयिणीति यावत्। अत एवाव्यभिचारिणी मयि भक्तिः। विविक्तदेशसेवित्वं जनसंमर्दहीनशुद्धस्थानस्थितिः।। ११।।

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा।। १२।।

अध्यात्मज्ञाननित्यत्वं आत्मान(परमात्मान) मधिकृत्य स्थिते ज्ञाने नियतत्वम्। तत्त्वज्ञानार्थदर्शनम्। अपरोक्षज्ञानार्थं शास्त्रपर्यालोचनम्। एतत् 'अमानित्वं' इत्यादिनोक्तं विंशतिधर्मजातम्। ज्ञानमिति ज्ञायतेऽनेनेति करणव्युत्पत्तया ज्ञानसाधनं प्रोक्तम्। अतोऽन्यथा यदस्ति तदज्ञानं ज्ञानसाधनं नेत्यर्थः। यद्वा ज्ञानशब्दः भावव्युत्पत्त्या संवित्परश्च। तत्त्वज्ञानार्थस्य तत्त्वज्ञानविषयस्य विष्णोर्दर्शनमपरोक्षज्ञानमित्यर्थः। एतद्भगवद्विषयापरोक्षज्ञानं ज्ञानमिति प्रोक्तम्। अतोऽन्यथा यत् तज्ज्ञानं न भवतीति। इह ज्ञानशब्दो ज्ञानतत्साधनोभयपरः। तत्त्वज्ञानार्थदर्शनमित्ययमप्युक्तदिशा शास्त्रपर्यालोचनरूपज्ञानसाधनपरः, अपरोक्षज्ञानपरश्च। ततश्चैतच्छब्देनोभयं परामृश्य ज्ञानशब्देन भावकरणोभयव्युत्पत्त्या ज्ञानसाधनत्वज्ञानत्वयोर्विधानं युक्तमिति ज्ञेयम्।। १२।।

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते।। १३।।

एवं ज्ञानं ज्ञानसाधनं चोक्त्वाऽधुना स च यो यत्प्रभावश्चेति प्रतिज्ञातज्ञेयस्वरूपं तत्प्रभावं च प्रतिज्ञापूर्वमाह– **ज्ञेयमित्यादिना।** आदरजननाय तज्ज्ञानस्य फलमाह– **यज्ज्ञात्वेति।।** 'स च य' इति प्रतिज्ञातज्ञेयस्वरूपोक्तिः– **परं ब्रह्मेति।।** नामोक्त्या तत्स्वरूपस्यावगतेः अहमेवेति वक्तव्ये 'अक्षरं ब्रह्म परमम्' (८-३) इति अष्टमोक्तदिशा ब्रह्म स्वयमेवेति सिद्धमिति भावः। स च यत्प्रभाव इत्युक्तमाह– **अनादिमदित्यादिना।।** आदिरेषामस्तीत्यादिमन्ति देहेन्द्रियादीनि। ततो बहुव्रीहिः।

प्राकृतदेहेन्द्रियगुणकर्मादिहीनमित्यर्थः। भगवान्क्षेत्रान्तर्गतो भूत्वा क्षेत्रज्ञ इत्युच्यते किमित्यतो नेत्याह— **नेति।।** तद्ब्रह्म सद्व्यक्तशब्दितकार्यजातान्तर्गतं नेत्युच्यते। असदव्यक्तशब्दितकारणान्तर्गतं नेत्युच्यते। 'व्यक्ताव्यक्तविलक्षण' इति स्मृतेः। यद्वा 'मूर्तामूर्तव्यतीतत्वान्न सत्तन्नासदुच्यते' इति स्मृत्युक्तदिशा मूर्तं न, अमूर्तं च नेत्युच्यत इति, 'नेति नेति' इत्यादिश्रुतावित्यर्थः।। १३।।

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति।। १४।।

पुनस्तत्प्रभावमाह— **सर्वत इति।।** कथं जगद्वैलक्षण्यं हरेरित्यतो वाऽऽह— **सर्वत इति।।** तत्प्रागुक्तं परं ब्रह्म सर्वतः सर्वावयवेषु पाणिपादं द्वंद्वैकवद्भावः प्राण्यङ्गत्वात्। तेन तच्छक्तिर्लक्ष्यते। पाणिपादादिशक्तिम(न्तः)त्सर्वेऽप्यवयवाः स्वस्वेतरावयवशक्तिमन्त इत्यर्थः। शुक्लकृष्णकेशावतारयोर्बलरामकृष्णयोः पाणिपादादिशक्तेर्दर्शनात्। एवं सर्वतः सर्वावयवेषु चक्षुरादिशक्तिमदित्यर्थः। सर्वतः सर्वावयवेषु श्रुतिमच्छ्रोत्रेन्द्रियशक्तिमत्। सर्वेन्द्रियाणां विषयान्कर्माणि च सर्वेन्द्रियैः वेत्ति करोति चेति यावत्। लोके जगति सर्वं वस्तु आवृत्य तिष्ठति व्याप्य वर्तते। यद्वा सर्वतः सर्वत्र देशे स्थितं तद्ब्रह्म पाणिपादाक्षिशिरःप्रभृत्यवयवोपेतं सत् लोके सर्वं वस्तु व्याप्य तिष्ठति इति। अणोरणुतरैः पाणिपादाद्यवयवोपेतैः अनन्तरूपैः सर्वत्र स्थितं सत् व्याप्तरूपेण च सर्वमपि व्याप्य वर्तते ब्रह्मेति भावः।। १४।।

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च।। १५।।

किं च सर्वेन्द्रियगुणाभासं तद्ब्रह्म सर्वाणीन्द्रियाणि गुणान् शब्दादिविषयांश्चाभासयति प्रत्याययति प्रत्येति वा सर्वेन्द्रियगुणाभासम्। भासृ दीप्तौ इत्यतः पचाद्यच्। प्राकृतानां भिन्नानां चेन्द्रियाणामभावात्सर्वेन्द्रियविवर्जितम्। असक्तं निर्लेपम्। सर्वं भुक्तं इति सर्वभुक् च। सर्वसंहर्तृ इति वा सर्वसारभोक्तृ इति वाऽर्थः। सर्वभृच्चेति पाठान्तरम्। गुणभोक्तृ च सर्वकल्याणगुणभोक्तृ चेत्यर्थः।। १५।।

बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्।। १६।।

किंच भूतानां सर्वप्राणिनां बहिरन्तश्च परं ब्रह्म तिष्ठतीत्यनुषज्यते। अन्यथाभावराहित्यादचरम्। सर्वदेशेषु चरणाद्गमनाच्चरम्। सूक्ष्मत्वादप्रतिघत्वात्तद्ब्रह्माविज्ञेयम् अग्राह्यमिंद्रियाविषयः। सर्वगतत्वाद्दूरे अंतिके समीपे च स्थितं तत्।। १६।।

अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च।। १७।।

किंच भूतेषु नानाविधप्राणिष्वविभक्तमेव विभक्तमिव स्थितम्। अज्ञानां तथा प्रतीतमिति यावत्। भूतभर्तृ भूतानां भर्तृ धारणपोषणकर्तृ तद्ब्रह्म ज्ञेयम्। ग्रसिष्णु प्रलये सर्वभक्षकम्। प्रभविष्णु सृष्टिकाले सर्वोत्पादकं च।। १७।।

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्।। १८।।

किंच तद्ब्रह्म ज्योतिषां सूर्यादीनामपि ज्योतिः प्रकाशशक्तिप्रदम्। तमसः अव्यक्तान्मृत्योः अज्ञानाद्वा परमतिक्रान्तम् उच्यते। 'तमसः परस्तात्' इति श्रुत्यादावित्यर्थः। ज्ञानं प्रकाशस्वरूपम्। ज्ञेयं स्वेन ज्ञातव्यरूपं स्वप्रकाशमित्यर्थः। जीवानां स्वप्रकाशत्वेऽपि तस्येशाधीनत्वात्। अस्य चान्यानपेक्षत्वात्। स्वकर्मकत्वस्य (क्रियात्वकर्मत्वयोरेकत्र विरोधेन) दुर्घटत्वाच्च तदुक्तिर्भगवतो महिमेति यत्प्रभाव इत्यस्योत्तरं भवतीति भावः। ज्ञानगम्यमपरोक्षज्ञानेन मुक्तौ प्राप्यम्। सर्वस्य हृदि विष्ठितं विशेषेण स्थितम्। सर्वगतत्वेन दूरस्थमन्तिके च तत्सर्वमावृत्य तिष्ठतीत्युक्तावपि हृद्यल्पदेशे स्थित्युक्तिर्युक्ता। 'ॐ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॐ' इति (१-२-७) 'ॐ अन्यभावव्यावृत्तेश्च ॐ' (१-३-१२) इत्यादिसूत्रेणाणुरूपेणावस्थितेरुक्तत्वात्। अत एव चरमित्युक्तिरप्युपपन्नेति भावः।। १८।।

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते।। १९।।

उक्तमुपसंहृत्य तज्ज्ञानं स्तौति– **इति क्षेत्रमिति।।** महाभूतानीत्यादिना क्षेत्रम्। इच्छेत्यादिना तद्विकाराश्चेत्यपि ग्राह्यम्। ज्ञानशब्दोऽत्र ज्ञप्तितत्साधनोभयपरः। 'अमानित्वम्' इत्यादिना ज्ञानसाधनस्य 'तत्त्वज्ञानार्थदर्शनम्' इत्यत्र भगवदपरोक्षज्ञप्तेश्चोक्तत्वात्। 'ज्ञेयं यत्तत्' इत्यादिना ज्ञेयं चोक्तं समासतः संक्षेपेण। मद्भावाय मयि स्थितये उपपद्यते योग्यो भवति। यद्यप्यत्र ज्ञेये ब्रह्मणि प्रतिपादिते केन साधनेनेदं बुद्ध्यारूढं भवेदित्याकाङ्क्षायां 'ज्ञेयमित्यादिकं' पूर्वमुक्त्वा 'अमानित्वम्' इत्यादिकं तज्ज्ञानसाधनं पश्चाद्वाच्यम्। तथाऽपि साधनस्येच्छादिरूपक्षेत्रविकारेष्वंतर्भावज्ञापनार्थत्वात् यत्प्रभावपदोक्तप्रेरकत्वस्यालौकिकप्रमेयस्य बुद्ध्यारोहे साधनानामप्युपयोगाच्च साधनानन्तरमेव यत्प्रभावश्चेत्यस्य वाच्यत्वात् तत्प्रसंगेन ज्ञेयस्यापि पश्चादेवोक्तिः। नन्वथाऽपि उद्देशक्रमानुसारेण 'यतश्च यदि' त्येतत्प्रथममुक्त्वा 'स च यो यत्प्रभावश्चे' त्येतत्पश्चाद्व-

क्त्यमित्येतदप्यनेनैव निरस्तम्। विकारान्तर्भावज्ञापनाय इच्छाद्युक्त्यनन्तरम् अममानित्वादेः ज्ञानसाधनस्योपोद्घातप्रक्रियया पूर्वमेव वाच्यत्वेन तदनन्तरमेवोक्तदिशा 'स च यो यत्प्रभावश्चे' त्युक्तस्य वाच्यत्वात्। बहुत्वाच्च "स च यो यत्प्रभावश्चे" त्येतदुक्त्यपेक्षया 'यतश्च यदित्ये' तदुक्तेरल्पत्वात् तत्सर्वोक्त्यनन्तरं पश्चात् 'यतश्च यदि' त्यस्योक्तिः।। १९।।

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्।। २०।।

एवमुक्तदिशा यतश्च यदिति प्रतिज्ञातप्रेरकस्वरूपस्य प्रभावोक्त्यनन्तरं वाच्यत्वसिद्धौ प्रेरकज्ञानस्य प्रेर्यज्ञानसापेक्षत्वात्प्रेरणीयं सप्रकारं पुरुषादिरूपं क्षेत्रं तावदाह— **प्रकृतिमिति।।** न चैतत् 'एतत् क्षेत्रमिति' श्लोके न प्रतिज्ञातमिति शंक्यम्। 'यादृक्चे' त्यनेन प्रतिज्ञातत्वात्। तर्हि महाभूतानीत्याद्युक्त्यवसरे प्रागेव वाच्यमिति न शंक्यम्। वक्ष्यमाणप्रेरकस्वरूपोक्त्युपयोगितयाऽपेक्षितप्रेर्यस्वरूपस्यात्रावश्यं वाच्यत्वात्प्रागप्युक्तौ गौरवापत्तेरिति भावः। एवं च प्रकृतिपदेन 'महाभूतानि' इत्यादिना प्रागुक्तपञ्चविंशतितत्त्वानि गृह्यन्ते, विकारशब्देन च प्रागुक्तेच्छादयः सर्वे प्रकृतिविकाराः गुणत्रयस्याल्पविवक्षया पृथगुपादानम्। पुरुषोऽत्र जीवः। प्रकृतिं पञ्चविंशतितत्त्वानि पुरुषं जीवं च उभावप्यनादी विद्धि। तथा प्रकृतिसंभवान्प्रधानोपादानकानिच्छादिविकारान्सत्त्वादिगुणांश्च विद्धीत्यर्थः। तथा चेश्वरातिरिक्तः सर्वोऽपि चेतनाचेतनवर्गः प्रेर्यप्रपञ्चोऽत्रोक्तो भवति। यद्वा प्रकृतिं चिदचित्प्रकृती, पुरुषं जीवं परमात्मानं च उभौ उभे चेत्यपि संगृह्यते अनादी विद्धीत्यर्थः। विकारानिच्छादीन्सत्वादिगुणांश्च प्रकृतिसंभवान् प्रकृत्युपादानकान्विद्धि। गुणानां विकारत्वेऽपीच्छाद्यपेक्षयाऽल्पविकारत्वादिच्छादीनामधिकविकारत्वविवक्षया पृथगुक्ताः ज्ञेयाः। तात्पर्यं तु प्रकृतिपदेन चिदचित्प्रकृत्योः पुरुषपदेन जीवेश्वरयोर्ग्रहणायोभावित्युक्तिरित्युक्तम्।। २०।।

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते।। २१।।

प्रकृतिसंभवत्वं विकाराणां व्यनक्ति— **कार्येति।।** कार्यं शरीरम्। कारणानीन्द्रियाणि। जीवस्य यद्देहेन्द्रियकर्तृत्वं तत्र कारणं चित्प्रकृतिरुच्यते। सुखदुःखानां भोक्तृत्वे जीवस्य प्रकृतिविकारसुखदुःखानां स्वीयतया साक्षात्काररूपे भोगे पुरुषो भगवान् हेतुरुच्यते। अत्र हरेः सर्वहेतुत्वेन जीवगतदेहेन्द्रियकर्तृत्वहेतुत्वसत्त्वेऽपि, तथा देव्याः जीवानां सुखदुःखभोगदानहेतुत्वसत्त्वेऽपि, देव्याः सुखदुःखभोगदाने

प्रवृत्तिरल्पा। कार्यकारणकर्तृत्वे भोगदानप्रवृत्त्यपेक्षयाऽधिका। अतः कार्यकारण कर्तृत्वे प्रकृतिर्हेतुरिति। पुरुषस्तु सुखदुःखभोगदानहेतुरिति विशिष्योक्तिर्युक्ता। अत एव पूर्वापरार्धयोरुच्यत इति द्विवारमुक्तिः। यद्वा कार्यकारणकर्तृत्वे देहेन्द्रियाणां परिणामक्रियायां प्रकृतिः प्रधानं हेतुरुच्यते। पुरुषो जीवः सुखदुःखानां भोक्तृत्वे अनुभवे हेतुः कर्तोच्यते इत्यर्थः।। २१।।

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान्।
कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु।। २२।।

ननु प्रकृतिकृतदेहेन्द्रियसंबंधेन सुखदुःखादिभोक्ता जीवस्तन्नियामिके देवदेव्याविति यत्तदयुक्तम्। देहादिसंबंधादेर्मिथ्यात्वादित्यतः आह– **पुरुष इति।।** पुरुषो जीवः, प्रकृतिस्थः प्रकृतिकार्यदेहादौ स्थितः प्रकृतिजान् गुणान्सुखादीन् भुङ्क्ते। हीति निर्बाधानुभवसिद्धत्वं सूचयति। तेन तद्विरोधान्न मिथ्यात्वं सुखादेरित्युक्तं भवति। एतेन 'कार्यकारणकर्तृत्व' इत्यत्र जीवदेहस्थत्वस्य, 'भोक्तृत्वे सुखदुःखानां' इत्यत्र सुखादिभोगस्योक्तेस्ताभ्यामस्य पौनरुक्त्यमिति निरस्तम्। मिथ्यात्वनिरासाय साक्ष्यनुभवविरोधं मिथ्यावादिनां दर्शयितुं प्रागुक्तस्यैवात्र पुनरभिधानात् शुद्धस्य जीवस्य प्रकृतिस्थत्वे किं कारणमित्यत आह– **कारणमिति।।** अस्य जीवस्य।।२२।।

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः।। २३।।

साध्वसाधुयोन्युत्पत्तौ सत्त्वादिगुणसंगो निमित्तमात्रकारणम्। भगवानेव तु स्वतन्त्रकारणमित्याह– **उपद्रष्टेति।।** अनुमन्ता पुनः पुनः कर्तव्यस्य विशेषेणालोचकः। यद्वा अनु स्वानुकूल्येन स्वमनोऽविक्षेपकतयेति यावत्। मन्ता (मत्याः) मतिपूर्वं इति यावत्। प्रेरयतीत्यनुमन्ता। तत्र हेतुरुपद्रष्टेति। सर्वेभ्य उपरि वर्तमानः। उत्तमः सन्निति यावत्। द्रष्टा, भर्ता सर्व(धारकः)भारकः सर्वपोषक इति यावत्। भोक्ता सर्वकर्मफलसारभुक्। महाशक्तित्वान्महेश्वरः। परमात्मा परमचेतनः। इतिशब्दो हेत्वर्थः सन्सर्वत्रान्वीयमानः अनुमन्तृत्वे उपद्रष्टृत्वाद्भर्तृत्वादित्यादिरूपेण हेत्वर्थको ध्येयः। उपद्रष्टृत्वादिहेतुभ्योऽनुमन्ता पुरुष उक्त इति। चशब्दो हेतुसमुच्चये। कोऽनुमंता पुरुष इत्यतः अस्मिन्देहेऽप्युक्त इति उक्तम्। देहस्थत्वेनोक्तश्च भगवान्स्वयमेव, 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु' इति स्वस्य देहस्थत्वेन प्रागुक्तत्वादिति भावः। एतेन यतश्च यदित्यनेन यादृग्धर्मविशिष्टाद्यत्क्षेत्रं प्रवर्तते एतन्मे शृण्विति प्राक् प्रतिज्ञातमप्युक्तं भवति। उपद्रष्टृत्वादिधर्मविशिष्टात्प्रवर्तत इति।। २३।।

य एनं वेत्ति पुरुषं प्रकृतिं च गुणैः सह।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते।। २४।।

'प्रकृतिं पुरुषं चैव विद्धि' इत्युक्तार्थे बुभुत्साऽतिशयोत्पादनाय तज्ज्ञानफलमाह– **य एनमिति।।** योऽधिकारी एनं पुरुषं जीवपराख्यद्विविधपुरुषं जडाजडाख्यद्विविधप्रकृतिं च तत्तद्गुणैः सह वेत्ति परोक्षतो विदित्वाऽपरोक्षतो जानाति स पुमान्सर्वथा वर्तमानोऽपि प्रमादादन्यायप्रवृत्तिमानपि भूयः पुनर्नाभिजायते मुक्तो भवतीत्यर्थः। तदुक्तं सूत्रे 'ॐ कामकारेण चैके ॐ' (३-४-१५) इति।। २४।।

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे।। २५।।

परमपुरुषादिदर्शने साधनमाह– **ध्यानेनेति।।** केचिच्छ्रवणमननोपेताः ध्यानेनात्मना बुद्ध्याऽऽत्मानं भगवन्तं आत्मनि देहे पश्यन्ति। अन्ये सांख्येन योगेन वेदोक्तभगवत्स्वरूपपरोक्षज्ञानेन ध्यानेन चेत्यनुषज्यते। आत्मानं पश्यन्ति। अपरे श्रवणादिहीनाः कर्मयोगेन च कर्मरूपोपायेन सांख्येन ध्यानेन चेत्यनुषज्यते। साधुकर्मानुष्ठानलब्धभगवत्प्रसादजन्यश्रवणमननध्यानैरात्मानं पश्यन्ति। ध्याने अशक्तानां सांख्यसंपादनद्वारा ध्यानसंपादनेन। तत्राप्यशक्तानां कर्मोपायेन श्रवणादिसंपादनेनात्मदर्शनमित्यवस्थाभेदमाश्रित्यायमर्थो भाष्योक्तः। तात्पर्ये तु केचिदृषयः स्वप्रतिभयाऽन्यतः श्रवणेन च हरिं ज्ञात्वा आत्मना मनसा आत्मनि हृदये आत्मानं परमात्मानं ध्यानेन पश्यंति। साक्षात्कुर्वन्ति। केचिदित्युक्त्याऽन्ये नारदाद्याः ऋषयस्तु बहिरपि पश्यन्ति इति सूचितम्। 'केचिदृषयो नारदाद्या बहिस्त्वपि' इति स्मृतेः। 'ऋषयोऽन्तः प्रकाशा' इति सूत्रभाष्योक्तश्रुतिस्तु नारदाद्यन्यविषयेति ज्ञातव्यम्। अन्ये देवास्तु सांख्येन योगेन स्वप्रतिभाख्यज्ञानरूपोपायेन ध्यानेन विनैव विष्णुप्रसादलब्धस्वप्रतिभाख्यज्ञानेन बहिरन्तश्च विष्णुं पश्यन्तीत्यर्थः। अपरे क्षत्रियवरा राजानः कर्मयोगेनाश्वमेधादिकर्मरूपोपायेन श्रवणेन स्वप्रतिभया च नित्यं भगवन्तं स्मरन्तोऽश्वमेधादियज्ञकर्मकाले यज्ञभागार्थमागतमात्मानं पश्यन्तीत्यर्थः। श्रवणप्रतिभयोरल्पत्वादत्रानुक्तिः।। २५।।

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।। २६।।

अन्ये तु मनुष्यास्तु एवं स्वप्रतिभाबलेनात्मानमजानन्तः अन्येभ्यः श्रुत्वा मत्वेत्यपि ग्राह्यम्। उपासते ध्यायन्ति। ततः पश्यन्ति च। तेऽपि च अल्पतरप्रतिभावन्तोऽपि श्रुतिपरायणाः बहुश्रवणवन्तः संतः मृत्युं संसारं अतितरन्त्येवेत्यर्थः।। २६।।

यावत्संजायते किंचित्सत्त्वं स्थावरजङ्गमम्।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ।। २७।।

कार्योपादानत्वप्रकृत्युपादानकदेहयोगित्वसर्वत्रममत्वरूपधर्मयुक्ततया प्रकृतिपुरुषेश्वरस्वरूपं पुनरप्याह— **यावदिति।।** न चाप्रतिज्ञातोक्तिदोषः, प्रकृतिपुरुषधर्मोक्तेः 'यादृक्च' इत्यत्रेश्वरधर्मोक्तेश्च 'यत्प्रभाव' इत्यत्र प्रतिज्ञातेऽन्तर्भावात्। यावत्स्थावरजङ्गमात्मकं सत्त्वं जीवजातं तत्क्षेत्रक्षेत्रज्ञसंयोगात्। चित्प्रकृतिपरमात्मनोः संयोगाज्जायते प्रादुर्भवतीति विद्धि। यद्वा 'उपद्रष्टा' इत्यादिना सदसद्योनिजन्मसु भगवानेव स्वतंत्रकारणमिति यदुक्तं तत्प्रपञ्चयति— **यावदिति।।** उक्त एवार्थः।। २७।।

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति।। २८।।

'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु' इति हरेः सर्वशरीरस्थत्वं यदुक्तं तदयुक्तम्। तथात्वेऽधिष्ठानतारतम्यात्तारतम्यं, दुःखिसहावस्थानाद्दुःखं च स्यादित्यत आह।। **सममिति।।** सर्वेषु तारतम्योपेतेषु प्राणिषु तिष्ठन्तं परमेश्वरं अचिन्त्यशक्तिकं हरिं समं न्यूनाधिकहीनं सर्वत्राशेषसद्गुणोपेतं, एवं यः पश्यति। विनश्यत्सु सुखदुःखजनिमृत्यादिदोषवत्सु भूतेषु तिष्ठन्तं अविनश्यन्तं दुःखादिदोषहीनं यः पश्यति स पश्यति। स एव यथार्थज्ञानवानित्यर्थः।। २८।।

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्।
न हिनस्त्यात्मनाऽऽत्मानं ततो याति परां गतिम्।। २९।।

साम्यादिज्ञानस्य फलमाह— **सममिति।।** सर्वत्र समवस्थितं निर्दोषाशेष- सद्गुणतया सम्यगवस्थितम् ईश्वरं समं सर्वत्र निर्दोषाशेषसद्गुणतयैकप्रकारम्। 'ॐ न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि ॐ' (२-३-११) इति सूत्रोक्तदिशा पश्यन्। आत्मना बुद्ध्या आत्मानं स्वात्मानं च न हिनस्ति। नरके न पातयति। ततो ज्ञानात्परां गतिं मुक्तिं च यातीत्यर्थः।। २९।।

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथाऽऽत्मानमकर्तारं स पश्यति।। ३०।।

नन्वीश्वरः कर्मानपेक्षयैव 'उपद्रष्टा' इत्यत्रोक्तदिशा यदि सदसद्योनिजन्मसु स्वतन्त्रकारणं, तर्हि तस्य वैषम्यादिदोषः स्यात्। कर्मापेक्षितायां स्वातन्त्र्यप्रच्युतिस्तस्य स्यात्। तस्यापि कर्त्रन्तरसत्त्वाच्च स्वातन्त्र्यहानिरेवेत्यत आह— **प्रकृत्येति।।** ल्यबन्तमे-

तत्। चशब्दात्पूर्वप्रकृतेश्वरोऽनुषज्यते। ईश्वरेणैव प्रकृत्य पूर्वतनं जीवकर्म उद्बोध्य तदनुसृत्य क्रियमाणानि सर्वकर्माणि यः पश्यति। तथाऽऽत्मानं परमात्मानम् अकर्तारं कर्तृहीनं यः पश्यति स पश्यति परमेश्वरमित्यर्थः। यद्वा 'उपद्रष्टा' इत्यत्रोक्तभगवत्स्वातन्त्र्यज्ञानस्य फलमाह— **प्रकृत्येति**।। तृतीयांतमिदम्। चशब्दात्प्रकृतेश्वरेण कर्त्रा प्रकृत्या निमित्तभूतया क्रियमाणानि सर्वशः कर्माणि यः पश्यति। तथा स्वात्मानं चाकर्तारम् अस्वतन्त्रं च यः पश्यति स पश्यति हरिमित्यर्थः। तथा च सूत्रं 'ॐ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॐ' (२-३-४२) इति। कर्तृराहित्यात्स्वातन्त्र्यम्। स्वाधीनसत्ताकतत्तदीयपूर्वकर्मापेक्ष्य सर्वं करोतीति न वैषम्यादिदोष इति भावः। तदुक्तं 'ॐ वैषम्यनैर्घृण्ये' ॐ (२-१-३५) न सापेक्षत्वात्तथा हि दर्शयति इति।। ३०।।

यदा भूतपृथग्भावमेकस्थमनुपश्यति।
तत एव च विस्तारं ब्रह्म संपद्यते तदा।। ३१।।

न केवलं भगवतः सर्वप्रेरकत्वादिज्ञानमात्रेणालम्। किंतु तस्य 'ॐ अवस्थितेरिति काशकृत्स्नः ॐ' (१-४-२३) इति सूत्रोक्तदिशा सर्वाधारत्वाद्यपि ज्ञातव्यमित्युच्यते— **यदेति**।। भूतपृथग्भावं भूतानां जीवानां पृथग्भूतं भेदं एकस्थमेकस्मिन्विष्णौ स्थितम्। किमुक्तं भवति विष्णुनाऽन्योन्यं च पृथग्भूतं भूतग्राममेकविष्ण्वाश्रितं यदानुपश्यतीत्युक्तं भवति। तत एव विष्णुत एव विस्तारमुत्पत्तिं च भूतानामित्यन्वेति। अनु तारतम्येन पश्यति। तदा ब्रह्म संपद्यते प्राप्नोति।। ३१।।

अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते।। ३२।।

ननु सर्वभूतेषु तिष्ठतो न विनाश इत्ययुक्तम्। शरीरसंबंधे व्ययादेरावश्यकत्वादित्यतो हेतूक्तिपूर्वं व्ययलेपाद्यभावमाह— **अनादित्वादिति**।। शरीरस्थोऽप्ययं परमात्मा अनादित्वान्निर्गुणत्वात्सत्त्वादिगुणहीनत्वाच्चाव्ययः। नाशादिव्ययहीनः। चिन्तासंतापदुःखादिना न लिप्यते न संबध्यते। लौकिकक्रियाविलक्षणक्रियावत्त्वान्न करोति च। अनादित्वहेतोर्भावन्वे सतीति विशेषणान्न प्रागभावे व्यभिचारः शंक्यः। यद्वा 'सर्वं खल्विदं ब्रह्म' (छा० ३-१४-१) 'पुरुष एवेदं सर्वम्' (मुं० २-१-१०) इत्यादिना विष्णोः सर्वचिदचिदात्मकत्वप्रतीतेर्वाद्यन्तरैस्तथोक्तेश्च कथं भूतानां विष्णोः पृथग्भाव इत्यतः श्रुतितात्पर्यापरिज्ञानादिप्राप्तमद्वैतं सहेतुकं निराह— **अनादित्वादिति**।। अयं परमात्मा, शरीरस्थोऽपि शरीराभिमानितया तत्स्थसुखदुःखादिभोक्तृतया शरीरस्थोऽत्र जीवोऽभिमतः। शरीरस्थोऽपि न भवति। जीवात्मकोऽपि न भवति।

किमु वाच्यं जडात्मको न भवतीति अपेरर्थः। कुतः अनादित्वात्। देहयोगनिमित्तादिमत्त्वहीनत्वादिति यावत्। सात्वादिगुणहीनत्वाद्देहव्ययनिमित्तव्ययहीननत्वात्। करोति, सर्वकर्तृत्वान्न लिप्यते सर्वकरणनिमित्तफलाभोक्तृत्वाच्च। जीवस्य चोक्तहेतुपञ्चकविपर्ययवत्त्वादिति भावः। ईश्वरः करोति न लिप्यते। जीवस्तु 'परात्तु तच्छ्रुतेरिति' (२-३-४१) सूत्रोक्तदिशा कर्तृशक्तेरपीशाधीनतया स्वातन्त्र्याभावान्न करोति। पराधीनकर्तृतया लिप्यते चेति योजना।। ३२।।

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते।। ३३।।

परमात्मनो लेपाभावं दृष्टान्तेनोपपादयति— **यथेति**।। पङ्कादिसर्वगतमप्याकाशं सौक्ष्म्यादप्रतिघत्वान्नोपलिप्यते। यथा तथा सर्वत्र नीचोच्चादिदेहे स्थितोऽप्यात्मा परमात्मा नोपलिप्यते।। ३३।।

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत।। ३४।।

यत्क्षेत्रज्ञत्वविशिष्टतया भगवज्ज्ञानार्थं क्षेत्रादिकमुक्तम्। तत्क्षेत्रज्ञत्वं दृष्टान्तेन व्यनक्ति— **यथेति**।। यथैको रविः इमं लोकं कृत्स्नं प्रकाशयति। तथैकः क्षेत्री क्षेत्रस्थः परमात्मा कृत्स्नं क्षेत्रं चेतनाचेतनरूपं प्रकाशयति।। ३४।।

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्।। ३५।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां क्षेत्रक्षेत्रज्ञयोगो नाम त्रयोदशोऽध्यायः।। १३।।

फलोक्त्याऽध्यायार्थमुपसंहरति— **क्षेत्रेति**।। क्षेत्रक्षेत्रज्ञयोरेवमुक्तप्रकारेणान्तरं भेदं ज्ञानचक्षुषा विवेकदृष्ट्या ये विदुः। तथा भूतेभ्यः प्रकृतेश्च जीवानां मोक्षो येनेति वा। भूतानां जीवानां अचेतनप्रकृतेः सकाशान्मोक्षो येनेति वा। भूतानां जीवानां अचेतनप्रकृतेः। सकाशान्मोक्षो येनेति वा। तदभिमानित्वादिकं प्रागुक्तमोक्षसाधनं च ये विदुः ते ब्रह्म यान्तीति।। ३५।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे राघवेन्द्रयतिकृते त्रयोदशोऽध्यायः।। १३।।

चतुर्दशोऽध्यायः

श्रीभगवानुवाच-

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः।। १।।

।। ॐ ।। 'बुद्धिर्योगे त्विमां शृण्विति' (२-३९) द्वितीये प्रतिज्ञाय आषष्ठसमाप्तेः कामादिवर्जनादीतिकर्तव्यतासहितं कर्म ध्यानलक्षणं ज्ञानसाधनमुक्तम्। तत्रेतिकर्तव्यतांशं उत्तराध्यायपञ्चकेन प्रपञ्चयतीति प्रघट्टार्थः। तत्र बन्धप्रकारे ज्ञाते सत्येव तन्मोचनसाधनस्य तदितिकर्तव्यस्य चानुष्ठानाय तत्प्रपञ्चनं युज्यते। बन्धश्च "कारणं गुणसंगोऽस्य" (१३-१२) इति पूर्वाध्यायोक्तदिशा त्रिगुणात्मकः। अतो 'यावत्संजायते' (१३-२६) इत्यादिना पूर्वाध्यायोक्तक्षेत्रक्षेत्रसंयोगहेतुकप्राणिजननविवरणपूर्वकं त्रिगुणविकारस्थितिं तदत्ययोपायं च दर्शयत्यस्मिन्नध्याये। 'कार्यते ह्यवशः कर्म' (३-५) इति तृतीयाध्याये संक्षेपेण त्रैगुण्यस्योक्तत्वेऽपीह तस्य विविच्य कीर्तनमिति ज्ञेयम्। श्रोतुरादरजननाय वक्ष्यमाणमर्थं प्रतिज्ञाय स्तौति– **परमिति द्वयेन**।। परमन्यद्भूयः पुनः प्रवक्ष्यामि। तत्किमित्यत उक्तम्– **ज्ञानानामिति**।। कर्मणि ल्युट्। ज्ञातव्यानां मध्ये उत्तमं ज्ञानं ज्ञातव्यम्। यज्ज्ञात्वा मुनयो मननशीलाः सर्वे इतः संसारात्परां सिद्धिं मोक्षं गताः प्राप्ताः।। १।।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।। २।।

इदं ज्ञानं वक्ष्यमाणार्थज्ञानमुपाश्रित्य संपाद्य मम साधर्म्यं सारूप्यमागताः प्राप्ताः। शिष्टं व्यक्तम्।। २।।

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
संभवः सर्वभूतानां ततो भवति भारत।। ३।।

प्रतिज्ञातार्थमाह— **ममेति**।। महद्ब्रह्म महती चित्प्रकृतिः मम योनिः भार्या तस्मिन्ब्रह्मणि चित्प्रकृतौ गर्भं दधामि। चतुर्विंशतितत्त्वांशयुतान् जीवान्स्वोदरस्थान् रेतोरूपेण निर्वास्य चित्प्रकृत्युदरे निक्षिपामीत्यर्थः। ततस्तत्र निक्षेपाद्भूतानां प्राणिनां देहयोगरूपसंभवो जन्म भवति। 'ॐ ज्ञोऽत एव ॐ' (२-३-१८), 'ॐ युक्तेश्च ॐ' (२-३-१९) इति सूत्रकृदुक्तेः।। ३।।

सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता।। ४।।

न केवलमादिसर्ग एवानयोः कारणत्वं किंतु सर्वदेत्याह— **सर्वेति**।। देवमनुष्यतिर्यगादियोनिषु याः मूर्तयः कार्यव्यक्तयः संभवन्ति तासां महद्ब्रह्म महालक्ष्मीः योनिः क्षेत्ररूपं कारणम्। अहं बीजप्रदः गर्भाधानकर्ता पिता।। ४।।

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।। ५।।

एवं 'सत्त्वं रजस्तम इति' 'यावत्संजायत' (१३-२३) इत्युक्तं श्लोकद्वयेन विवृत्येदानीं यो हि बद्धोऽस्मीति जानाति स एव तन्निवृत्तिसाधनं विजिज्ञास्य ज्ञात्वाऽनुतिष्ठति। अतो बन्धोच्छेदसाधना(य)नुष्ठानाय तत्साधनज्ञापनार्थं जिज्ञासामुत्पादयितुं गुणत्रयकृतबन्धप्रकारं तावदाह— **सत्त्वमिति**।। प्रकृतिसंभवाः त्रिगुणात्मकजडप्रकृतितः संभवन्तस्तदंशभूताः सत्त्वं रजस्तम इति गुणाः तथा प्रकृतिसंभवाः चित्प्रकृतितः सृष्टिकाले विभज्यमानाः सद्गुणत्वसृष्ट्यादिरञ्जनकर्तृत्वजीवग्लपनहेतुत्वनिमित्तैः क्रमात्सत्त्वरजस्तमश्शब्दिताः श्रीभूदुर्गाख्याः गुणाः क्रमाद्गुणत्रयाभिमानिन्यः तिस्रो देव्यश्च देहे स्थितमव्ययं स्वरूपतो व्ययहीनं जीवम्। जात्येकवचनम्। जीवजातं निबध्नन्ति। सर्वासां सर्वजीवबन्धकत्वेऽपि सत्त्वमानिनी श्रीः देवबन्धिका रजोऽभिमानिनी भूर्मनुष्यबन्धिका तमोऽभिमानिनी दुर्गा दैत्यबन्धिकेति विशेषो ज्ञेयः। अत्र देह इत्युक्तिर्भूतपूर्वगत्या मुक्तानामपि देहित्वात्तद्व्यावृत्त्यर्था।। ५।।

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ।। ६।।

श्रीभूदुर्गाभिः क्रियमाणं देवादित्रितयविषयबन्धनप्रकारं विविच्याह— **तत्रेत्यादित्रयेण**।। तत्र तेषु गुणेषु तासु देवीषु सत्त्वं सत्वाभिमानिश्रीतत्त्वं निर्मलत्वात् अनामयं न विद्यते आमयो व्याध्याद्युपद्रवो यस्मात्तत् तच्च प्रकाशकं तत्त्वज्ञानोत्पादकं सत् सुखसङ्गेन तत्त्वज्ञानसङ्गेन च देवान्बध्नाति।। ६।।

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्।। ७।।

तृष्णा नाम इदं मे भूयादित्याशा। सङ्गो वस्तुष्वासक्तिः। तयोः समुद्भवो यस्मात्तत्। रजोभिमानिनी भूदेवी भूतत्त्वं च रागात्मकं सृष्ट्यादिरञ्जनस्वरूपं विद्धि। तद्द्विविधं रजः। कर्मयोगेन देहिनं मानुषं जीवं बध्नाति।। ७।।

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत।। ८।।

अज्ञानं जायते यतस्तदज्ञानजं तमस्तमोऽभिमानिनी दुर्गा, तत्त्वं च, सर्वदेहिनां मोहनं मिथ्याज्ञानजनकं विद्धि। तद्द्विरूपं तमः प्रमादादिभिर्दैत्यजनं निबध्नाति।। ८।।

सत्त्वं सुखे संजयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत।। ९।।

सत्त्वादीनां सुखादिसंपादनेनैव बन्धकत्वमिति नियमं द्रढयति— **सत्त्वमिति।।** सत्त्वं सत्त्वाभिमानिनी श्रीश्च सुखे सुखविषये संजयति। प्रवर्तयतीत्यर्थः। रजः रजोऽभिमानिनी भूदेवी च कर्मविषये संजयति। तमस्तु तमोऽभिमानिनी दुर्गा च ज्ञानमावृत्य मनसस्तत्त्वज्ञानशक्तिं प्रतिबध्य प्रमादे अधर्मे अधर्मबुद्ध्यादिरूपे संजयति। उत शब्दादालस्यादिग्रहः।। ९।।

रजस्तमश्चाभिभूय सत्त्वं भवति भारत।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा।। १०।।

ननु त्रयाणां सर्वबन्धकत्वसाम्यात्कथं कस्यचिदेव गुणस्य कार्यं दृश्यते इत्यतः उत्कटत्वानुत्कटत्वाभ्यामिति भावेनाह— **रज इति।।** ईश्वरेच्छया सत्त्वमुत्कटं सत् रजस्तमश्चाभिभूय स्वकार्यदक्षं भवति। रजस्तथोत्कटं सत् तमः सत्त्वं चाभिभूय स्वकार्यदक्षं भवति। तमश्चोत्कटं सत् रजः सत्त्वं चाभिभूय स्वकार्यकारि भवति इत्यर्थः। अभिभवशब्दितकार्यशक्तिप्रतिबन्धो गुणानामेव। देवानां त्वौदासीन्यमेवेति ज्ञातव्यम्।। १०।।

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत।। ११।।

केन लिंगेन सत्त्वादिवृद्धिर्ज्ञेयेत्यत आह— **सर्वेत्यादित्रयेण।।** अस्मिन्देहे सर्वद्वारेषु क्षेत्रादिषु ज्ञानं शब्दादिज्ञानात्मकः प्रकाशः। उत शब्दात्सुखादि चोपजायते यदा तदा सत्त्वं विवृद्धमिति विद्याज्जानीयात्।। ११।।

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ।। १२।।

लोभो धनादेरत्यागेच्छा। प्रवृत्तिर्व्यर्थोद्योगः। काम्यकर्मणामारम्भः। अशमः चित्तस्यानुपरतिः। अप्राप्ताभिलाषः स्पृहा। एतानि विवृद्धे रजसि जायन्ते। एतै रजोवृद्धिर्ज्ञेयेति भावः।। १२।।

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन।। १३।।

अप्रकाशः क्षेत्रादिषु शब्दादिज्ञानाभावः। अप्रवृत्तिरनुद्यमः। प्रमादोऽनवधानम्। मोहो विपर्ययः। एतानि तमसि विवृद्धे जायन्ते। एतैर्लिंगैस्तमोविवृद्धिर्ज्ञेयेति भावः।। १३।।

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते।। १४।।

सत्त्वादिगुणवृद्ध्यवस्थायां मृतानां गतिभेदमाहा— **यदेति द्वयेन।।** यदा सत्त्वे विवृद्धे देहभृत्प्रलयं याति म्रियते तदोत्तमविदां विष्णुज्ञानिनाम् अमलान्निर्दोषान्लोकान्देहान्प्रतिपद्यते। सात्त्विककुले जायत इत्यर्थः।। १४।।

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते।
तथा प्रलीनस्तमसि मूढयोनिषु जायते।। १५।।

रजसि प्रवृद्धे प्रलयं गत्वा मृत्वा कर्मसङ्गिषु काम्यकर्मिणां कुले जायते। तथा तमसि प्रवृद्धे प्रलीनो मृतः मूढयोनिषु दैत्यानां कुलेषु जायते।। १५।।

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम्।। १६।।

सात्त्विकादिकर्मणां फलमाह— **कर्मण इत्यादिद्वयेन।।** विद्वत्कुलप्रसूतेन सुष्ठु कृतस्य कर्मणः सात्त्विकं निर्मलं दुःखगन्धहीनं फलमाहुः। रजसो राजसकर्मणस्तु दुःखं दुःखमिश्रं सुखमाहुः। तमसस्तु तामसकर्मणः अज्ञानम् अज्ञानकार्यं च फलमाहुः।। १६।।

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च।। १७।।

निर्मलत्वादिफलं च किमित्यतो विविच्याह— **सत्त्वमित्यादिना।।** ज्ञानं परापरतत्त्वविषयम्। लोभः स्वर्गादिविषयासक्तिः। भवत एवेत्यन्वयः। अज्ञानं च भवतीत्यर्थः।। १७।।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः।। १८।।

ज्ञानलोभप्रमादादेः सत्वादिगुणेभ्यः साक्षाज्जन्यत्वेऽपि तस्य स्वरूपतोऽफलत्वात्तज्जन्यफलान्याह— **ऊर्ध्वमिति।।** सत्त्वस्थाः सात्त्विकाः ज्ञानेनोर्ध्वं जन आदिलोकं गच्छन्ति। राजसाः काम्यकर्मिणः। मध्ये स्वर्गादौ तिष्ठन्ति। जघन्यगुणस्तमः तद्वृत्तिस्तत्परिणामाज्ञानं तन्निष्ठास्तद्वन्त इत्यर्थः अधो निरयं गच्छन्ति।। १८।।

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति।। १९।।

एवं त्रयो गुणा विविच्योक्ताः। तेषां जगद्बन्धकत्वं तेभ्यः साक्षात्परंपरया च जन्यफलानि चोक्तानि। एवं त्रैगुण्यस्य 'कार्यते ह्यवश' (३-५) इत्यत्र संक्षेपेणोक्तस्येह विविच्य कीर्तने कृते सति तर्हि गुणा एव सर्वोत्तमाः न तु ततोऽन्यः सर्वोत्तमोऽस्तीति शंका स्यात्तां निराकरोति— **नान्यमिति।।** द्रष्टा जीवः यदा गुणेभ्योऽन्यं कर्तारं परिणामिकर्तारं नानुपश्यति। गुणेभ्यश्च परं स्वतन्त्रं परमात्मानं वेत्ति स ज्ञानी मद्भावं ज्ञानानन्दात्मिकां मयि स्थितिम् अधिगच्छति प्राप्नोति। यद्वा एतेभ्यो गुणेभ्योऽन्यं कर्तारम् मीशं यदाऽनुपश्यति। तदा द्रष्टैव ना। नृशब्दोऽयं पुरुषः, अन्यथा पशुः। न केवलं गुणेभ्योऽन्यत्वेन कर्तारं पश्यन् ना पुरुषः किंतु गुणेभ्यः परमुत्तमम् उत्तमत्वेनापि पश्यन्पुरुषः। कुतः स एवं पश्यन्यस्मान्मद्भावमधिगच्छति अत इति।। १९।।

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते।। २०।।

एवं सुखदुःखादिरूपबन्धस्य गुणत्रयनिबन्धनत्वात्तदत्यये सत्येव बन्धहानिर्नान्यथेत्याह— **गुणानिति।।** तत्तद्गुणपरिणामिदेहेषु प्रकटीभूतान् त्रीन् गुणानतीत्यैव जन्मादिभिर्विमुक्तोऽमृतमश्नुते परं ब्रह्म प्राप्नोति।। २०।।

अर्जुन उवाच-

कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते।। २१।।

गुणानतीत्येत्युक्ते सति पृच्छति– **कैरिति।।** एतान्सर्वबन्धकान् सत्त्वादिगुणानतीतोऽतिक्रान्तः पुमान्कैर्लिंगैर्लक्षणैर्युक्तो भवति। हे प्रभो, किमाचारः कीदृशाचारवान्। कथं केनोपायेनैतान् त्रीन् गुणानतिवर्तते।। २१।।

श्रीभगवानुवाच-

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति।। २२।।

इति पृष्टो भगवानुत्तरमाह– **प्रकाशं चेत्यादिना।।** सत्त्वादयो गुणा हि द्विविधाः, स्थूलाः सूक्ष्माश्च। स्थूलेभ्यो लौकिकाः प्रकाशप्रवृत्तिमोहाः जायन्ते। सूक्ष्मेभ्यस्तु परमेश्वरादिविषयाः। तत्राद्येभ्यः, सत्त्वादिगुणेभ्यः क्रमाज्जातं प्रकाशं प्रवृत्तिशब्दितमुद्योगं मोहशब्दितमज्ञानं चेत्येतानि संप्रवृत्तानि प्रायो न द्वेष्टि। निवृत्तानि च न काङ्क्षति। गुणातीत इत्यनुषज्यते। द्वितीये तु विष्णुविषयप्रकाशं प्रवृत्तिं चेच्छति मोहं च द्वेष्टीत्यर्थः। यद्वा पुरुषान्तरे स्थितप्रकाशादिसाधुगुणजातानि संप्रवृत्तानि न द्वेष्टि। मोहाद्यसाधुधर्मजातं निवृत्तं न काङ्क्षतीत्यर्थः। परस्येष्टानिष्टहानिप्राप्ती नेच्छति गुणातीत इति भावः।। २२।।

उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते।। २३।।

एवं कैर्लिंगैरिति प्रश्नस्योत्तरमुक्त्वा किमाचार इत्यस्योत्तरमाह– **उदासीनवदिति।।** यो गुणातीतः पुमानुदासीनवदासीनः। न तूदासीन एव, वैष्णवधर्मानुष्ठानात्। गुणैः सत्त्वादिभिर्न विचाल्यते। तत्कृतविकारं न प्राप्नोति। गुणाः सत्त्वादयः परमेश्वरेच्छया प्रवर्तन्ते न स्वतंत्रा इत्येवं योऽवतिष्ठति वेत्ति। स नेङ्गते गुणकृतावैष्णवकर्मकरणाय न चेष्टत इति। वैष्णवान्येव कर्माण्याचरति नान्यानीति तदाचार इति भावः।। २३।।

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः।। २४।।

आचारान्तरं चाह– **समेति।।** प्रायेण हेयतया दुःखसमं वैषयिकं सुखं यस्य स समदुःखसुखः। गुणातीत इत्यनुषज्यते। स्वस्थः प्रायेण निर्विकारः। हेयत्वेन लोष्टाश्मसमं काञ्चनं यस्य स समलोष्टाश्मकाञ्चनः। प्राय इति सर्वत्र योज्यम्। हेयत्वेनाप्रियतुल्यं प्रियं यस्य स तुल्यप्रियाप्रियः। हेयत्वेन निन्दया तुल्या आत्मनः स्वस्य संस्तुतिर्यस्य स तथा। समत्वादिकं केन स्यादित्यत उक्तं– **धीर इति।।** धैर्येणेत्यर्थः। यद्वा विष्णुभजनादिविषये समदुःखसुख इत्यादि योज्यम्। किमुक्तं भवति। विष्णुभजनादौ दुःखसत्त्वे तत्त्यागे सुखसत्त्वेऽपि विष्णुभजनादिकं सममेकप्रकारमेव कार्यमित्युक्तं भवति। एवमग्रेऽपि। अनुष्ठाने लोष्टाश्माद्यनभिमतप्राप्तिः। तत्त्यागे काञ्चनाद्यभिमतं प्रयच्छतीति विष्णुभजनादिकं न त्याज्यम्। लौकिकपुमर्थप्राप्तिहानावपि विष्णुभजनादि न त्याज्यमित्यर्थः। अनुष्ठानेऽननुष्ठाने प्रियाप्रिययोः प्राप्तावपि विष्णुभजनादौ तुल्य एव। सदाऽनुष्ठेयमेवेत्यर्थः। तथाऽनुष्ठानाननुष्ठानयोः क्रमान्निन्दात्मस्तुत्योः प्राप्तौ सत्यामपि विष्णुभक्त्यादौ तुल्य एव न त्याज्यं विष्णुभक्त्यादीत्यर्थः। तत्र हेतुर्धीरः। धीमान्विष्णुमाहात्म्यज्ञानवान्स्वस्थः विष्णुधर्मादचल इति।। २४।।

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते।। २५।।

तथा मानापमानयोः प्राप्तावपि विष्णुभक्त्यादौ तुल्य एव। न त्याज्यं तदित्यर्थः। कृतावकृतौ चारिपक्षमित्रपक्षयोः सत्त्वेऽपि विष्णुभक्त्यादि कार्यमेवेत्यर्थः। पूर्वं 'नेङ्गत' इति सामान्यतोऽवैष्णवकर्मारम्भत्यागोक्तावपि प्रयोजनविशेषापेक्षयाऽपि नावैष्णवकर्मारम्भवानित्याह– **सर्वारम्भपरित्यागीति।।** केनचित्प्रयोजनेनाप्यवैष्णवसर्व कर्मारम्भमकुर्वन्नित्यर्थः। यद्वा 'नेङ्गत' इत्यल्पावैष्णवकर्मत्यागः, अत्र तु अतिदीर्घावैष्णवकर्मत्याग इति न पुनरुक्तिः।। २५।।

मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते।। २६।।

एवं गुणातीतलक्षणम् आचारं चोक्त्वा कथं 'गुणानतिवर्तत' इति प्रश्नस्योत्तरमाह– **मां चेति।।** अव्यभिचारेण भक्तियोगेन नित्यभक्त्याख्योपायेन मां च सेवते। गुणान्सत्त्वादिगुणैः तदभिमानिश्रीदेव्यादिभिः कृतबन्धं समतीत्य ब्रह्मभूयाय। ब्रह्मभूयाय। ब्रह्मशब्दोऽत्र चित्प्रकृतिपरः। चित्प्रकृतिवद्भूयं भवनं ब्रह्मभूयम्। सा यथा विष्णुप्रिया तथा गुणतीतोऽपि विष्णुप्रियो भवतीत्यर्थः। यद्वा ब्रह्मणि चित्प्रकृतौ भूयाय भावाय चित्प्रकृतिप्राप्तये कल्पते शक्तो भवति।। २६।।

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च।। २७।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु प्रकृतिगुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः।।

ननु गुणातीतस्य भगवत्प्राप्यादिकमेव वाच्यम्। लक्ष्मीप्राप्तिः किमर्थमुच्यते इत्यतस्तत्प्राप्तौ मत्प्राप्तिरेव भवति। तस्याः मत्स्थत्वादिति भावेनाह— **ब्रह्मण इति।।** ब्रह्मणो महालक्ष्म्याः अव्ययस्यामृतस्य च मुक्तवर्गस्य शाश्वतस्याक्षयफलस्य निष्काम-धर्मस्य एकान्तिकस्य अस्मादिदमधिकमिति गणने एकमेवान्ते यस्य तदैकान्तिकं तस्य दुःखासंभिन्नस्य सुखस्य मोक्षस्येत्यर्थः। प्रतिष्ठा आधारः। अतो मदवियोगिनीं लक्ष्मीं प्राप्तो मामेव प्राप्तो भवति। गुणातीतो लक्ष्मीसमीपं प्राप्य तदनुगृहीतो हरिं पश्चादाप्नोतीति परंपराद्योतनायैवमुक्तिरिति ज्ञेयम्।। २७।।

।। ॐ तत्सदिति श्रीमद्गीतार्थसङ्ग्रहे श्रीमद्राघवेन्द्रयतिकृते चतुर्दशोऽध्यायः।।

पञ्चदशोऽध्यायः

श्रीभगवानुवाच-

ऊर्ध्वमूलमधश्शाखमश्वत्थं प्राहुरव्ययम्।
छन्दान्सि यस्य पर्णानि यस्तं वेद स वेदवित्।। १।।

।। ॐ।। त्रयोदशाध्याये संसारहेतुभूतं प्रकृतिमहदहंकारादितत्त्वजातरूपं क्षेत्रशब्दितं जगत्स्वरूपमुक्तम्। 'य एनं वेत्ति पुरुषं' (१३-२६) इत्यादिना भगवदादिज्ञानरूपः तदत्ययोपायश्चोक्तः। तद्‌द्वयमत्र दर्शयति। ननु पूर्वाध्याय एव तद्‌द्वयं दर्शितमिति चेन्न। तत्र संसारहेत्वेकदेशगुणानामेव प्रवृत्तिर्दर्शिता। अत्र पुनः समग्रं संसारहेतुप्रकृत्यादिजगत्स्वरूपं प्रदर्श्य तदत्ययेच्छामुत्पाद्य तत्साधनजिज्ञासुं प्रति प्रागुक्ततदत्यय(साधनं प्रपञ्चयति)साधनप्रपञ्चनात्। अत एव पूर्वानन्तर्यमस्य। तदत्ययसाधनप्रपञ्चनं प्रसंगादेव भगवन्महिमानं च दर्शयतीति ज्ञेयम्। जगत्स्वरूपं तावदाह— **ऊर्ध्वेत्यादिसार्धश्लोकद्वयेन।** ऊर्ध्वशब्द उन्नतवाची सन् विष्णुचिदचित्प्रकृतिपरोऽत्र ज्ञेयः। विष्णोः सर्वोत्तमत्वात् परतन्त्रेषु चित्प्रकृतेः सर्वोत्तमत्वादचित्प्रकृतेरचेतनेषूत्तमत्वात्। ऊर्ध्वाः विष्णुचिदचित्प्रकृतयो वृक्षस्य मूलानीव मूलानि यस्य सविकाराव्यक्तादिप्रागुक्तपञ्चविंशतितत्त्वात्मकस्य जगदाख्यवृक्षस्य तमूर्ध्वमूलम्। श्व एकरूपेण न तिष्ठतीति व्युत्पत्त्या अश्ववच्चंचलत्वेन तिष्ठतीति वाऽश्वत्थनामकम्। 'सुपि स्थ' इति कः, 'आतो लोप इटिचे'त्याकारलोपः। तस्य तकारः। जगदाख्यं चिदचिदात्मकं वृक्षम्। तत्रायं विवेकः। प्रसिद्धवृक्षस्य धरादेवीवत् विष्णुर्जगद्वृक्षस्य पृथङ्मूलम्। अचित्प्रकृतिः सत्त्वादित्रिगुणात्मिका वृक्षस्य मृद्वत्परिणामितया मूलम्। त्रिमूलो हि जगद्वृक्षो जडप्रकृतिरपि त्रिगुणात्मकत्वान्मूलत्रयात्मना त्रिभिर्गुणैः परिणमते। चित्प्रकृतिस्तु तदधिष्ठातृत्वान्मूलभागवज्ज्ञातव्येति। अधःशब्दो नीचवाची। विष्ण्वादिप्रागुक्तत्रितयापेक्षयाऽधः नीचाः पञ्चभूतसहिताः महदहंकारबुद्ध्योऽष्टौ पदार्थाः साभिमानिनः शाखा इव शाखाः यस्य तथा तम्। अव्ययं सर्वथाऽनुच्छिद्यमानम्। पूर्वकल्पे यथा

स्थितं तथैव कल्पान्तरेऽपि स्थितं (स्थितं तथैव) प्रवाहतोऽनादिनित्यमिति यावत्। प्राहुः प्राज्ञा इत्यर्थः। लोके पर्णोत्पत्तावेव फलोदयदर्शनात्, छन्दसां काममोक्षरूपफल-हेतुत्वात्, यस्य जगदाख्यवृक्षस्य छन्दांसि वेदवाक्यजातानि अभिमानिसहितानि पर्णानीव पर्णानि आहुः। एतेन जगद्वृक्षः काममोक्षरूपद्विफल इत्युक्तं भवति। यस्तं जगद्वृक्षं वेद स वेदवित् वेदार्थज्ञ इत्यर्थः।। १।।

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके।। २।।

तस्य जगदाख्यवृक्षस्य शाखाः शाखास्थानीयाः महदाद्याः अष्टौ पदार्थाः चिद-चिद्रूपाः, अधः स्वापेक्षयाऽप्रकृष्टकार्यभूतशरीरादौ स्वापेक्षयोत्कृष्टोर्ध्वशब्दोक्ते कारणभू-ताव्यक्ते च सूक्ष्मरूपेण प्रसृताः व्याप्ताः। किंरूपाः शाखा इत्यत उक्तं— **गुणप्रवृद्धा इत्यादि।।** गुणैः सत्त्वादिभिः प्रवृद्धाः गुणानामर्वाचीनमूलत्वात्तादृशमूलैरेव प्रवृद्धे वृक्षे शाखानां प्रवृद्धिर्दृष्टेति भावः। विषयप्रवालाः। तात्कालिकसुखहेतुत्वसाम्यात् शब्दाद्याः विषया एव प्रवालाः पल्लवा यासां ताः विषयप्रवालाः। मूलानि ऊर्ध्वपदेन प्रकृतानि विष्णो रूपाणि जडाजडप्रकृती सत्त्वरजस्तमांसि च अधः जगदाख्यवृक्षस्य अधोभागेषु च शाखास्वपीति यावत्। अनुसन्ततानि व्याप्तानि। कीदृशानि मूलानीत्यत उक्तं— **कर्मानुबन्धीनीति।।** मनुष्यलोके कर्माणि अपेक्ष्य फलदातृत्वात्कर्मानुबन्धीनि इति। तथा चोक्तम्— 'ब्रह्मास्य पृथङ्मूलं, प्रकृतिः समूलं, सत्त्वादयोऽर्वाचीनमूलं, भूतानि शाखाः, छन्दांसि पत्राणि, देवनृतिर्यञ्चश्च शाखाः, पत्रेभ्यो हि फलं जायते। मात्राः शिफाः मुक्तिः फलममुक्तिः फलम्। मोक्षो रसोऽमोक्षो रस' (भाल्लवेयशाखायां) इत्यादिश्रुतेः।। २।।

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रविष्टः।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा।। ३।।

अस्य जगद्वृक्षस्य रूपं यथास्थितं तथेह लोके नोपलभ्यते विकारित्वादिति भावः। जगतो जन्मसंहारकर्तृत्वहेतुनाऽऽद्यन्तपदोक्तो विष्णुः संप्रविष्टश्च जगद्वृक्ष-मनुप्रविष्टोऽपि नोपलभ्यते। 'नान्तो न चादिः न च संप्रविष्टः' उपलभ्यत इति वाक्य-त्रयेणानुपलम्भोक्तिरादरार्था। अस्त्वेवं जगद्वृक्षस्वरूपं ततः किमित्यत आह— **अश्वत्-थमिति।।** सुविरूढमूलं प्रबलविष्ण्वादिबहुमूलकं एनं प्रागुक्तम् अश्वत्थनामकं जगद्वृ-क्षमसङ्गशस्त्रेण सङ्गराहित्यसहितेन ज्ञानासिना छित्वा मूलभूतो विष्णुः प्रकृत्यादिज-

गतो विलक्षणः जगद्भावान्तरभेदयुक्तं परतन्त्रं प्रवाहतोऽव्ययमित्यादिरूपेण विविच्य ज्ञात्वेत्यर्थः। उक्तज्ञानरूपछेदनं तस्य कार्यमिति भावः।। ३।।

ततः परं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी।। ४।।

ततः परं परापरतत्त्वविषयविमर्शादनन्तरं तत् ऊर्ध्वादिपदेन प्रकृतं ब्रह्म परिमार्गितव्यमन्वेषणीयं श्रवणादिना विषयीकर्तव्यम्। जगद्वैलक्षण्यज्ञाने सत्येव तत्स्वरूपमन्वेष्टुं शक्यत इति भावः। यस्मिन् गताः भूयः पुनर्न निवर्तन्ते न गर्भयातनां प्राप्नुवन्ति तदिति पूर्वेणान्वयः। जगद्वृक्षच्छेदनोपायमाह— **तमेव चेति।।** येयं पुराणी चिरन्तनी संसारप्रवृत्तिः यतः प्रसृता विस्तृता तमेव चाद्यं प्राथमिकं पुरुषं विष्णुं प्रपद्ये प्रपद्येत व्यत्ययात्। 'तमेवाद्यं प्रपद्येत यदंशाभासको ह्ययम्। जीवराशिरिति' (नारायणश्रुतिः) वचनात्। जगद्वृक्षच्छेदनार्थमिति योज्यम्।। ४।।

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।
द्वंद्वैर्विमुक्ताः सुखदुः खसंज्ञैर्गच्छन्त्यमूढाःपदमव्ययं तत्।। ५।।

भगवत्प्रतिपत्तौ साधनान्तराण्याह— **निर्मानेति।।** मानमोहाभ्याम् अहंकारमिथ्या- ज्ञानाभ्यां निर्गतास्ताभ्यां हीना इति यावत्। जितविषयसङ्गदोषाः। अध्यात्मनित्याः अध्यात्मज्ञाने भगवच्छ्रवणादौ निरताः, विशेषतो निवृत्तविषयतृष्णाः सुखदुःखसंज्ञैः द्वंद्वैर्लाभालाभजयाजयादिरूपैर्विमुक्ताः, अमूढा रजस्तमस्स्वभावशून्याः अव्ययं तत्पदं भगवत्स्वरूपं गच्छन्ति।। ५।।

न तद्भासयते सूर्यो न शशाङ्को न पावकः।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम।। ६।।

कीदृशं तत्पदं यत्प्राप्तिः पुरुषार्थ इत्यत आह— **न तदिति।।** तत्पदं सूर्यादिर्न प्रकाशयति। यद्गत्वा यत्स्वरूपं प्राप्य न निवर्तन्ते संसारं न यान्ति परमं तन्मम धाम रूपमित्यर्थः।। ६।।

ममैवांशो जीवलोके जीवभूतः सनातनः।
मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।। ७।।

जगद्वृक्षच्छेदार्थं ब्रह्मादिप्रतिपत्त्यैवालं किं भगवत्प्रतिपत्त्येत्यत आह— **ममैवेति।।** जीवलोके ब्रह्मादिजीवशरीरे सनातनोऽनादिनित्यः जीवभूतः जीवरूपो ममैव भिन्नांशः। न तु मत्स्यादिवत्स्वरूपांशः। भिन्नोऽपि सूर्यस्य खद्योत इव किंचित्सादृश्य-

मात्रेणांश इत्युच्यते। अतो ब्रह्मादीनां मदंशाभासत्वेन तेषां ब्रह्मादीनाम् अशक्तत्वात्तेषां प्रतिपत्तिं विना भगवत्प्रतिपत्तिरेव कार्येति भावः। जीवानामंशाभासत्वे क्वचिदपि कार्ये शक्तिर्न स्यादित्यतोऽस्तीत्याह— **मन इति**।। प्रकृतिस्थानि प्रकृतिकार्यशरीरस्थानि मनष्षष्ठानि श्रोत्रादिपञ्चेन्द्रियाणि ममांशो जीवभूतः विषयान्प्रति कर्षति प्रवर्तयति स्थितिदशायाम्। देहावाप्तिवेलायां तु मूलकारणात्। उत्क्रान्तौ तु शरीरात्कर्षति।। ७।।

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्।। ८।।

किं स्वसामर्थ्येन नेत्याह— **शरीरमिति**।। ईश्वरः शरीरं जीवशरीरं यदाऽऽप्नोति तदैव जीवस्तत्प्रेरितः सन्कर्षतीत्यर्थः। स्वातन्त्र्येण तु ईश्वर एव सर्वाणीन्द्रियाणि विषयान्प्रति प्रयुङ्क्ते। तदाह सूत्रे— 'ॐ ज्योतिराद्यधिष्ठानं तु तदामननात्ॐ' इत्यादि (२-४-१५)। तथा यच्च यदाऽप्युत्क्रामतीश्वरः जीवमादायेति योज्यम्। तदैतानि इन्द्रियाणि सूक्ष्मेन्द्रियांशान् आशयात्पुष्पादिस्थानात् गन्धानिव गन्धवतः पुष्पाद्यवयवानिव भागशो गृहीत्वा संयाति लोकान्तरमित्यर्थः। न च 'अग्निं वागप्येति' (बृ. ५-२-१३) इत्यादिविरोधः। तस्य भागविषयत्वात्। 'ॐ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॐ' इति (३-१-४) सूत्रात्। अत एव गन्धानिवेति दृष्टान्तोक्तिः। अन्यथा वायुनाऽनेकेष्वाकृष्यमाणेषु गन्धान् गन्धवतः पुष्पाद्यवयवानित्युक्तिर्न स्यात्। सर्वेन्द्रियप्रेरणस्यापीशाधीनत्वान्न तेषां प्रतिपत्तिर्जगद्वृक्षच्छेदनशक्तेति भावः। यद्वा यद्यदा जीवः शरीरमाप्नोति तदेश्वरः एतानि गृहीत्वा शरीरं संयाति, जीवः यदोत्क्रामति च तदेश्वरः एतानि गृहीत्वा लोकान्तरं संयातीति योजना।। ८।।

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते।। ९।।

इन्द्रियेषु प्रवर्तकत्वेन स्थितस्य हरेरिन्द्रियद्वारा विषयभोगमाह— **श्रोत्रमिति**।। अधिष्ठायैवेत्यन्वयः। प्रवर्तकः सन्नेवेत्यर्थः। विषयान् शब्दादीन्।। ९।।

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः।। १०।।

जीववदशुभभोगोऽप्यस्ति किमित्यतः शुभानेव भुङ्क्त इति वदन्कुतो नोपलभ्यत इति शंकां निराह— **उत्क्रामन्तमिति**।। गुणान्वितं शुभयुक्तमेवेत्यर्थः। विमूढा इत्यनुपलम्भे हेतूक्तिः।। १०।।

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः।। ११।।

यत्ने कृतेऽप्यनुपलम्भः कथमित्यत आह।। **यतन्त इति**।। योगिनो ज्ञानोपायानुष्ठातारो यतन्तो यतमानाः ज्ञानं प्राप्यैनं पश्यन्ति। अशुद्धबुद्धयो यतमाना अपि अचेतसो अविवेकिनो नैनं पश्यन्तीत्यर्थः।। ११।।

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्।। १२।।

'अधश्च मूलान्यनुसन्ततानीति' यत्सर्वान्तर्यामित्वरूपं विज्ञानमुक्तं, यच्चोर्ध्वशब्देन सर्वोत्तमत्वमुक्तं तद्द्वयमध्यायशेषेण प्रपञ्चयति– **यदादित्येत्यादिना**।। तेजः जगत्प्रकाशनशक्तिः। मामकं मदीयं मदधीनमित्यर्थः। 'तमेव भान्तमनुभाति सर्वं' (कठ. २-५-१५) इत्यादेः। 'अनुकृतेस्तस्य चेति' (१-३-२२) सूत्रात्।। १२।।

गामाविश्य च भूतानि धारयाम्यहमोजसा।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः।। १३।।

अहं गां भूमिमाविश्य ओजसा स्वशक्त्या भूतानि धारयामि। अमृतरसात्मकः सौम्यत्वात्सोमनामा सोमगः सन्सर्वा ओषधीः सस्यादीनि पुष्णामि वर्धयामि च।।१३।।

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्।। १४।।

किं चाहं विश्वनरसम्बन्धितया वैश्वानरनामा जाठरवैश्वानराग्निस्थः सन् प्राणिनां देहमाश्रितः प्राणापानाभ्यां मुख्यप्राणस्वरूपाभ्यां सम्यग्युक्तः भक्ष्यभोज्यलेह्यपेयभेदेन चतुर्विधमन्नं पचामि जीर्णं करोमि।। १४।।

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्।। १५।।

किंच सर्वस्य हृदि सन्निविष्टोऽहम्। मत्त एव च स्मृतिः अनुभवरूपं ज्ञानं अपोहनं विपर्ययश्च भवति। अहमेव परममुख्यवृत्त्या सर्वैश्च वेदैः वेद्यः। वेदान्तकृत् वेदानामन्तो निर्णयो यस्मात्स वेदान्तो ब्रह्मसूत्रसन्दर्भः। तस्य व्यासरूपेण कर्ता वेदवित् तत्त्वतो वेदार्थज्ञानवानहमेवेत्यर्थः। 'मां विधत्तेऽभिधत्ते मामि' त्यादेः।। १५।।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।। १६।।

एवं सर्वान्तर्यामित्वं प्रपञ्च्याधुना सर्वोत्तमत्वं प्रपञ्चय– **द्वाविति।।** इमौ प्रमाणप्रमितौ पुरुषौ चेतनौ लोके ईशितव्यवर्गे। द्वावेतौ कावित्यत आह– **क्षरश्चेति।।** सर्वाणि भूतानि ब्रह्मादिजीवराशिः। शरीरक्षरणहेतुना क्षर उच्यते। कूटस्थः कूटमाकाशं तद्वत् स्थितः पुरुषः अक्षरदेहत्वात् श्रीरक्षर उच्यते। 'पुल्लिंगेनोच्यते स्त्री च पुंवच्छक्तिमती क्वचिदि' ति छान्दोग्यभाष्योक्तेः।। १६।।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः।। १७।।

यदर्थं पुरुषद्वयनिरूपणं कृतं तदाह– **उत्तम इति।।** क्षराक्षराभ्यामिति विपरिणाम्यानुषज्यते। उत्तमः पुरुषस्तु ताभ्यामन्यः। न त्वनयोरेकः पुरुषोत्तम इत्यर्थः। उक्तार्थे श्रुत्यादिसंमतिमाह– **परमेति।।** आत्माऽत्र चेतनः। क्षराक्षरौ चेतनमात्रम्। उत्तमपुरुषस्तु परमचेतन इति 'चेतनश्चेतनानां' (श्वे० ६-१३)। 'ब्रह्माणि जीवाः सर्वेऽपि' इत्यादिश्रुतिषूदाहृत इत्यर्थः। अतस्ताभ्यामन्यः पुरुषोत्तम इति भावः। उक्तार्थे युक्तिमप्याह– **य इति।।** यः 'भूर्भुवः स्वरि' ति लोकत्रयमाविश्य बिभर्ति धत्ते। यो यस्य धारणपोषणकर्ता स तस्मादुत्तमोऽन्यश्च दृष्ट इति भावः। किं लोकनाशे प्रविष्टस्यापि नाशोऽस्तीत्यत उक्तम्।। **अव्यय इति।।** तत्कथमित्यतोऽचिंत्यशक्तित्वादित्याह।। **ईश्वर इति।।** एतेन क्षराक्षराभ्यामुत्तमोऽन्यः किंनामक इत्यपि शंका परास्ता।। १७।।

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।। १८।।

स किं त्वत्तोऽन्य इत्यतोऽहमेवेति सप्रमाणकमाह– **यस्मादिति।।** यस्मात्क्षरं चातीतः अक्षरादुत्तमोऽतः कारणात्। लोके पौरुषेयग्रन्थे वेदे अपौरुषेयग्रन्थे च प्रथितः प्रसिद्धः पुरुषोत्तमोऽहमेवेत्यर्थः।। १८।।

यो मामेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत।। १९।।

तात्पर्यद्योतनायोक्तार्थज्ञानिनः फलमाह– **यो मामिति।।** योऽधिकारी मामेवं क्षराक्षरोत्तमत्वेन वेदादिषु प्रथितत्वप्रकारेणासंमूढः सर्वोत्तमत्वं मिथ्याभूतमुच्यत इति

मोहरहितः सन्पुरुषोत्तमं क्षराक्षरपुरुषाभ्यामुत्तमं जानाति स सर्ववित् सर्वशास्त्रार्थज्ञानी सर्वभावेन सर्वप्रकारेण मां भजति।। १९।।

इति गुह्यतमं शास्त्रमिदमुक्तं मयानध।
एतद्बुध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत।। २०।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुराणपुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः।। १५।।

एतच्च न यस्मै कस्मैचिद्वाच्यमिति भावेनाह— **इतीति**।। इति 'अधश्च मूलान्यनुसन्ततानि' इत्यादिनोक्तप्रकारेणेदं सर्वान्तर्यामित्वादिकम्। यद्वा 'ऊर्ध्वमूलम्' इत्यादिनोक्तप्रकारेणेदं जगद्वृक्षमूलत्वादिकं शास्त्रं शिक्षणीयं, गुह्यतमम् अतिगोप्यं मयोक्तम्। ततः किमित्यत आह— **एतदिति**।। एतत्प्रागुक्तं सर्वं बुध्वा बुद्धिमानपरोक्षज्ञानी स्यात्। कृतकृत्यो मुक्तश्च स्यादिति।। २०।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते पञ्चदशोऽध्यायः।। १५।।

षोडशोऽध्यायः

श्रीभगवानुवाच-

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।। १।।

।। ॐ।। पूर्वाध्याये 'निर्मानमोहा' (१५-५) इत्यादिना संक्षेपेणोक्तस्य पुमर्थयोर्ज्ञानमोक्षयोः साधनस्य 'यतन्तोऽप्यकृतात्मान' (१५-११) इत्यादिना चोक्तस्य पुमर्थविरोधिनश्च देवासुरलक्षणरूपत्वात् तत्प्रपञ्चनमस्मिन्नध्याये क्रियत इति पूर्वसङ्गतिरध्यायभेदश्च ज्ञेयः। विरोध्युक्तिश्च साधनमनुतिष्ठता तत्त्यागोऽवश्यं कार्य इति भावेनेति बोध्यम्। तत्रादावभ्यर्हिततत्वाद्देवलक्षणं तावदाह— **अभयमित्यादिश्लोकत्रयेण।।** अभयं स्वतोऽन्यस्यान्यस्माच्च स्वस्य भयाभावः। 'यस्मान्नोद्विजते लोको लोकान्नोद्विजतेच यः' (१२-१५) इत्युक्तेः। सत्त्वसंशुद्धिः चित्तप्रसादः। ज्ञानयोगव्यवस्थितिः ज्ञानोपायनिष्ठता। दानं पात्रे द्रव्यादित्यागः। दम इन्द्रियनिग्रहः। यज्ञो ज्योतिष्टोमादिः। देवयज्ञपितृयज्ञादिर्वा। स्वाध्यायो वेदाध्ययनम्। तपो ब्रह्मचर्यादि। आर्जवं मनोवाक्कर्मस्वैकरूप्यम्।। १।।

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलम्।। २।।

अहिंसा परप्राणावियोजनम्। सत्यं यथार्थवचनम्। अक्रोधः परपीडाकरचित्तविकाराभावः। त्याग औदार्यम्। शान्तिः भगवन्निष्ठता। अपैशुनं परोपद्रवनिमित्तदोषाणां राजादेरकीर्तनम्। भूतेषु प्राणिषु दया परहितकरश्चित्तगतो धर्मविशेषः। परदुःखासहिष्णुत्वं वा। अलोलुत्वं विषयेषु रागाभावः। आत्महिंसकेष्वप्यविरोधो मार्दवमक्रौर्यं वा। ह्रीरकार्यकरणे लज्जा। अचापलं स्थैर्यम्।। २।।

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति संपदं दैवीमभिजातस्य भारत।। ३।।

तेजः परैरनभिभवः। क्षमा क्रोधाभावेन सह अपकर्तुरनपकृतिः। धृतिरनातङ्कः। शौचं मृत्तिकादिभिर्बाह्यशौचम्। भगवत्स्मृत्यादिनाऽऽन्तरशौचम्। अद्रोहः परवृत्त्यननुरोधः। नातिमानिता अहंकारराहित्यम्। एते गुणाः दैवीं देवसंबंधिनीं संपदमभिजातस्य प्राप्तस्य भवन्ति। अभिरयं लक्षणेत्थंभूताख्यानेत्युक्तलक्षणार्थकप्रत्यर्थे वर्तते इति तस्य कर्मप्रवचनीयसंज्ञायां कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीयोपपत्तिः। तथा चैत एव गुणाः मुमुक्षुणाऽवश्यमुपादेया इति भावः।। ३।।

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्।। ४।।

त्यागायासुरलक्षणमाह— **दम्भ इति**।। आत्माऽल्पत्वं ज्ञात्वाऽपि महत्त्वप्रदर्शनं दम्भः। दर्पः सत्यपि भयकारणे मदात्तदभावदर्शनम्। अभिमानः प्रमाणातिक्रमः। क्रोधः परपीडाकरचित्तविकारः। पारुष्यं निष्ठुरत्वम्। आसुरीं संपदमभिजातस्येत्यस्य प्रागिवार्थः। तेन जातस्येत्यकर्मकत्वात्संपदमिति न द्वितीयानुपपत्तिदोषः।। ४।।

दैवी संपद्विमोक्षाय निबन्धायासुरी मता।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव।। ५।।

दैवसंपदादेः फलं संदर्शयन्नर्जुनस्यासुरस्वभावशंकां वारयति— **दैवीति**। अभिजातोऽसि प्रागिवार्थः। जातस्य तव दैवीसंपल्लक्षणमित्यर्थः। "वृक्षं प्रति विद्योतत" इत्यत्र वृक्ष इव प्रद्योतस्येति। अतो मा शुचः। शोकं मा कार्षीः। निबन्धनं नीचस्थाने तमसि निवासः। विमोक्षाय विविधमोक्षायेत्युक्त्या मोक्षस्य नानात्वमुच्यते।। ५।।

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।
दैवो विस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु ।। ६।।

ननु सर्गाणामतिबहुत्वाद्देवासुरयोरेवोक्तिः कथमित्यतः शुभाशुभफलाधिक्यादिभाक्त्वरूपपूर्वश्लोकोक्तोपाधिद्वयविवक्षया द्वयोरेवोक्तिरिति भावेनाह— **द्वाविति**। दैव आसुरश्चेति द्वावेव प्राणिनां सर्गौ सृष्टिभूतसर्गौ प्राणिस्वभावाविति वा। तदुभयजिज्ञासायामाह— **दैव इति**।। शृण्विति विस्तरश इत्यनुषङ्गः।। ६।।

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
नं शौचं नापि चाचारो न सत्यं तेषु विद्यते।। ७।।

तदाह— **प्रवृत्तिमित्यादिद्वादशश्लोकैः**।। आसुरा जनाः विहिते प्रवृत्तिं निषिद्धे

निवृत्तिं च न विदुः। तेषु शौचाचारसत्यानि न विद्यन्ते। तात्पर्यद्योतनाय नञ्त्रयोक्तिः।। ७।।

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसंभूतं किमन्यत्कामहैतुकम्।। ८।।

किंच जगदसत्यम्। अत्र सत्यप्रतिष्ठेश्वरशब्दा विष्णुपराः। नञ् बहुव्रीहिः। जगद्विशरणकर्तृतया सत्यपदवाच्यविष्णुहीनमाहुः। स्थितिहेतुतया प्रतिष्ठापदोक्तविष्णुहीनमाहुः। अनीश्वरं स्वामिहीनमाहुः। जगत्सृष्ट्यादिकर्तारं येनन्नि जानंति त इति चाहुरासुरजना इत्यनुषंगः। 'अपरस्परसंभूतं', 'अन्नाद्भवन्ति भूतानी'ति (३-१४) तृतीयोक्तदिशा परस्परसंभूतं न भवतीत्यर्थः। यद्वा जगदसत्यं सत्यं न मिथ्येत्यर्थः। अत एव, शुक्तिरूप्यवन्न प्रतितिष्ठतीत्यप्रतिष्ठं ज्ञानबाध्यम्। अनीश्वरं नियन्तृहीनम्। अपरस्परसंभूतं परेभ्यः संभवहीनम्। एकस्मादेकस्य जनिर्नेति यावत्। किं तर्हीति प्रश्नस्योत्तरम्– **अन्यदिति।।** सदसद्भ्यामिति शेषः। सदसद्विलक्षणमित्यर्थः। केन जायत इत्यत उक्तम्। कामहैतुकं कामहेत्वविद्यापरिणामरूपम्।। ८।।

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः।। ९।।

एतां दृष्टिमाश्रित्य नष्टात्मानः दुष्टचित्ताः अल्पज्ञानाः घोरकर्मनिरताः जगतः अहिताः शत्रवः क्षयायानिष्टप्राप्तये कलियुगादौ प्रभवन्ति।। ९।।

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।
मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः।। १०।।

दुष्पूरं दुःखेन पूरणीयं काममिच्छामाश्रित्य दम्भमानमदैर्युक्ताः सन्तः मोहात् मिथ्याज्ञानस्वभावात्। कुशास्त्राभ्यासजन्यविपरीतनिश्चयाद्गृ(न् गृ)हीत्वा आदायासदर्थान् ज्ञात्वेति वा। अशुचिव्रताः क्षुद्रभोगाय प्रवर्तन्ते।। १०।।

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः।
कामोपभोगपरमा एतावदिति निश्चिताः।। ११।।

किंच प्रलयान्तां मरणान्तां अपरिमेयां परिमातुमशक्यां चिन्तामुपाश्रिताः कामोपभोगपरमाः काम्यमानवस्त्वनुभव एव परमो येषां ते विषयभोगैकरताः एतावदैहिकमेव फलं नान्यदामुष्मिकमस्तीति निश्चयवन्तः।। ११।।

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्।। १२।।

आशा एव पाशास्तेषां शतैर्बद्धाः कामक्रोधा एव परम् अयनमेषां ते कामक्रोधपरायणाः। कामभोगार्थं काम्यविषयानुभवार्थम् अन्यायेन चौर्यादिनाऽर्थ- संचयान्द्रव्यसमूहानीहंते वाञ्छन्ति।। १२।।

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्।। १३।।

चिंताप्रकारं दर्शयति— **इदमित्यादिना त्रयेण।।** इदं धनमद्य मया लब्धं, इमं मनोरथं प्राप्स्ये प्राप्स्यामि। इदं धनमस्ति इदमपि धनं मे पुनर्भविष्यति।। १३।।

असौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी।। १४।।

असौ शत्रुर्मया अतः अपरानन्यानपि शत्रून् हनिष्ये च। अहमीश्वरः परमेश्वरः भोगी ऐहिकामुष्मिकभोगसंपन्नः सिद्धः कृतकृत्यः बलवान्समर्थः।। १४।।

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः।। १५।।

आढ्यः धनादिसंपन्नः अभिजनवान्कुलीनोऽस्मि। मया सदृशोऽन्यः कोऽस्ति न कोऽपि। यक्ष्ये यागादिधर्माननुष्ठास्यामि। भूरिदक्षिणान्नादि दास्यामि। मोदिष्ये संतोषं प्राप्स्यामि इत्येवं रूपेणाज्ञानेन विमोहिताः।। १५।।

अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ।। १६।।

एवं चिन्ताप्रकारमुक्त्वा तेषां फलमाह— **अनेकेति।।** अनेकचिन्तायुक्तमनसा विशेषभ्रान्तिमन्तः पुत्रमित्रादिविषयमोहाख्यजालेन समावृताः विषयभोगेष्वतितरामासक्ताः सन्तः अशुचौ नरके पतन्ति।। १६।।

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्।। १७।।

यागादि कुर्वतां कथं नरके पात इत्यत आह— **आत्मेति।।** आत्मनैव स्वेनैव संभाविताः बहुमताः वयं पूज्या इति मन्यमाना इति यावत्। अत एव स्तब्धाः अन-

म्राः धननिमित्तगर्वदर्पाभ्यामुपेतास्ते अविधिपूर्वकं दम्भेन स्वमहित्वप्रदर्शननिमित्तेन यज्ञैर्ज्योतिष्टोमादिभिर्यजन्ते नाम। न कृतार्थबुद्ध्या, अतो नरकप्राप्तिस्तेषामिति भावः।। १७।।

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।। १८।।

सर्वकर्मकारयितारं सर्वान्तर्यामिणं त्वां कुतो न यजंत इत्यत आह।। **अहंकारमिति।।** अहंकारादिसंश्रिताः सन्तः आत्मदेहे परदेहेषु च नियामकतया स्थितं मां प्रद्विषन्तः। यदि ईश्वरः कारयिताऽस्ति तर्हीदानीमकुर्वाणं मां कारयतु कुर्वाणं च विघातयतु इत्येवं भगवदपलापरूपप्रद्वेषं कुर्वन्तः। अभ्यसूयकाः निर्दोषे दोषान्वदन्तः। गुणपूर्णे गुणहीनतां वदन्तः, यजन्त इत्यनुषज्यते।। १८।।

तानहं द्विषतः क्रूरान्संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।। १९।।

नरके पतन्तीत्येतावदेव न तेषां फलं, किंतु किंचित्कालं संसारमनुभूय पश्चान्नित्यनरकमपि मयैव प्राप्नुवन्तीत्याह।। **तानिति द्वाभ्याम्।।** तान् 'प्रवृत्तिं च' इत्यादिनोक्तान्द्विषतः क्रूरान् अत एवाशुभान्नराधमान्संसारेषु तत्राप्यासुरयोनिषु अजस्रं पुनः पुनः क्षिपामि स्थापयामि।। १९।।

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्।। २०।।

ततो मूढाः तामसस्वभावाः जन्मनि जन्मनि अनेकजन्मसु आसुरीं योनिमापन्नाः मामप्राप्यैवाधमां नित्यनरकलक्षणां गतिं यान्ति।। २०।।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।। २१।।

उक्तेषु पुमर्थविरोधिषु प्रधानदोषत्रयमवश्यं त्याज्यमित्याह– **त्रिविधमिति।।** कामः क्रोधः लोभ इति इदं त्रिविधं नरकद्वारं नरकसाधनम्। अत एव आत्मनो नाशनमनर्थप्रापकम्। तस्मादेतत्त्रयं त्यजेत्। ततश्च कारणाभावान्नरकाणामप्राप्तिरिति भावः।। २१।।

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्।। २२।।

न केवलं कामादित्यागे नरकाप्राप्तिः परमपुमर्थप्राप्तिश्चास्तीत्याह— **एतैरिति**।। तमोद्वारैर्नरकहेतुभिस्त्रिभिरेतैः कामक्रोधलोभैर्विमुक्तो नरः आत्मनः श्रेयः पुमर्थसाधनमाचरति। ततः परां गतिं मोक्षं याति।। २२।।

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।। २३।।

श्रेयःसाधनानुष्ठाने अङ्गान्तरं विधातुं तदकरणे बाधकं तावदाह— **य इति**।। यः शास्त्रोक्तविधानमुत्सृज्य कामकारतः स्वेच्छामात्रेण यत्र क्वचित्प्रवर्तते स सिद्धिं पुमर्थोपायं नावाप्नोति। सुखमैहिकं परां गतिं मोक्षं वा नाप्नोति।। २३।।

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि।। २४।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः।। १६।।

कुतः शास्त्रविध्यतिक्रमे संसिद्धिसुखाद्यभाव इति शङ्कां निरस्यन्नंबगांतरं विधत्ते— **तस्मादिति**।। यस्मादिदं कार्यमिदमकार्यमिति व्यवस्थायां ते तव विवेकिनः शास्त्रं प्रमाणम्। तदतिक्रमे च दोषः। तस्मादिह लोके शास्त्रविधानोक्तं कर्म कर्तुमर्हसि इति।। २४।।

।। इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते षोडशोऽध्यायः।। १६।।

सप्तदशोऽध्यायः

अर्जुन उवाच-

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः।। १।।

।। ॐ।। चतुर्दशाध्याये 'नान्यं गुणेभ्यः कर्तारम्' (१४-१९) इत्यादिना सर्वोऽपि परिणामो गुणकृत इति सामान्यत उक्तस्यात्र सत्त्वादिगुणकृतानां श्रद्धानामाहारस्य तपःप्रभृतिकर्मणां च सदसद्रूपाणां भेदोक्त्या प्रपञ्चनं क्रियते। पूर्वत्र शास्त्रविधानोक्तं ज्ञात्वा कर्म कार्यमित्युक्ते लब्धावसरोऽर्जुनः शास्त्रविध्यज्ञानिनां का स्थितिरिति पृच्छति– **य इति**।। ये जनाः शास्त्रविधिमुत्सृज्य अज्ञात्वा श्रद्धयाऽन्विताः श्रद्धामात्रेण यजन्ते। तेषां निष्ठा तु स्थितिस्तु का कीदृशी। तामेव विविच्याह– **सत्त्वमित्यादिना**।। किं सात्त्विकी राजसी तामसी वा स्थितिरित्यर्थः। ते किं सात्त्विका। राजसास्तामसा वेति यावत्।। १।।

श्रीभगवानुवाच-

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु।। २।।

ते त्रिविधा अपि सन्तीति भावेन प्राक् यागाङ्गतया यष्टृविशेषणत्वेनोक्तश्रद्धां सात्त्विकत्वादिना विभज्य तदाश्रयेण तेषां सात्त्विकत्वादिस्वरूपमाह– **त्रिविधेति द्वाभ्याम्**।। श्रद्धा आस्तिक्यनिष्ठा स्वभावजैवेत्यन्वयः। मनोवृत्तिश्रद्धाव्यावृत्तये स्वभावजैवेत्युक्तम्। तां त्रिविधां शृणु श्रुत्वा तत्र निष्ठां कुर्वित्यर्थः। तदन्वितैः क्रियमाणयजनप्रकारं शृण्वित्यर्थः।। २।।

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः।। ३।।

अस्तु श्रद्धा त्रिविधा। तेषां का निष्ठेति प्रश्नस्य किमुत्तरमित्यत आह।। **यो यच्छ्रद्धः स एव स इति।।** यो यजमानः सात्त्विकश्रद्धः स सात्त्विकः। यो राजसश्रद्धः स राजसः। यस्तामसश्रद्धः स तामस इत्यर्थः। कुत एवमित्यतस्तदुपपादनायोक्तं।। **सत्त्वेति।।** सर्वस्य जन्तोः श्रद्धा सत्त्वानुरूपा जीवस्वरूपानुरूपा भवति। 'सत्त्वं जीवः क्वचित्प्रोक्तः' इत्यादिवचनात्। श्रद्धायाः जीवस्वरूपानुरूपत्वात्तया तत्स्वरूपं ज्ञेयमित्यर्थः। श्रद्धायाः जीवानुरूपत्वमेव कुत इत्यत उक्तं।। **श्रद्धेति।।** अयं पुरुषो जीवः श्रद्धामयः। तादात्म्यार्थे मयट्। श्रद्धास्वरूप इत्यर्थः।। ३।।

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः।
भूतान्प्रेतगणांश्चान्ये यजन्ते तामसा जनाः।। ४।।

'यो यच्छ्रद्ध' इत्यत्र सात्त्विकादिश्रद्धः सात्त्विकादिरित्युक्तम्। तत्र सात्त्विकश्रद्धादिः किं कर्मवानिति जिज्ञासायां तां शृण्विति प्रतिज्ञातमाह— **यजंत इति।।** सात्त्विकाः सात्त्विकश्रद्धावन्तः, शास्त्रविधानमजानन्तोऽपि सात्त्विकश्रद्धामात्रान्विता जना इति यावत्। देवान् यजन्ते। राजसा राजसश्रद्धावन्तः शास्त्रविधानमजानन्त इति सर्वत्र ज्ञेयम्। यक्षरक्षांसि यजन्ते। तामसास्तामसश्रद्धावन्तः प्रेतादीन् यजन्ते। यद्यपि यागविधिषु 'ऐन्द्रं दधि' इत्यादिषु इन्द्रादिदेवता एवोद्देश्यतया श्रुताः इति राजसादिरपि तत्र श्रुतदेवतोद्देशेनैव यजनं करोति। तथापि तैरिष्टं यक्षराक्षसाः। 'दीनत्वाद्देवनामानो ब्रह्मेन्द्रादिसनामकाः। गृह्णन्ति' (महाविष्णु पु.) इति स्मृत्या तत्तन्नामकयक्षादीनामेव तत्तद्यज्ञभोक्तृत्वाद्यक्षरक्षांसि यजन्त इत्याद्युक्तमिति ज्ञेयम्। अत्र देवयाजिनां विष्णुभक्त्यादिमत्त्वान्मोक्ष एव फलम्। राजसानां तु स्वर्गप्रतिनिधित्वेन कल्पितः साङ्कल्पिकः स्वर्गः। तामसानां तु शिवपरिवारभूतादित्वप्राप्तिः फलं ज्ञेयम्। 'मोक्षः साङ्कल्पिकः स्वर्गो भूतादित्वं फलं क्रमात्' (महाविष्णु पु.) इति स्मृतेः।।४।।

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहंकारसंयुक्ताः कामरागबलान्विताः।। ५।।

न केवलं तामसानां भूतादित्वं तमःप्राप्तिरपीत्याह।। **अशास्त्रेत्यादिद्वाभ्याम्।।** ये जनाः शास्त्रादन्येन दुरागमादिना विहितं घोरं महाकष्टरूपं तपः, दम्भाहंकारसंयुक्ताः कामरागबलान्विताः इच्छासक्त्याग्रहयुक्ताः सन्तस्तप्यन्ते कुर्वन्ति।। ५।।

कर्शयन्तः शरीरस्थं भूतग्राममचेतसः।
मां चैवान्तश्शरीरस्थं तान्विद्ध्यासुरनिश्चयान्।। ६।।

किंच शरीरस्थं भूतग्रामं लक्ष्म्यादिदेवतासमुदायं मां चान्तर्नियामकत्वेन शरी-

रस्थं कर्शयन्तोऽ(तः कृशत्वेना)ल्पगुणत्वेन पश्यन्तोऽचेतसोऽविवेकिनः। तानासुरनिश्चया- नसुरसंबंधिनिश्चयान्विद्धि जानीहि। ते दैत्यरक्षःपिशाचा इत्यर्थः। तमःप्राप्तियोग्या इति भावः।। ६।।

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु।। ७।।

श्रद्धाभेदात्सात्त्विकादिभेदः, तत्तदीयसदसत्कर्मविवेकेन सात्त्विकादिस्वरूपविवेक उक्तः। आहारादिभेदेनापि तेषां विवेकं प्रतिज्ञापूर्वमाह— **आहारस्त्वित्यादिसप्तभिः।।** सर्वस्येति सात्त्विकादिजनस्येत्यर्थः। यज्ञस्तपोदानं तथा त्रिविधमित्यर्थः।। **तेषामिति।** आहारादीनामित्यर्थः।। ७।।

आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।। ८।।

आहारभेदं तावत् त्रिभिराह— **आयुरित्यादिना।।** आयुर्जीवनम्। सत्त्वं साधुत्वम्। सात्त्विकवस्तुसेवनेन चित्तशुद्धेः। बलं शक्तिः। आरोग्यं रोगराहित्यम्। सुखं सकृदुपभोगेऽपि बहुकालीनम्। प्रीतिरुपभोगकालीनं सुखम्। एतेषामायुरादीनां विवर्धनाः विशेषेण वृद्धिहेतवः। रस्याः रसयुक्ताः। स्निग्धाः स्नेहवन्तः। स्थिराः सेवनेन बहुकालगुणप्रदाः आज्यादयः। अनुभवे सति पश्चादपि भूयादिति मनोहारिणो हृद्याः। एते आहाराः। कर्मणि घञ्। भक्ष्यपदार्थाः। सात्त्विकानां सत्त्वगुणयुक्तानां प्रियाः। आयुरादिविवर्धना इति विशेषणोक्त्या तद्विपरीतत्वे रस्यादीनामपि राजसत्वमेवेति ज्ञेयम्।। ८।।

कट्वाम्ललवणात्युष्णातीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः।। ९।।

कटु मरीचिकादिः। आम्लो जम्बीररसादिः। लवणं प्रसिद्धम्। अत्युष्णम्। अतिशब्दः सर्वत्र सम्बध्यते। उष्णं तीक्ष्णं सर्षपादि। रूक्षं स्वतो नीरसम्। विदाहि विशेषेण दग्धं सन्तापकरं वा। एते आहाराः राजसस्येष्टाः प्रियाः। दुःखं शोको दौर्मनस्यम् आमयो रोगः एतत्त्रयप्रदाः। दुःखादिदत्वविशेषणोक्त्या तदभावे कट्वादीनां सात्त्विकत्वमेवेति ज्ञेयम्।। ९।।

यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।। १०।।

यातयामं यामान्तरितपाकम्। पूर्वं स्वादु पश्चादन्यथाजातं रसं गतरसम्। पूति दुर्गन्धम्। पर्युषितं दिनान्तरितपक्कम्। अन्यभुक्तावशिष्टम् उच्छिष्टम्। अमेध्यमपवित्रम्। भोजनम्। कर्मणि ल्युट्। भोज्यम्। यातयामादि भोज्यं वस्तु यत्तत्तामसप्रियं, तादृशं वस्तु भोजनविषयतया तामसप्रियमित्यर्थः। स्वादुत्वादेः पुरुषभेदेन व्यवस्थितत्वेऽपि शुद्धभागवतस्वभावापेक्षया स्वादुत्वादिकं ध्येयम्।। १०।।

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः।। ११।।

यज्ञभेदेन सात्त्विकादिभेदमाह– **अफलेति।।** फलाकाङ्क्षारहितैर्यो यज्ञो विधिदृष्टो विधिज्ञानपूर्वकः यष्टव्यमेवेति मनः समाधाय इज्यते अनुष्ठीयते स सात्त्विक इत्यर्थः।। ११।।

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्।। १२।।

फलमभिसन्धाय मे भूयादिति कामयमान एव अपि दम्भार्थमेव आत्ममहत्त्वप्रदर्शनार्थमेव यदिज्यते तं यज्ञं राजसं विद्धि।। १२।।

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।। १३।।

असृष्टान्नम् अन्नदानहीनम्। शिष्टं व्यक्तम्।। १३।।

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।। १४।।

प्राक् प्रतिज्ञातं तपोभेदेन सात्त्विकादिभेदं दर्शयितुं शारीरादिभेदेन तत्त्रैविध्यं तावदाह– **देवेति।।** देवादिपूजनं यथायोग्यं ध्येयम्। शौचं बाह्याभ्यन्तररूपम्। ब्रह्मचर्यमूर्ध्वरेतस्त्वम्। शारीरं शरीरसम्बंधि।। १४।।

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।। १५।।

अनुद्वेगकरं परस्यातङ्को यथा न भवति तादृशं वाक्यम्। सत्यं यथार्थवाक्यमिति सर्वत्रान्वेति। प्रियं श्रवणसमये पुनः पुनः श्रवणेच्छाकरम्। हितं कालान्तरे सुखकरं च। स्वाध्यायाभ्यसनं च यत्तदिति शेषः। वाङ्मयं वागात्मकं तपः।। १५।।

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते।। १६।।

मनःप्रसादः विषयेष्वप्रयासेन प्रवृत्तिः। सौम्यत्वम् अक्रौर्यम्। मौनं मननशील-त्वम्। आत्मविनिग्रहः आत्मनि परमात्मनि मनसो विशिष्यावस्थानम्। भावे आशये संशुद्धिः। नानाकामराहित्यम्। इत्येतन्मानसं तपः उच्यते।। १६।।

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते।। १७।।

इदानीं सात्त्विकादितपोभेदेन सात्त्विकादिजीवभेदं प्रतिज्ञापूर्वमाह— **श्रद्धये-त्यादिभिस्त्रिभिः।।** नरैस्तप्तं कृतं तपः यत् तत् त्रिविधमित्यर्थः। तत्कथमित्यत आह— **अफलेति।।** युक्तैर्भगवदर्पणादियोगयुक्तैः तप्तं तप इत्यनुषज्यते।। १७।।

सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्।। १८।।

सत्कारो मनसा आदरः। मानो वाचा प्रशंसा। पूजा अर्चनम्। एतदर्थं दम्भेन च आत्मनो महत्त्वप्रदर्शनार्थं वा यत्तपः क्रियते तत्तपः इह लोके राजसं प्रोक्तम्। चलं पातभयेन चलनहेतुः। अध्रुवं क्षयिष्णु।। १८।।

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्।। १९।।

मूढग्राहेण अविवेकदुराग्रहेण आत्मनः पीडया परस्य शत्रोरुत्सादनार्थं वा यत्तपः क्रियते तत्तामसम्।। १९।।

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्।। २०।।

प्राक् प्रतिज्ञातसात्त्विकादिभेदेन दानभेदमाह (प्राक् प्रतिज्ञातदानभेदेन सात्त्विकादिभेदमाह)— **दातव्यमित्यादित्रिभिः।।** दातव्यमित्यास्तिक्यबुद्ध्या दानम्। कर्मणि ल्युट्। दातव्यं वस्तु पुण्यदेशे पुण्यकालेऽनुपकारिणे उपकारमनपेक्ष्य सत्पात्रे च पात्राय दीयते इति यत् तद्दानं सात्त्विकम्।। २०।।

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।। २१।।

परिक्लिष्टम् अन्यायार्जितं द्रव्यम्।। २१।।

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम्।। २२।।

अदेशकाल इति द्वंद्वैकवद्भावः। अशुचिदेशकालयोः असत्कृतं नमस्कारादिसत्काररहितम्। अवज्ञातम् अवज्ञाकरणयुक्तं यथा तथा। अपात्रेभ्यः यद्दीयते तत्तामसमित्यर्थः।। २२।।

ॐ तत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा।। २३।।

'अफलाकाङ्क्षिभिः' इत्यादिना पूर्वं यज्ञतपोदानानां सात्त्विकत्वादिहेतवोऽसाधारणधर्माः उक्ताः। साधारणांस्तु वक्तुमनेककर्तृकचरितानुवादरूपपुराकल्पाख्यार्थवादमाह— **ओमित्यादिना।।** निर्दिश्यते अनेनेति निर्देशो नाम ब्रह्मणः त्रिविधः स्मृतः। ओतं प्रविष्टमाश्रितं इति यावत्, जगद्यत्र परे इति वा, ईश्वरो वा जगति प्रोतः प्रविष्ट इति वा व्युत्पत्त्या ओमिति नाम हरेः। 'अव रक्षणकान्तिगतिप्रवेशे' त्याद्यर्थस्यावतेः 'अवतेष्टिलोपश्चे' ति सूत्रेण मन्प्रत्ययः। तस्य टिलोपे 'ज्वरत्वरे'त्यूठिसार्वधातुके' ति (आद्गुणं तु क इति) गुणे च ओमितिरूपसिद्धेः। गुणैस्ततत्वाद्वा तदि (मि)त्यस्य परोक्षवाचित्वाद् ब्रह्मणश्च वेदैकवेद्यतया परोक्षत्वात्तदिति नाम। निर्दोषसर्वशुभगुणपूर्णत्वात्सदिति नामेति ज्ञेयम्। तेन ब्रह्मणा ब्राह्मणादयः पुरा सृष्टिकाले विहिताः सृष्टाः। वेदानां विधानं नाम अभिव्यक्तिर्ज्ञेया।। २३।।

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्।। २४।।

तस्मादोमित्यस्य भगवन्नामत्वात् ओमित्युदाहृत्य ओङ्कारमुच्चार्य ब्रह्मवादिनां सततं यज्ञादिक्रियाः विधानोक्ताः विध्युक्ताः प्रवर्तन्ते। एतेनोक्तोङ्कारार्थधीपूर्वकम् ओमित्युच्चार्य ब्राह्मणैः सह विध्युक्तदिशाऽनुष्ठानं यज्ञादेः सात्त्विकत्वे हेतुरुक्तो भवति।। २४।।

तदित्यनभिसंधाय फलं यज्ञतपः क्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः।। २५।।

किंच तत्परोक्षं फलं स्वर्गाद्यनभिसन्धाय मम स्यादित्यनिच्छन्, तथा तत् वेदैकगम्यतया परोक्षभूतं ब्रह्म अभिसन्धाय ममास्पदं स्यादितीच्छन्यज्ञोऽग्निहोत्रादि तपःक्रियाः प्रागुक्तशरीरादितपोरूपक्रियाः दानक्रियाश्च विविधाः मोक्षकाङ्क्षिभिः क्रियन्त इत्युक्त्या वेदैकवेद्यतया तत्पदोक्तब्रह्मोद्देशेनेतरफलानुद्देशेन च क्रियमाणत्वरू-

पधर्मान्तरमपि यज्ञादेः सात्त्विकत्वादिहेतुरुक्तो भवति। तदिति ब्रह्मोद्दिश्य यज्ञादेः करणाच्च ब्रह्मणस्तदिति नामेति चोक्तं भवति।। २५।।

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते।। २६।।

किंच साधुगुणोपेततया सच्छब्दार्थभगवज्ज्ञानपूर्वकतयाऽनुष्ठानमपि सात्त्विकत्वहेतुधर्मान्तरं यज्ञादेरिति भावेन सच्छब्दार्थमाह— **सद्भाव इति**।। सद्भावे असतः सत्तारूपप्रजननार्थे साधुभावे साधुत्वे, प्रशस्ते कर्मणि शुभकर्मणि चेत्यर्थः।। २६।।

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।
कर्म चैव तदर्थोऽयं (तदर्थीयं) सदित्येवाभिधीयते।। २७।।

भगवन्निष्ठापूर्वकत्वमपि कर्मणः सात्त्विकत्वहेतुभूतं धर्मान्तरमिति भावेन निष्ठाऽपि सच्छब्दार्थ इत्याह— **यज्ञ इति**।। स्थितिर्निष्ठा। भगवानेभिरवश्यं फलं प्रयच्छतीति बुद्धिरिति यावत्। किंच भगवद्विषयतयाऽनुष्ठानमपि धर्मान्तरमिति भावेनाह— **कर्मेति**।। तदर्थोऽयं (तदर्थीयं) सच्छब्दार्थभगवदर्थोऽयम् (भगवदर्थीयं)।। २७।।

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह।। २८।।

।।ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागो नाम सप्तदशोऽध्यायः।। १७।।

यज्ञादेः सात्त्विकत्वहेतुभूतधर्मानुक्त्वा तदन्यथात्वेऽपि हेतुभूतधर्मानाह— **अश्रद्धयेति**।। भगवच्छ्रद्धाभावेनेत्यर्थः। हुतमित्यादौ शास्त्रानुसारेणेति योज्यम्। भगवच्छ्रद्धां विना शास्त्रानुसारेणानुष्ठितमपि यद्धोमादिकं तदसदेवोच्यते। तत्प्रेत्य न च इह च नो। ऐहिकामुष्मिकपुमर्थप्रदं नेत्यर्थः। अतो भगवच्छ्रद्धाभक्त्यादिपूर्वकमेवानुष्ठितहोमादीनि इहामुत्र फलप्रदानीति श्रद्धैव प्रयोजिकेति सैव "त्रिविधा भवति श्रद्धे" त्यादिना प्राधान्येनोक्तेति भावः। वस्तुतस्तु श्रद्धाभावे शास्त्रानुसारित्वमेव नेति ज्ञेयम्।। २८।।

।। इति श्रीमद्गीतार्थसंग्रहे श्रीराघवेंद्रयतिकृते सप्तदशोऽध्यायः।। १७।।

अष्टादशोऽध्यायः

अर्जुन उवाच-

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन।। १।।

।।ॐ।। पूर्वाध्यायेषु सर्वेषु 'त्रैगुण्यविषया वेदा' (२-१५) इत्यादिना यत्पुमर्थहेतुज्ञानसाधनं विप्रकीर्णतयोक्तं, तदिह मन्दानां बुद्ध्यारोहाय सङ्क्षिप्य निरूप्यते। तथा चतुर्दशाध्यायोक्तं त्रिगुणकार्यं चोच्यते। 'संन्यासश्चैव योगश्च' (५-६) इत्यादिना पञ्चमादौ संन्यासस्य 'त्यागाच्छान्तिरनन्तरं' (१२-१२) इति द्वादशे त्यागस्य च पुमर्थहेतुत्वमुक्तम्। तयोः स्वरूपनिर्णयाय पृच्छति— **संन्यासस्येति**।। हे हृषीकेश सर्वेन्द्रियस्वामिन्। केशिनामकासुरमर्दन। संन्यासस्य त्यागस्य च पृथक् तत्त्वं स्वरूपं वेदितुं ज्ञातुमिच्छामि। द्वयोरपि शब्दयोरापाततोऽर्थैक्यप्रतीतेरिति भावः।। १।।

श्रीभगवानुवाच-

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः।। २।।

अथाऽप्यस्ति विवक्षाभेदेन भेद इति भावेनोत्तरमाह— **काम्यानामिति**।। वैकल्पिककाम्यानां ज्योतिष्टोमादीनां स्वर्गादिफलानिच्छया विशेषणत्यागेन काम्यानां कर्मणां त्यागम्, नियतकाम्यानां कारीर्यादीनां स्वरूपाकरणेन त्यागं संन्यासं ज्ञानिनो विदुः जानन्ति। विचक्षणाः कुशलाः सर्वकर्मणां भगवत्प्रीत्यन्यफलत्यागं त्यागशब्दार्थ- माहुः इत्यर्थः।। २।।

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे।। ३।।

'सर्वकर्मफलत्यागमिति' स्वोक्तत्यागस्वरूपावधारणाय प्रातीतिकीं विद्वन्मत-विप्रतिपत्तिमुद्भावयति– **त्याज्यमिति**।। एके मनीषिणो ज्ञानिनः दोषवत् बन्धकत्व-दोषयुक्तं काम्यकर्म त्याज्यम् अकार्यमाहुः। अपरे च मनीषिणः यज्ञादि न त्याज्य-मिति प्राहुः। तपः कृच्छ्रचान्द्रायणादि कर्म यज्ञाङ्गानि। यद्वा नित्यनैमित्तिकानि। मनीषिण इति विशेषणात्प्राचीनपक्षेऽपि फलत्याग एवाभिमतो न स्वरूपत्यागः। अतो न मतयोर्विरोधः।। ३।।

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः।। ४।।

अविरोधप्रकारं प्रतिज्ञापूर्वमुपपादयति– **निश्चयमिति**।। तत्र विप्रतिपन्ने त्यागे विषये निश्चितं मतं मे सकाशात् शृणु श्रुत्वा निष्ठां कुरु। त्यागो हि फलत्यागः, कर्मणि ममतात्यागः, भगवति कर्तृत्वानुसन्धानपूर्वं स्वस्य कर्तृत्वाभिमानत्याग इति त्रिविधः संप्रकीर्तित इत्येके। वक्ष्यमाणसात्त्विकादिभेदेनेत्यन्ये।। ४।।

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।। ५।।

निश्चयं शृण्विति प्रतिज्ञातमाह– **यज्ञेति**।। द्वंद्वैकवद्भावः। कुतः कार्यमित्यत आह– **यज्ञ इति**।। पावनानि पावित्र्यकरणानि। अबन्धकानीति यावत्। यद्वा मनी-षिणां ज्ञानिनां मुक्तावानन्दातिशयकराणि। अतः सर्वैरपि वर्णाश्रमोचितकर्माणि कार्या-ण्येवेति। यतीनामपि ज्ञानयज्ञविद्याभयदानब्रह्मचर्यादितपांसि च सन्त्येव। स्त्रीशूद्रादीना-मपि विष्णुनामाध्ययनरूपो यज्ञः सत्यवचनमुपवासादितपश्चास्त्येवेति भावः।। ५।।

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।। ६।।

यज्ञादि न त्याज्यं कार्यमेव तदित्युक्तमयुक्तम्। "त्याज्यं कर्म" इत्युक्तमनीषि-मतविरोधादित्यतः सङ्गादित्यागरूपविशेषणत्याग एव तेषामभिमतः न स्वरूपत्याग इति भावेन यज्ञादेः करणप्रकारमाह– **एतानीति**।। प्रागुक्तयज्ञादिरूपकर्माणि ममता-भिमानरूपस्नेहाख्यसङ्गं त्यक्त्वा स्वर्गादिफलानि च त्यक्त्वा कर्तव्यानि इति निश्चितं मे उत्तमं मतम्।। ६।।

नियतस्य तु सन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः।। ७।।

स्वरूपत्यागो नेत्येतदुपपादयन् 'त्यागो हि त्रिविध' इत्युक्तं प्रपञ्चयति— **नियतस्य त्विति।।** वर्णाश्रमोचितस्य तु कर्मणः संन्यासस्त्यागो नोपपद्यते युक्तो न भवति। 'स्वयज्ञादीन्परित्यज्य निरयं यात्यसंशयमि' ति पाद्मे प्रत्यवायस्मरणात्। स्वरूपत्याग एव त्यागशब्दार्थो न सङ्गफलयोस्त्याग इति मिथ्याज्ञानाख्यमोहात्तस्य यज्ञादिकर्मणः परित्यागः तामसः परिकीर्तितः।। ७।।

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्।। ८।।

दुःखं प्रतिकूलवेदनीयरूपदुःखकारणमित्येव कायक्लेशभयाच्च कर्म त्यजेदिति यत्स राजसत्यागः। तं राजसत्यागं कृत्वा त्यागफलं भगवत्प्रीतिरूपं नैव लभेत।।८।।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।
संङ्ग त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः।। ९।।

कार्यमवश्यं कर्तव्यं अन्यथा प्रत्यवायादिति बुद्ध्या सङ्गं मदीयमिति स्नेहं स्वर्गादिफलं च त्यक्त्वैव नियतं वर्णाश्रमोचितं कर्म यत् क्रियते स त्यागः कर्मानुष्ठानसहितः सात्त्विको मतः।। ९।।

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः।। १०।।

सात्त्विकत्यागिनो विशेषणान्याह— **न द्वेष्टीति।।** अकुशलं तात्कालिकसुखदं न किंतु कायक्लेशदुःखदं कर्म न द्वेष्टि। कुशले पूर्वार्जितपुण्यफले नानुषज्जते नेच्छति। सत्त्वसमाविष्टः सम्यक् सत्त्वगुणेन व्याप्तः मेधावी भगवत्तत्त्वज्ञानी छिन्नसंशयः परापरतत्त्वविषये भगवद्धर्मानुष्ठाने वा संदेहहीनः त्यागी भगवति सर्वकर्मसमर्पणवान्स सात्त्विकत्यागीत्यर्थः।। १०।।

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते।। ११।।

पूर्वं 'कर्तव्यानीति मे पार्थ' इत्यत्र सङ्गफलत्याग एव त्यागशब्दार्थ इति स्वसिद्धान्तो निर्णीतः। अधुना त्याज्यं दोषवदिति पक्षस्य बीजखण्डनाय सर्वकर्मपरित्यागो वा विहितकर्मत्यागो वा न त्यागशब्दार्थः, येन 'त्याज्यं दोषवदि' त्यस्य सर्वकर्मत्यागोऽर्थ इत्युच्यत इति भावेनाह— **न हीति।।** अशेषतः कर्माणि त्यक्तुं न शक्यम्, 'न

हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्' (३-५) इत्युक्तेः। नापि विहिताशेषत्यागः। 'स्वयज्ञादीन्परित्यज्य निरयं यान्ति' इति प्रत्यवायस्मरणादिति भावः। हि यस्मादशक्यं तस्माद्यस्तु कर्मफलत्यागी स एव त्यागीत्यभिधीयते। अतस्त्याज्यमिति पक्षस्यापि फलत्याग एवार्थ इति भावः।। ११।।

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्।। १२।।

अत्यागिनिन्दापूर्वं त्यागिनं स्तौति– **अनिष्टमिति।।** अनिष्टं नरकादि। इष्टं काम्यकर्मिणामिच्छाविषयीभूतं स्वर्गादि। मिश्रं इष्टानिष्टमेलनरूपं मानुषादि। कर्मणस्त्रिविधं फलम्। अत्यागिनां कर्मफलमत्यजतां प्रेत्य मृत्वा देहान्निर्गत्य स्थितानां भवति। संन्यासिनां तु अनियतकाम्यानां फलत्यागिनाम्, नियतानां स्वरूपत्यागिनाम्, क्वचिदपि इह वा परत्र वा नास्ति। इष्टानिष्टादिरूपं कर्मणः फलमित्यनुषङ्गः। अत्र त्यागिनामिति वक्तव्ये संन्यासिनामित्युक्तिः त्यागिनो हि परार्थं कारीर्यादिनियतकाम्यं कुर्वन्ति, संन्यासिनस्तु तदपि नेत्येतावन्तं त्यागिभ्यो विशेषं सूचयितुम्। फलेच्छाभावे तेषु त्यागित्वस्यापि सत्त्वात्। न त्विति तुशब्देन त्यागिनां ज्ञानभक्त्यादिद्वारा अपरोक्षतो मुक्तावानन्दातिशयफलं भवतीति सूच्यते। उपपादितमेतत् 'त्यागाच्छान्तिरनन्तरं' (१२-१२) इत्यत्र द्वादशेऽध्याये भाष्यादौ।। १२।।

पञ्चैतानि महाबाहो कारणानि निबोध मे।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्।। १३।।

'काम्यानां' इत्यत्रोक्तदिशा वैकल्पिककाम्यानां फलत्यागः। नियतकाम्यानां स्वरूपत्यागः। 'न तु संन्यासिनां' इत्यत्रोक्तदिशा परार्थमपि नियतकाम्यानामननुष्ठानमित्येतावन्मात्रं न संन्यासशब्दार्थः। किंतु कर्मणि कर्तृत्वाभिमानत्यागोऽपीति वक्तुं कर्मकारणानि प्रतिज्ञापूर्वमाह– **पञ्चेत्यादित्रिभिः।।** एतानि वक्ष्यमाणानि कारणानि कर्मकारणानि मे सकाशात् निबोध बुद्ध्यस्व। सांख्ये कृतान्ते कपिलाख्यविष्णुकृतसांख्यनामकशास्त्रे सर्वकर्मसिद्ध्यर्थं प्रोक्तानि। श्रोतृविश्वासायैतदुक्तिः।।१३।।

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधा च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्।। १४।।

प्रतिज्ञातमाह– **अधिष्ठानमिति।।** अधिष्ठानं देहभूम्यादिः। कर्ता विष्णुः। पृथग्विधं करणं इन्द्रियस्रुक्स्रुवादि। विविधा नानाप्रकारा, पृथक् परस्परभिन्ना, चेष्टा

हस्तादिक्रिया ध्यानरूपमानसक्रिया च। प्रधानहोमादिक्रियाहेतुभूता कारकाश्रितावान्तरक्रिया चेत्यर्थः। दैवमदृष्टम्। अत्र कर्म विषये। पञ्चमं कारणम्। यद्वा कर्तृपदेन पराधीनकर्ता जीवः। दैवपदेन विष्णुः कर्मणां कर्त्रादिकारकषट्कसाध्यत्वेऽपि इह कर्मापादानादेः अनुक्तिः असार्वत्रिकत्वात्तस्येति ज्ञेयम्।। १४।।

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः।। १५।।

तर्हि करणकारकं कुतो नोक्तमित्यतो वा कस्यैतानि कारणानीत्यतो वाऽऽह– **शरीरेति।।** अत्र शरीरमनोवाचामेव करणकारकत्वेनोक्त्या कर्मापादानादीनि न सार्वत्रिकाणीति सूचितम्।। १५।।

तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः।। १६।।

ततश्च किमित्यत आह– **तत्रैवं सतीति।।** तत्र कर्मणीश्वरादिपञ्चकस्यैवं करणत्वे सति जीवस्य स्वातन्त्र्याभावेन केवलं परप्रेरणां विना स्वतः क्रियाहीनमात्मानं कर्तारं स्वातन्त्र्येण कर्मकर्तारं यस्तु पश्यति मन्यते सोऽकृतबुद्धित्वात् श्रवणाद्यसंस्कृतबुद्धित्वाद्दुर्मतिः दुष्टबुद्धिः सन्न पश्यति तत्त्वविन्न भवतीत्यर्थः।। १६।।

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वापि स इमान् लोकान्न हन्ति न निबध्यते।। १७।।

एवं कर्तृत्वाभिमानिनं विनिन्द्य स्वस्य कर्तृत्वानभिमानिनं स्तौति– **यस्येति।।** यस्य पुंसः अहंकृतः मयाऽयमर्थः कृत इति भावः आशयः अहंकृतो भावः स्वातन्त्र्याभिमानो (नं) नास्ति। यस्य बुद्धिर्न लिप्यते फलरागादिलिप्तो न भवति सः स्वातन्त्र्यज्ञानहीनः इमान्लोकान्हत्वाऽपि न लिप्यते हननदोषयुक्तो न भवति। कुतः। न हन्ति, स्वातन्त्र्येण हन्मीति बुद्धिं न करोतीति वा। न निबध्यते तत्फलं नाप्नोतीत्यर्थः। एतच्चेश्वरसार्वज्ञस्वातन्त्र्यज्ञानी सन्नपि विश्वहननार्थं जातो रुद्रो यमो वा तद्विषयमिति बोध्यम्। अन्यस्य त्वपरोक्षिणोऽपि दोषकृदेवेति। वृत्रहत्यादिनेन्द्रादेरपि ईषद्बन्धोऽपीषदहंकारकृत एवेत्याकर एव व्यक्तम्। एवं कर्तृत्वाभिमान्यनभिमानिनोः सहेतुकं निन्दास्तुत्योरुक्त्या कर्मणि कर्तृत्वाभिमानत्यागोऽपि संन्यासशब्दार्थ इत्युक्तं भवति।। १७।।

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।
करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः।। १८।।

ननु जीवस्य स्वतः कर्तृत्वाभावे 'यजेतेत्यादि' विधीनां वैयर्थ्यं स्यात्। जडेश्वरमुक्तानां तदविषयत्वादित्यत आह– **ज्ञानमिति**।। विधिश्चोदना प्रेरणेति पर्यायः। कर्मचोदना यजेतेत्यादिकर्मसु प्रेरणा। 'ज्ञानं ज्ञेयं परिज्ञाते' तीतिशब्दो योज्यः। त्रिविधा ज्ञानादिरूपेण त्रिविधा। ज्ञानं विधिविषयं (यकं) ज्ञेयं, चेष्टाप्रयत्नरूपप्रवृत्तिलक्षणं पुरुषार्थलक्षणं च। परिज्ञाता तु (अधिष्ठानलक्षणं) सर्वज्ञसर्वप्रेरकेश्वरसन्निहितो जीवराशिः। तत्त्रितयनिमित्तं कर्मचोदना प्रवर्तत इति। 'दधित्रपुसं प्रत्यक्षो ज्वर' इत्यादाविव निमित्तनिमित्तिनोरभेदोपचारेण निमित्तत्रैविध्येन नैमित्तिकचोदनाऽपि त्रिविधेत्युपचर्यते। 'यजेतेत्यादि' श्रौतस्मार्तविधौ सति स्वप्रवृत्तिविषयप्रेरणाज्ञानं भवति। ततश्चेच्छाप्रयत्नरूपप्रवृत्तिरात्मसन्निहितेश्वरप्रेरणया पुमर्थमुद्दिश्य कर्मणि जीवस्य भवति इति विधिज्ञानादेः कर्मचोदनायाश्च निमित्तनिमित्तिभावो ध्येयः। न च स्वतः कर्तृत्वाभावात्पराधीनकर्तृजीवस्य विधिज्ञानद्वारा कथं प्रवृत्त्याद्यर्थं विधिविषयत्वमिति शंक्यम्। अपराधीनकर्तृत्वस्य विधिविषयतायां प्रयोजकत्वेन क्वाप्यनुपलम्भेनान्वयव्यतिरेकाभ्यां पराधीनकर्तृशक्तिकस्यैव विधिविषयत्वावश्यंभावात्। जडेश्वरमुक्तानां विध्यविषयत्वेन प्रमाणभूतविधेर्वैयर्थ्यायोगाच्च। पराधीनकर्तुरेव परिशेषप्रमाणे(ना)ऽपि विधिविषयत्वस्यावश्यकत्वाच्च। तस्माज्जीवे विध्यविषयेभ्यो जडेश्वरमुक्तेभ्यो व्यावृत्तस्य स्वसम्बन्धितया विधिज्ञानस्य तज्जन्यायाः फलतत्साधनेच्छायाः साधनविषयकृतेश्चानुभवसिद्धत्वात्, तस्य च ज्ञानादेः 'न ऋते त्वत्' (ऋ० १०-११३-९) इत्यादिश्रुतिभिरीश्वराधीनत्वेऽप्यस्वतंत्रकर्तृत्वमात्रेण विधिविषयत्वं कर्मफलभाक्त्वं च युक्तम्। तदुक्तं गीताभाष्ये। 'अकर्तृत्वेऽपि विधिद्वारा ईश्वरप्रसादा- दिच्छोत्पत्त्योक्तकारणैः कर्मद्वारा पुरुषार्थो भवतीति न प्रवृत्तिविधिवैयर्थ्यम्' इति। यद्वा 'दैवं चैवेति' पूर्वत्र दैवपदेनेश्वरस्य कर्मसु प्रेरकत्वमुक्तम्। तत्प्रेरणास्वरूपमुच्यते– **ज्ञानमिति**।। कर्मचोदना कर्मसु जीवानां ईश्वरप्रेरणा। ज्ञानं ज्ञेयं परिज्ञातेति त्रिविधा। ज्ञानज्ञेयपरिज्ञातृरूपत्रिविधभगवत्स्वरूपेत्यर्थः। विशेषबलाद्धर्मधर्मिभावः तस्येयं प्रेरणेत्याद्युक्तिश्च युक्तेति भावः। पूर्वोक्तपञ्चकर्मकारणानि संक्षिप्याह– **कारणमिति**।। करणं इन्द्रियस्त्रुक्स्रुवादि। अधिष्ठानपदोक्तदेहादिकमदृष्टं च। कर्म हस्तादिचेष्टा, कर्तृपदेन जीवेश्वरावुभावपि ग्राह्याविति त्रिविधः कर्मसंग्रहः कर्मकरणसंग्रहः। पञ्चकारणानां संक्षेप इति।। १८।।

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि।। १९।।

सात्त्विकज्ञानकर्मादेः मुक्तिहेतुत्वात्तदनुष्ठानाय सत्वादिगुणनिमित्तान् ज्ञानादि-

भेदान्प्रतिज्ञापूर्वमाह— **ज्ञानमिति**।। सत्त्वादिगुणभेदतः ज्ञानादिकं प्रत्येकं त्रिविधम्। गुणसंख्याने गुणाः संख्यायन्ते यत्र तस्मिन्वैदिकसांख्यशास्त्रे प्रोच्यते। तान्यपि यथावद्यथास्थितं शृणु।। १९।।

सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्।। २०।।

प्रतिज्ञातं ज्ञानत्रैविध्यं तावदाह— **सर्वेत्यादित्रयेण**।। विभक्तेषु परस्परं भिन्नेषु तारतम्योपेतेषु च सर्वभूतेषु, भवन्ति विद्यन्त इति भूतानि जीवाः प्रकृत्यादिजडानि च। सर्वेषु जीवेषु जडेषु च। तदाधारकत्वेन तेभ्यो भिन्नत्वेनेति सप्तम्यभिप्रायः। भावं सदा विद्यमानं विष्णुम्। एकं प्रधानम्। सर्वोत्तममिति यावत्। अविभक्तं सर्वत्र स्थितावपि अधिष्ठानभेदनिमित्तभेदहीनम्। 'ॐ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॐ' इति (३-२-११) सूत्रोक्तदिशा सर्वत्र निर्दोषाशेषसद्गुणतया ऐक्येन स्थितमिति यावत्। अव्ययं स्वतोऽधिष्ठानव्ययेन च व्ययहीनम्। येन ज्ञानेनेक्षते विषयीकरोति तज्ज्ञानं सात्त्विकं विद्धि जानीहीति।। २०।।

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्।। २१।।

यज्ज्ञानं सर्वभूतेषु पृथक्त्वेन वेत्ति सर्वजीवजडानि अन्तर्भेदयुतत्वेन विषयीकरोति इत्यस्यैव व्याख्या नानेत्यादि। नानाभावान्नानाप्रकारभूतजीवजडरूपपदार्थान्पृथग्विधान्परस्परं भिन्नान्नीचोच्चतया स्थितांश्च वेत्ति विषयीकरोति। विष्णोरन्यत्र यथार्थमिति यावत्। उपलक्षणमेतत्। संदिग्धतया भगवत्स्वरूपविषयकं च। तज्ज्ञानं राजसमित्यर्थः। तुशब्देन वाऽयमर्थो ग्राह्यः। तेनेश्वरादन्यत्र यथार्थज्ञानस्य सात्त्विकत्वात्कथं राजसत्वमिति निरस्तं बोध्यम्। ईश्वरविषये संशयरूपत्वस्याधिकस्यापि भावात्।। २१।।

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्।। २२।।

।। **यत्त्विति**।। कार्यशब्दोऽत्र संसारिणं मुक्तत्वेन क्रियमाणत्वहेतुना जीवपरः। कृत्स्नशब्दो ब्रह्मपरो जगत्परश्च। अयमर्थः— एकस्मिन्कार्ये जीवे कृत्स्नवद्ब्रह्मवत्। यज्ज्ञानं सक्तम्। कोऽर्थः ब्रह्म यथा स्वात्मानं विषयीकरोति ब्रह्मेति तथा जीवं ब्रह्मेति यज्ज्ञानं विषयीकरोतीत्यर्थः। जीवे ब्रह्मा भेदविषयकं यज्ज्ञानं तत्तामसमिति यावत्। तथा एकस्मिन्कार्ये जीवे कृत्स्नवज्जगद्वद्यज्ज्ञानं सक्तम्। प्रपञ्च यथा विषयी

करोति प्रपञ्चोऽयमिति, तथा जीवं यज्ज्ञानं विषयीकरोति जीवं जगदात्मकत्वेन विषयीकुर्वद्यज्ज्ञानं तत्तामसमिति यावत्। तथा एकस्मिन् कार्ये जीवे कृत्स्नवद्यज्ज्ञानं सक्तम्। एकमेव जीवं कृत्स्नजगदात्मकत्वेन यद्विषयीकरोति। एकजीवकल्पितं जगदिति यज्ज्ञानं विषयीकरोतीति त्रि(त्रै)धाऽर्थः। किंच यज्ज्ञानमहेतुकं युक्तिशून्यम् अतत्त्वार्थवदसत्यविषयकं सदसद्विलक्षणाद्यविद्यमानाकारकल्पनायुक्तमिति यावत्। अल्पं बहुलाज्ञानयुतत्वेन धर्मेणाल्पज्ञानसदृशं च यत्तत्तामसम्। अत्र ब्रह्मवदिति जीव इति च वाच्ये कृत्स्नवदित्युक्तिः जगतोऽपि ग्रहणाय। तेनाकार्यत्वादिकृत्स्नगुणपरिपूर्णत्वेन कृत्स्नपदोक्तब्रह्मणा कार्यत्वादिना तदधीनस्य जीवस्याभेदज्ञानं मिथ्याज्ञानत्वात्कथं न तामसमिति तामसत्वोपपादनायेति। कार्य इत्येव वाच्ये एकस्मिन्नित्युक्तिः एकजीवमतस्य संग्रहायेति। अत्र यद्यप्येकस्मिन्कार्यशब्दिते जीवे कृत्स्नवदकार्यत्वादिगुणपरिपूर्णब्रह्मवज्जगद्वच्च यज्ज्ञानं सक्तमित्यस्य चैकं जीवं ब्रह्मात्मकत्वेन जगदात्मकत्वेन च विषयीकारि यज्ज्ञानमित्यर्थः। तादृशं च ज्ञानमहेतुकम् अतत्त्वार्थमल्पं च भवत्येवेति पुनरहैतुकमित्याद्युक्तिः पुनरुक्तिरेव। तथाऽप्यहेतुकज्ञानादित्रितयम् प्रत्येकं एकैकं तामसम्। पूर्वार्धोक्तमिथ्याज्ञानरूपविशेषणसहितमतितामसमिति वक्तुम् इति ज्ञेयम्। यद्वा सामानाधिकरण्येन पदानां विशेषणविशेष्यभावः। एवं च कार्ये जीवे कृत्स्नवज्जगद्वद्यत्सक्तं एकस्मिन्कार्ये जीवे कृत्स्नवद्ब्रह्मवद्यत्सक्तम्। यदहैतुकं यच्चातत्त्वार्थवदसत्यार्थकल्पनायुक्तम्। यच्चाल्पम्। तानि सर्वाण्यपि षड्विधाज्ञानानि प्रत्येकं तामसानीति योजना। अतो न पुनरुक्तिशंकाऽवकाश इति।। २२।।

नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते।। २३।।

प्राक्प्रतिज्ञातं गुणकृतकर्मत्रैविध्यम् आह— **नियतमित्यादित्रिभिः।।** हरेः सर्वोत्तमत्वज्ञानभक्तिपूर्वकं तदर्पणबुद्ध्या क्रियमाणस्ववर्णाश्रमोचितं हि नियतमित्युच्यते। 'मयि सर्वाणि' इत्यादौ भगवत्सर्वोत्तमत्वज्ञानतद्भक्तिपूर्वकं तदर्पणबुद्ध्या कर्मकरणस्य विधानात्। 'ये मे मतम्' (३-३१) इत्यादौ तस्यैव मुक्तिहेतुत्वोक्तेः यत्करणे फलप्राप्तिः यदकरणे च प्रत्यवायः तस्यैव नियतत्वात्। सङ्गरहितं मदीयतास्नेहहीनम्। कीर्त्यादौ रागदिहानतः अकीर्त्यादौ द्वेषत्यागतः कृतं फलप्राप्तीच्छाहीनेन कृतं यत्तत्कर्म सात्त्विकमुच्यत इत्यर्थः।। २३।।

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्।। २४।।

यत्तु कामेप्सुना फलप्राप्तीच्छावता कर्तृत्वाभिमानसहितेन च। पुनःशब्दः समुच्चये। बह्वायासयुक्तं च क्रियते तत्कर्म राजसं उदाहृतम्।। २४।।

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते।। २५।।

अनुबन्धं कर्मान्तरमेवानुबध्यमानं, क्षयं नाशं, हिंसां परपीडां च अनवेक्ष्य पौरुषमात्मनः कर्मसामर्थ्यं चानवेक्ष्य अविमृश्य मोहादहंकर्तेति मिथ्याज्ञानाद्यत् कर्मारभ्यते तत्तामसमुच्यत इत्यर्थः।। २५।।

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते।। २६।।

प्राक् प्रतिज्ञातं गुणकृतकर्तृत्रैविध्यमाह।। **मुक्तेत्यादित्रिभिः**।। मुक्तसङ्गः फलस्नेहहीनः, सर्वस्य भगवदधीनत्वनिश्चयादेवाहं कर्तेति न वदतीत्यनहंवादी। आत्मकर्तृत्वाभिमानहीन इति यावत्। धृतिः कर्मण्यवर्जनीयदुःखसहनम्। उत्साहः कर्मकातरता। ताभ्यां समन्वितः, सिद्ध्यसिद्ध्योर्निर्विकारः फलस्य सिद्धावसिद्धौ वा हर्षविषादहीनः स कर्ता सात्त्विक उच्यत इत्यर्थः।। २६।।

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः।। २७।।

रागी कीर्त्यादिकामः। कर्मफलप्राप्तीच्छावान्। लुब्धः कर्मण्यपेक्षितद्रव्यव्ययहीनः। हिंसात्मकः हिंसास्वभावः। अशुचिः द्रव्यादिषु शुद्धिहीनः। कार्यसिद्ध्य- सिद्ध्योः हर्षशोकान्वितः स कर्ता राजसः।। २७।।

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते।। २८।।

अयुक्तः भगवदर्पणादियोगरहितः। प्रकृष्टोः अकृतः प्राकृतः। 'भगवद्भक्तिसामर्थ्यात्प्रकृष्टो न कृतो हि यः। स प्राकृतो' इति (शब्दतत्त्वे) स्मृतेः। स्तब्धः आत्मसंभावनया क्काप्यनम्रः। शठः गूढद्वेषेण कर्मकारी। नैष्कृतिको नीचकर्मकृत्। प्राप्तकालेऽपि कर्मण्युदासीनोऽलसः। विषादी सर्वव्यापारोपरतिहेतुमनोदौर्बल्यवान्। प्राप्तेऽपि कर्मकाले पश्चात्कुर्यामिति ध्यायन्वा, परकृतदोषं दीर्घकालकृतमप्यनुचितं सूचयन्वा दीर्घसूत्री। स तामसः कर्तेत्यर्थः।। २८।।

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय।। २९।।

एवं ज्ञानकर्मकर्तॄणां गुणकृतं त्रैविध्यं निरूप्याधुना बुद्धेः धृतेश्च गुणतः त्रैविध्यं प्रतिज्ञापूर्वमाह— **बुद्धेरित्यादिभिः सप्तभिः।।** गुणतः सत्त्वादिगुणभेदतो निमित्तात्त्रिविधमेव। बुद्धेर्भेदं धृतेश्च भेदं पृथक्त्वेन मया प्रोच्यमानमशेषेण शृणु। श्रुत्वा निष्ठां कुरु।। २९।।

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी।। ३०।।

बुद्धेर्भेदमाह— **प्रवृत्तिमित्यादित्रिभिः।।** प्रवृत्तिं संसारहेतुं प्रवृत्तिहेतुं धर्मं च, निवृत्तिं निवृत्तिहेतुधर्मं च। कार्याकार्ये कर्तव्यमकर्तव्यं च। तन्निमित्तभयाभये बन्धमोक्षप्रकारं च या बुद्धिर्वेत्ति सा सात्त्विकीत्यर्थः। कर्तृत्वोपचाराद्या वेत्तीत्युक्तम्। यया वेत्ति पुमानित्यर्थः।। ३०।।

यया धर्ममधर्मं च कार्यं चाकार्यमेव च।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी।। ३१।।

।। **ययेति।।** धर्मादिकं यया बुद्ध्या अयथावत्प्रजानाति नियमेन यथावन्न जानाति। किंचिद्यथावत्किंचिदयथावज्जानातीति यावत्। याथार्थ्यनियमहीना या बुद्धिः सा राजसीत्यर्थः।। ३१।।

अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी।। ३२।।

या च बुद्धिरधर्मं धर्ममिति मन्यते। नैतावन्मात्रं किंतु तमसावृता अज्ञानेनावृता सती सर्वार्थान्विपरीतान्। यैराकारैरर्थाः वर्तन्ते ततो विपरीतैरसत्यत्वानीश्वरत्वापराधीनत्वक्षणिकत्वादिप्रकारैश्च मन्यते सा बुद्धिः तामसीत्यर्थः।। ३२।।

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी।। ३३।।

प्रतिज्ञातं धृतेस्त्रैविध्यमाह— **धृत्येत्यादित्रिभिः।।** अव्यभिचारिण्या विहितविषयया। योगेन भगवद्भक्तियोगेन युक्त्येति शेषः। यया धृत्या मनसः प्राणस्येन्द्रियाणां च क्रिया धारयते। सा धृतिः सात्त्विकीत्यर्थः।। ३३।।

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी।। ३४।।

यया धृत्या धर्मकामार्थान्धारयते। प्रसङ्गेन प्रकृष्टेन, कर्मणि मदीयतास्नेहेन फलाकाङ्क्षी धृतिः सा राजसीत्यर्थः।। ३४।।

यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधाः धृतिः सा पार्थ तामसी।। ३५।।

यो दुर्मेधाः दुष्टबुद्धिः पुरुषः यया धृत्या स्वप्नमतीवनिद्रां भयं शोकं दुःखं विषादं मनोदौर्बल्यं मदं च। स्वप्नाद्युपलक्षितं सर्वं निषिद्धं भगवद्द्वेषादि न विमुञ्चति सा तामसीत्यर्थः।। ३५।।

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति।। ३६।।

यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्।। ३७।।

प्रतिज्ञापूर्वं गुणतः सुखस्य त्रैविध्यमाह— **सुखं त्विति।।** यत्र यस्मिन्सुखे चिरकालमभ्यासात्पुनः पुनः रमते। दुःखान्तं दुःखनाशं च नितरां गच्छति प्राप्नोति तत्सुखं त्रिविधमित्यर्थः। यद्वा पूर्वार्धमेव प्रतिज्ञापरम्। उत्तरार्धं 'यत्तदिति' श्लोकश्च सात्त्विकसुखोक्तिपरः। यत्प्रसिद्धं सुखमग्रे पूर्वं विषमिव आयाससाध्यत्वात्। परिणामे विपाके अमृतसदृशमत्मबुद्धिप्रसादजम् आत्मनो विष्णोः प्रसादादनुग्रहाज्जातम्। बुद्धेः प्रसादाच्च। बुद्धेः प्रसादो नाम स्वतो विषयेष्वप्रवृत्तिः। ततो जातं च यत्तत्सुखं सात्त्विकमित्यर्थः।। ३६।। ३७।।

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम्।
परिणामे विषमिव तत्सुखं राजसं स्मृतम्।। ३८।।

विषयेन्द्रियसंयोगाच्छब्दादिविषयाणां श्रोत्रादीन्द्रियाणां संयोगेनोत्पन्नविषयानुभवेन जायमानं यत्तत्प्रसिद्धं सुखम् अग्रे प्रथमममृतसदृशम्। विपाके त्रिषमिव दुःखावहत्वात्। तत्सुखं राजसमित्यर्थः।। ३८।।

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्।। ३९।।

यत्सुखमग्रे चानुबन्धे च पश्चात् विपाककाल इति यावत्। आत्मनः स्वस्य मोहनं मोहकरं पारवश्यकृत्। निद्रालस्यप्रमादैरुत्थितम् उत्पन्नम्। आलस्यं शरीरमान्द्यम्। प्रमादः अधर्मे बुद्धिः। तत्सुखं तामसमित्यर्थः।। ३९।।

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः।। ४०।।

सर्वजीवानां गुणत्रयबद्धत्वेन त्रैविध्यमाह— **न तदस्तीति**।। यत्सत्त्वं जीवजातं प्रकृतिजैरेभिस्त्रिभिः सत्त्वादिगुणैः मुक्तं स्यात्। तत्सत्त्वं पृथिव्यां दिवि देवेषु वा। पुनःशब्दः समुच्चये। नास्ति। मुक्तव्यावृत्त्यर्थं पृथिव्यामित्याद्युक्तिः। तत्रायं विवेकः। सात्त्विकराजसतामसभेदेन जीवास्त्रिविधाः। सात्त्विकादयोऽपि प्रत्येकं त्रिविधाः। पितृगंधर्वपूर्वकाः सात्त्विकतामसाः। मुनयः सात्त्विकराजसाः। देवाः सात्त्विकसात्त्विकाः। सात्त्विकसात्त्विकेष्वपि बृहस्पत्यादयः सात्त्विकसात्त्विकतामसाः। इन्द्रः सात्त्विकसात्त्विकराजसः। ब्रह्मादिरुद्रावसानाः सात्त्विकसात्त्विकसात्त्विकाः। तेष्वपि रुद्रः सात्त्विकसात्त्विकसात्त्विकतामसः, ब्रह्माणीभारत्यौ तादृग्राजस्यौ। ब्रह्मवायू तु सात्त्विकसात्त्विकसात्त्विकसात्त्विकावेवेति। मध्यमोत्तमनराः राजसाः, तेऽपि प्रत्येकं त्रिविधाः। तेषु विप्रादिपुल्कसान्ताः ये भगवताः ते राजससात्त्विकाः। राजससात्त्विकेष्वपि विप्रा राजससात्त्विकसात्त्विकाः। क्षत्रियास्तु स्वल्परजोयुक्ततया राजसराजससात्त्विकाः। वैश्यास्तु समसत्त्वरजोयुक्ततया राजसराजससात्त्विकाः। शूद्रास्तु तमसोऽल्पत्त्वेन रजोऽधिकेन युक्ततया तामसराजससात्त्विकाः। राजससात्त्विकसात्त्विकविप्रेष्वपि ये शुद्धसत्त्वात्मकाः ते परमहंसशब्दिताः शिखायज्ञोपवीतहीनाः एकदण्डिनः। किंचिद्रजोयुक्तसत्त्ववन्तो हंसशब्दिताः यज्ञोपवीतवन्तः एकदण्डिनः शिखाहीनाः। ततोऽधिकरजोयुक्तसत्त्ववन्तः त्रिदण्डिनः शिखायज्ञोपवीतवन्तो ग्रामैकरात्रिचराः बहूदकसंज्ञकाः। ततोऽप्यधिकरजोयुक्तसत्त्ववन्तस्त्रिदण्डिनः शिखायज्ञोपवीतवन्तो यावज्जीवं पुत्रदत्ताशनाः कुटीचकाः। तामसा अपि सात्त्विकादिभेदेन त्रिविधाः। तत्र नराधमाः सात्त्विकतामसाः। दैत्यभृत्या राजसतामसाः। महादैत्यास्तामसतामसा इति।। ४०।।

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः।। ४१।।

इदानीं ब्राह्मणाद्यधिकारिगुणकृतकर्माणि भिन्नानि सन्तीत्याह— **ब्राह्मणेति**।। त्रैवर्णिकानामिव द्विजन्मत्वं नेति द्योतनाय शुद्राणामिति पृथङ्निर्देशः। स्वभावप्रभवैः

ब्राह्मणादितत्तत्स्वभावानुबन्धिभिः सत्त्वादिगुणैः कर्माणि प्रविभक्तानि तानि मे शृण्विति भावः।। ४१।।

शमो दमस्तपश्शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम्।। ४२।।

तत्र चतुर्वर्णकर्माणि क्रमात्त्रिभिराह– **शम इत्यादिभिः**।। शमो भगवन्निष्ठा बुद्धिः। दम इन्द्रियनिग्रहः। तपो ब्रह्मचर्यादि। शौचं बाह्याभ्यन्तरशुद्धिः। क्षान्तिः क्रोधानुत्पत्तिः। आर्जवं मनोवाक्कायकर्मणामवैपरीत्यम्। ज्ञानं सामान्यतः। विज्ञानं विशेषतः। आस्तिक्यं धर्मादावस्त्यनेन प्रयोजनमिति भावना। एतत्सर्वं स्वभावजं सहजं ब्राह्मं ब्राह्मणसंबन्धि कर्मेति।। ४२।।

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।। ४३।।

शौर्यमभीरुत्वम्। तेजः शरीरगतवर्चोविशेषः। धृतिर्धैर्यम्। दाक्ष्यं पाटवम्। युद्धे चाप्यपलायनं भीत्या युद्धादनिवर्तनम्। दानं गोभूतिलहिरण्यादेः पात्रे प्रतिपादनम्। ईश्वरभावो दण्डनादिकर्तृत्वम्। 'प्रसह्य वित्ताहरणं शारीरो दण्ड एव च। अशिष्टानां शासनं च तथैवार्थविनाशनम्। एष ईश्वरभावः स्यान्न कार्यः क्षत्रियेतरैः' (व्यासस्मृतिः) इति स्मृतेः। एतत्सर्वं स्वभावजं क्षत्रियसंबन्धि कर्मेत्यर्थः। अत्र ब्राह्मणधर्माः शमादयोऽपि तेभ्यः किंचिदूनाः क्षात्रधर्मेष्वपि ग्राह्याः। शमादेर्ब्राह्मणधर्मतोक्तिस्तु क्षत्रियधर्माद्यपेक्षयाऽऽधिक्यविवक्षयैव। येषु चक्रवर्तिषु विप्रेभ्योऽधिकशमादयः तेऽत्र न विवक्षिताः। किंतु तदन्य एवेति ज्ञेयम्। क्षत्रधर्मा अपि विप्रादिषु क्रमादूना ज्ञेयाः।। ४३।।

कृषिगोरक्षवाणिज्यं वैश्यं कर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।। ४४।।

कृषिः कर्षणेन जीवनं, गवां पालनं वाणिज्यं वार्तया जीवनम्। अत्रापि क्षत्रियादूनाः शमादयोऽपि वैश्यकर्ममध्ये ग्राह्याः। परिचर्यात्मकं त्रैवर्णिकसेवारूपम्। अत्रापि वैश्यादूनशमादिकं च ग्राह्यम्।। ४४।।

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु।। ४५।।

अस्त्वेवं ब्राह्मणादिकर्म प्रविभक्तम्। ततः किमित्यत आह– **स्वे स्व इति।।** प्रागुक्तब्राह्मणादिस्वकीये कर्मण्यभिरतः स्वस्वकर्मणा भगवदाराधनं कुर्वन्नरः संसिद्धिं मुक्तिं ज्ञानद्वारा लभते प्राप्नोति। एतदेव सम्यग्विशदयितुं प्रतिजानीते– **स्वकर्मेति।।** विन्दति लभते। तत्तं प्रकारं शृणु इति।। ४५।।

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।। ४६।।

यतो यस्माद्भगवतो भूतानां प्राणिनां प्रवृत्तिः चेष्टा भवति। येन च भगवता इदं सर्वं चराचरात्मकं जगत्ततं व्याप्तं तं भगवन्तं स्वकर्मणा समभ्यर्च्य शमदमादिपूर्वकं पूजयित्वा सिद्धिं मोक्षं विन्दति लभते मानवः मनुष्यो ब्राह्मणादिरित्यर्थः।। ४६।।

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्।। ४७।।

स्वधर्मनिरतत्वमावश्यकमित्येतदुपपादयति– **श्रेयानिति।।** विगुणोऽङ्ग-हीनोऽपि स्वधर्मः सम्यगनुष्ठितात्परधर्माच्छ्रेयान्पुमर्थसाधनम्। विगुणः कथं श्रेयानित्यत आह– **स्वभावेति।।** किल्बिषं वैगुण्यकृतदोषं नाप्नोति। वैगुण्यशंकया स्वधर्मत्यागो न कार्यः।। ४७।।

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः।। ४८।।

वैगुण्यदोषस्य सर्वत्रावर्जनीयत्वादित्याह– **सहजमिति।।** हि यस्मात्सर्वारम्भाः सर्वकर्माणि धूमेनाग्निरावृत इव दोषेणावृता एव, ततः सदोषमपि सहजं कर्म न त्यजेदिति।। ४८।।

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति।। ४९।।

'स्वकर्मनिरतः सिद्धिं विन्दति' इत्यत्रापेक्षितधर्मान्तराण्याह।। **असक्तेति।।** सर्वत्र शब्दादिविषयेषु। असक्तबुद्धित्वे हेतुर्जितात्मेति। वशीकृतमनस्कः वैषयिकसुखे क्षुद्रामुष्मिकसुखे चापगतेच्छः। परमां संपूर्णां नैष्कर्म्यसिद्धिं नैष्कर्म्याय मोक्षाय सिद्धिं उपायसिद्धिं प्रारब्धान्यसर्वानिष्टकर्मनाशाख्यां सिद्धिं वा। संन्यासेन काम्यकर्मत्यागेन सर्वकर्मणां भगवति समर्पणेन वाऽधिगच्छति प्राप्नोति।। ४९।।

सिद्धिं प्राप्तो यथा ब्रह्म तथाऽऽप्नोति निबोध मे।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा।। ५०।।

प्रतिज्ञापूर्वं नैष्कर्म्यसिद्धिसाधनं विवृण्वन्, तदनन्तरफलमाह— **सिद्धिमिति**।। या नैष्कर्म्याय सिद्धिः ज्ञानस्य परिनिष्ठा तां नैष्कर्म्यसिद्धिं येन प्रकारेण प्रवर्तमानः प्राप्तो भूत्वा अपरं ब्रह्म लक्ष्मीमाप्नोति तं प्रकारं संक्षेपतो मे निबोध बुध्यस्व।। ५०।।

बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च।। ५१।।

प्रतिज्ञातमाह— **बुद्ध्येति**।। विशुद्धया विषयेष्वसक्तया बुद्ध्या युक्तः। धृत्या धैर्येण स्तम्भनशक्त्या आत्मानं (मनो) नियम्य विषयेभ्यो निवर्त्य च शब्दादीन् विषयान् त्यक्त्वा तदनुभवेच्छां विहायेति यावत्। अस्य यद्रागद्वेषौ यौ रागद्वेषौ तौ च त्यक्त्वा। व्युदस्येति पाठे तु न क्लेशः।। ५१।।

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः।। ५२।।

विविक्तसेवी जनसंमर्दहीनदेशवासी, लघ्वाहारवान्। यतवाक्कायमानसः सद्विषय एव नियमितवागादिः। नित्यं ध्यानरूपोपायपरः। वैराग्यं समुपाश्रितः।। ५२।।

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते।। ५३।।

अहंकारं स्वकर्तृत्वाभिमानम्, बलं स्वसमर्थताभिमानम्, दर्पं भीतिहेतोरदृष्टिम्, कामं विषयाभिलाषम्, क्रोधं परिग्रहं च विमुच्य, निर्ममः कर्मणि मदीयताबुद्धिहीनः, शान्तः हेतुभिरप्यनुत्थितकोपः, ब्रह्मभूयाय ब्रह्मणि स्थितिर्ब्रह्मभूयं तस्मै सर्वदा ब्रह्ममनस्कत्वायेत्यर्थः। कल्पते समर्थो भवति।। ५३।।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्।। ५४।।

ततः किमित्यत आह— **ब्रह्मभूत इति**।। ब्रह्मणि स्थितमनस्कः लक्ष्मीं प्राप्तः प्रसन्नात्मा स्वत एव विषयेष्वप्रवृत्तमनाः। न शोचति न काङ्क्षति। सर्वेषु भूतेषु समः, परां भक्तिं लभते।। ५४।।

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।। ५५।।

ततश्च किमित्यत आह– **भक्त्येति।।** अहं यावान्देशकालगुणैर्यावान् व्याप्तोऽस्मि। यश्च यन्नामा यद्रूपश्चास्मि तादृशं मां प्रागुक्तया परमभक्त्या तत्त्वतः। अभि स्वयोग्यतानुसारेण जानाति। तेनापि किमित्यत आह– **तत इति।** भक्तिबलात्तत्त्वतो मां ज्ञात्वा तदनन्तरं मां विशते। मदनुप्रविष्टो भवति मुक्तो भवतीत्यर्थः।। ५५।।

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्।। ५६।।

पुनरन्तरङ्गसाधनान्युक्त्वा शास्त्रार्थमुपसंहरति– **सर्वेति।।** यद्वा 'यतः प्रवृत्तिर्भूतानां' इत्यत्र स्वकर्मणा तमभ्यर्च्येत्युक्तम्। तत्र कर्मकरणे विशिष्य फलं व्यनक्ति।। **सर्वेति।।** मद्व्यपाश्रयः मय्येव समर्पयन्नेव सर्वाणि विहितानि कर्माणि सदा कुर्वाणः मत्प्रसादाच्छाश्वतं पदमव्ययं मत्स्वरूपमवाप्नोति। शाश्वतमव्ययमिति कूटस्थतयाऽऽद्यन्तहीनमित्यर्थः। अत्र अपिशब्दो नैकमपि कर्म अतदाश्रयेण कार्यमित्यर्थसूचनाय।। ५६।।

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव।। ५७।।

यदि भगवदाश्रयेण विहितकर्म कुर्वतो मुक्तिस्तर्हि त्रैविद्यस्यापि सा स्यात्। तस्यापि विहितकर्मकरणभगवदर्पणयोः सत्त्वेन भगवदाश्रयत्वादित्यत आह– **चेतसेति।।** चेतसा सर्वाणि कर्माणि मयि संन्यस्य समर्प्य मत्परः अहमेव परः सर्वोत्तम इति भावो यस्य स मत्परः भव। किंच बुद्धियोगं बुद्धेर्योगं प्रत्याहारादिरूपमुपायमाश्रित्य मच्चित्तः मय्येव निरुद्धचित्तः सततं भवेत्युक्त्या त्रैविद्यस्यैवंरूपत्वाभावान्न तस्य मुक्तिशंकेति भावः।। ५७।।

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि।। ५८।।

भगवच्चित्तस्य फलमाह– **मच्चित्त इति।।** मच्चित्तो मय्येव निरुद्धमनस्कः। सर्वाणि दुर्गाणि दुस्तराणि दुःखेन तर्तव्यानि कष्टानि मत्प्रसादात्तरिष्यसि। एवं स्वविहितवृत्त्या भगवदाराधनस्य परमधर्मत्वाद्युद्धाख्यं स्वविहितकर्म भगवत्प्रीत्यर्थमेवावश्यं कार्यमित्येतावता प्रबन्धेन प्रतिपादितम्। तदकरणेऽनिष्टमाह– **अथ चेदिति।।** अर्थान्तरे अथ शब्दः। अहं न योत्स्यामीत्यहंकारात् युद्धस्वेति मदीयवचनं त्वं न

श्रोष्यसि चेत् श्रुत्वा न करोषि चेत्। विनङ्क्ष्यसि पुरुषार्थहीनो भविष्यसि मद्वचनाकरणे विनाश इत्यभ्युपेत्योक्तम्।। ५८।।

यदहंकारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैव व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति।। ५९।।

मदुक्ताकरणमशक्यं च तवेत्याह– **यदिति**।। मिथ्यैव वृथैव ते व्यवसायः निश्चयः। कुतः? प्रकृतिरितीश्वरेच्छा। त्वां नियोक्ष्यति प्रेरयति।। ५९।।

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्।। ६०।।

ईश्वरेच्छाया जीवनियमे निमित्तत्वादिकं दर्शयन्नुक्तं विवृणोति।। **स्वभावजेनेति**।। स्वभावः संस्कारस्तज्जातेन स्वेन कर्मणा निबद्धः। हे कौन्तेय– यत्कर्म मोहाद्बन्धुस्नेहमोहात्कर्तुं नेच्छसि। तत्कर्मावशोऽपि स्वानधीनोऽपि भगवदिच्छाधीनोऽपि सन् करिष्यसि।। ६०।।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया।। ६१।।

नन्वीश्वरेच्छायाः प्रवर्तकत्वे, ईश्वरः प्रवर्तको नेति शंकामीश्वरस्वरूपं दर्शयन्परिहरति– **ईश्वर इति**।। ईश्वरः यन्त्रारूढानि यन्त्राणि शरीराणि तदारूढानि तत्रस्थानि भूतानि प्राणिनः मायया स्वरूपभूतेच्छया भ्रामयन्नानाकर्मसु प्रवर्तयन्सर्वभूतानां हृद्देशे तिष्ठति।। ६१।।

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।। ६२।।

यस्मादेवमीश्वर एव स्वतन्त्रः जीवास्तदधीनास्तस्मादहंकारमुत्सृज्य तमेवेश्वरं सर्वभावेन सर्वप्रकारेण शरणं गच्छ याहि। मां शरणं याहीति वक्तव्ये ईश्वरस्तिष्ठति तं शरणं याहीति परोक्षनिर्देशः कृष्णस्येश्वरत्वनिश्चयार्थत्वाभिप्रायेण। 'निश्चयार्थः स तु ज्ञेयो यत्रात्मैव परोक्षतः। उच्यते' इति स्मृतेः। तत्प्रसादादीश्वरप्रसादात्परां शान्तिं बुद्धेर्भगवन्निष्ठताम्। शाश्वतं स्थानं वैकुण्ठादिलोकं प्राप्स्यसीति। वैण्कुठादिस्थानस्य शाश्वतत्वं च चित्प्रकृत्यात्मकत्वात्। 'श्रीरेव लोकरूपेण विष्णोस्तिष्ठति' इत्यादेः।। ६२।।

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु।। ६३।।

एवं भगवानर्जुनस्यातिगोप्यं तत्त्वमुपदिश्य तदनुवादपूर्वं तूष्णीं स्थितम् अर्जुनमाक्षिपति– **इतीति**।। गुह्याद्गुह्यतरं अतिगोप्यमिति प्रागुक्तप्रकारेण ज्ञानं ज्ञेयं ते तुभ्यं मया आख्यातम्। एतदशेषेण विमृश्य विचार्य यथेच्छसि तथा कुर्वित्याक्षेपः।। ६३।।

सर्वगुह्यतमं भूयः शृणु मे परमं वचः।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्।। ६४।।

तत्त्वसारमुपसंहृत्य साधनसारकथनमुपसंहर्तुं प्रतिजानीते– **सर्वेति**।। चतुर्दशादौ साधनसारस्योक्तत्वाद्भूय इत्युक्तम्। पुनरित्यर्थः। सर्वसाधनेषु गोप्यतमं मे परमं वचः शृणु मे इष्टोऽसि। दृढमिति निश्चयः। ततस्ते हितं वक्ष्यामि। उपसंहाररूपेण कथयिष्यामीत्यर्थः।। ६४।।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे।। ६५।।

तदाह– **मन्मना इति**।। यतो मे प्रियोऽसि। अतो मन्मनस्त्वादिसाधनसारचतुष्टयेन मामेवैष्यसि प्राप्स्यसि। ते सत्यं प्रतिजाने। अवश्यं मत्प्राप्तिर्भवतीति प्रतिज्ञां करोमि नात्र सन्देहः कार्य इति भावः।। ६५।।

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।। ६६।।

कथं मन्मनस्त्वादिकमित्यत उक्तं।। **सर्वधर्मानिति**।। अन्यसर्वधर्मान्परित्यज्य मन्मनाः मद्भक्तो मद्याजीत्येवम्। पूर्वशेषोऽयम्। ' मन्मना भवेत्यादिना' किमुक्तं भवतीत्यतस्तस्योपसंहाररूपेण व्याख्या क्रियते– **मामेकं शरणं व्रजेति**।। मन्मनस्त्वादेरेव शरणागतिरूपत्वात्। उक्तं हि। 'सर्वोत्तमत्वविज्ञानपूर्वं तत्र मनः सदा। सर्वाधिकप्रेमयुक्तं सर्वस्यात्र समर्पणम्।। अखण्डा त्रिविधा पूजा तद्रत्यैव स्वभावतः। रक्षतीत्येव विश्वासस्तदीयोऽहमिति स्मृतिः। शरणागतिरेषा स्याद्विष्णौ मोक्षफलप्रदा।।' (महाविष्णु पु०) इति। यद्वा 'सर्वधर्मान्परित्यज्ये' ति सर्वधर्मफलानि परित्यज्येत्यर्थः। अन्यथा युद्धविधिविरोधः स्यात्। यद्वाऽवैष्णवसर्वधर्मान्परित्यज्येत्यर्थः। अनादिजन्मकृतप्रतिबन्धक(स्य)सत्त्वात्कथं मामेव एष्यसीत्युक्तिरित्य आह– **अहं त्वेति**।। त्वा त्वामनादिजजन्मकृतपापेभ्यः मोक्षयिष्यामि विनिर्मुक्तं करिष्यामि। मा शुचः संसारभयाच्छोकं मा कार्षीः।। ६६।।

इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति।। ६७।।

गीताशास्त्रेऽनधिकारिनिरासेन लक्षण्याऽधिकारिणमाह।। **इदमिति।।** इदं गीताशास्त्रं तपोहीनाय ते त्वया न वाच्यम्। अशुश्रूषवे सेवामकुर्वते न वाच्यम्। तपोहीनोपदेशादप्यशुश्रूषोरुपदेशो महादोषकर इति सूचनायात्र चशब्दः। 'समुच्चयेऽथ-वाऽऽधिक्ये न्यूनत्वे चः प्रयुज्यत' (शब्दनिर्णये) इत्युक्तेः। चश्चकार इत्यर्थः। अशुश्रूषूपदेशादप्यभक्ताय कदाचन कदापि न वाच्यमित्युक्तिः अल्पमात्रतपःशुश्रूषा-वतो भक्तिमतः कदाचिदुपदेशेऽपि भक्तिहीनायोपदेशे महान्दोष इति सूचनाय। मां योऽभ्यसूयति तस्मै न वाच्यमित्यत्रापि चशब्दः तपोहीनादित्रितयोपदेशादप्यसूयावत उपदेशे दोषाधिक्यज्ञापनार्थः। एतेन तपःप्रभृतिगुणयुक्तोऽधिकारीति सूचितम्।। ६७।।

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः।। ६८।।

गीताशास्त्रस्य व्याख्यानं फलोक्त्या प्रशंसति– **य इत्यादिद्वाभ्यां।।** परमं गुह्यं अतिगोप्यमिदं गीताशास्त्रम्। योऽधिकारी मद्भक्तेषु मम भक्तेभ्योऽभिधास्यति उपदे-क्ष्यति स इति योज्यम्। मयि परां भक्तिं कृत्वा मामेवैष्यति। प्राप्स्यति। असंशयः नास्ति संशयः।। ६८।।

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
भविता न च मे तस्मादन्यः प्रियतरो भुवि।। ६९।।

तस्माद्गीताव्याख्यातुः मनुष्येषु कश्चिन्मे प्रियकृत्तमः। न चास्ति नैवास्ति। तस्मादन्यो मे प्रियतमो भविता च न। नाभूदिति च ज्ञेयम्। अत्र मनुष्येष्वित्युक्त्या देवानां फलाधिक्यं सूचयति।। ६९।।

अध्येष्यते च य इमं धर्म्यं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः।। ७०।।

गीताध्ययनमपि फलकथनेन प्रशंसति– **अध्येष्यते चेति।।** धर्म्यं धारकत्वा-द्धर्मो भगवान् तदीयं धर्म्यम् धर्मसाधनमिति वा। इममावयोः संवादं गीताप्रबन्धं यः अध्येष्यते च पठिष्यति च तेन पुंसा ज्ञानयज्ञेन ज्ञानाख्ययज्ञेनाहमिष्टः पूजितः स्यां भवेयं इति मे मतिः।। ७०।।

श्रद्धावाननसूयश्च शृणुयादपि यो नरः।
सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम्।। ७१।।

गीताश्रवणमपि फलोक्त्या प्रशंसति— **श्रद्धावानिति**।। अस्मादस्ति मे फलमित्यास्तिक्यबुद्धिमान्। अनसूयः असूयादिदोषरहितश्च नरः इममावयोः संवादं शृणुयाच्चेदपि। सोऽपि मुक्तः सन्पुण्यकर्मणां शुभान्लोकानवाप्नुयात्। अत्र सोऽपि श्रवणं कुर्वन्नपि मुक्तः। किमु तदध्येतेत्युक्त्या श्रवणं कुर्वतोऽपि तदध्येतुर्मुक्तावधिकसुखमिति सूचितम्। तथा तस्मादपि व्याख्यातुर्मनुष्यस्याधिकं सुखम्। ततो देवानामिति ज्ञातव्यम्।। ७१।।

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा।
कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनञ्जय।। ७२।।

एतावानुपदेशः अरण्यरुदितवज्ञातो न भवति किलेति भावेन पृच्छति— **कच्चिदिति**।। किमित्यर्थेऽव्ययमेतत्। हे पार्थ, त्वयैकाग्रेण चेतसा एतत् मदुक्तं गीताप्रमेयं श्रुतं किम्। अज्ञानोत्थः संमोहः कच्चित्ते प्रणष्टः।। ७३।।

अर्जुन उवाच-

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव।। ७३।।

इति पृष्टस्योत्तरमाहार्जुनः— **नष्ट इति**।। नष्टो मोहः प्रथमाध्यायोक्तो विपरीतज्ञानलक्षणो मोहो नष्टः। त्वत्प्रसादान्मया स्मृतिर्लब्धा। नारायणद्विट् तदनुबन्धिनिग्रहः परमो धर्मोऽवश्यं कार्य एवेत्यादिस्मृतिर्मम जाताऽस्ति। गतसन्देहः युद्धे स्थितोऽस्मि। यथेच्छसि तथा कुर्विति भवत्कृताक्षेपपरिहाराय भगवन्तमनुसरति— **करिष्ये वचनं तवेति**।। **७३**।।

सञ्जय उवाच-

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।
संवादमिममश्रौषमद्भुतं रोमहर्षणम्।। ७४।।

एकान्ते सञ्जातः कृष्णार्जुनसंवादः कथं त्वया ज्ञात इति धृतराष्ट्रहृद्गतशङ्क निराह सञ्जय इत्याह— **इत्यहमिति**।। इति पदेन प्रथमाध्यायाद्युक्तस्य सर्वस्य परामर्शः। महानात्मा मनो यस्य तस्य महात्मनः। अद्भुतं प्राक् कुत्रापि न श्रुतम् आश्चर्यं, रोमहर्षणं रोमाञ्चकरम्।। ७४।।

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम्।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम्।। ७५।।

व्यासेन हि सञ्जयस्य कुरुक्षेत्रे युद्धसमाप्तिपर्यन्तं तत्र प्रवृत्तस्य सर्वस्यापि दर्शनश्रवणे तव स्यातामिति दिव्यदृष्टिदानात् व्यासप्रसादादित्युक्तम्। योगं पुमर्थोपायं योगेश्वरात्सर्वोपायानामीश्वरात्। स्वयमेव कथयतः कृष्णात्। साक्षादन्याव्यवधानेन श्रुतवानित्यन्वयः।। ७५।।

राजन्संस्मृत्य संस्मृत्य संवादमिमद्भुतम्।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः।। ७६।।

तच्छ्रवणेन स्वस्य जातं तात्कालिकं फलमाह– **राजन्निति**।। हे राजन् इति धृतराष्ट्रस्य सम्बोधनम्। पुण्यं पारत्रिकसुखहेत्वदृष्टकरम्।। ७६।।

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः।
विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः।। ७७।।

तच्च रूपं विश्वरूपम्।। ७७।।

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम।। ७८।।

।। ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो नाम अष्टादशोऽध्यायः।। १८।।

युद्धकरणनिश्चयं श्रुतवतो राज्ञः कुत्र जयादिरिति हृद्गतशंकां निराह सञ्जयः।। **यत्रेति**।। यत्र सेनायां योगेश्वरः सर्वोपायवतां स्वामी। तत्र श्रीः राज्यलक्ष्मीर्भूतिः संपत् नीतिर्न्यायः, ध्रुवा निश्चलेति मम मतिः, निश्चय इत्यर्थः।। ७८।।

अशेषगुणपूर्णाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने।। १।।

इति श्रीकृष्णगीताभाष्याद्युक्तार्थसङ्ग्रहः।
राघवेन्द्रेण यतिना कृतः सज्जनसंविदे।। २।।

इति श्रीमत्सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रपूज्यपादशिष्येण राघवेन्द्रेण कृते श्रीमद्गीतार्थसङ्ग्रहे अष्टादशोऽध्यायः।। १८।।

।। श्रीकृष्णार्पणमस्तु।।